


5 June_kupwara 1111.pdf **Title : Shri Jaimini Sutra Vyakhya**



Ref :https://archive.org/details/jaiminisutrabhashyaofkashiramvenkateswarasteampress1913_202003_803_/page/n109/mode/2up



Ref:



Ref: https://archive.org/details/JaiminiSutraWithVyakhyaNeelkanth882GhaAlm5Shlf1DevanagariJyotisha/page/n65/mode/2up

चतुर्थे अष्टमे वाश्रितस्य द्वितीयगते पदात् द्वितीये गुलिकशनिदृष्टे पापयोगे रिपुगण हतो भवतीत्यर्थः अत्रैव कंचन विशेषमाह तत्रैवं
५१ द्रान्निश्चयेन तत्र चतुर्थे राशौ चतुर्थराशि द्वितीये वा चंद्राद्विद्यमानान्निश्चयेन रिपुहतो भवतीत्यर्थः चंद्राभावे तु रिपुहतिः का
दाचित्कीति भावः अत्रानिरूढराशौ दारस्थो न चंद्रवदेव कुजमाश्रित्य फलमाह कुजेन ज्ञातिभिः चतुर्थे चतुर्थराशि द्वितीये
प पंचमे वा ... द्वितीये शनिगुलिकदृष्टे भावेशाक्रान्तराशिस्थे इत्यंतमावर्तमानं पंचमेपि योजनीयं अत्र चतुर्थस्थानपर्यंते भा
ग्यपंचमे पंचम द्वितीयषष्ठे वा पापनिश्चित्य पापफलमाह तत्र शनौ मृत्युवदग्निकराच्च अत्र शनिश्चितिनिर्देशेन शनिदृष्टेर्वी
धि धान् शनिदृष्टेत्यंते वा निश्चितेनान्यसंनियोग शिष्टस्य गुलिकदृष्टे इत्यस्यापि निवृत्तिः तथा च शनिगुलिकदृष्टे इत्येतन्निवृत्तये
च पदद्वितीये भावेशाक्रान्तराशिस्थे इत्येतदनुवर्तते एवं च पूर्ववत्स्त्रोपात्ते पंचमे तत् द्वितीयषष्ठे वा पदद्वितीये भावेशाक्रां
तराशिगे शनौ सति मृत्युवत् तत्र कुजे शेषः इति तत्त्वेन कारकत्तृतीयस्थाने निरूढपापयोगो भवति अग्निकराच्च पी राम
डाकरो भवतीत्यर्थः अथ कारकाश्रितांशेनापि फलान्याह स्वांशेपि कारकाश्रितांशे एवं पदद्वितीये भावेशाक्रान्तराशिस्थे ५१
पि कुजे शनौ वा सति ज्ञातिहतः मृत्युस्थानफलाग्निकरापीडाफलवत् क्रमेण भवति [illegible] कुजेन ज्ञातिहतः शनिमृ
त्युस्थानफलादिति भावः अथ कारकाश्रितांश द्वितीये ... माह अन्यतरांशे कारकात् द्वितीये भावेशाश्रित

तः प्रतिबंधो भवतीत्यर्थः आत्मकारकौ श्रितांशात् दशमैकादशांशा द्वादशैकादशस्थानाश्रयेण मरणाविशेषयोगमाह अथानि
हतकायोमार्गे कारकाश्रितांशाद्दशमाद्वा एकादशे कारकान्नवमे एकादशे वा पदाद्द्वितीये शनिगुलिकदृष्टे रवौ सति वज्रपा
तेन हतः इति सरोगो भवति अथ कारकत्रिंशांशान्नवमादेकादशाद्वा द्वितीयस्थानावलंबेन योगविशेषादरिष्टफलमाह भा
ग्ये रिपुणा वीरवर्गैश्च कारकनवमाद्द्वितीये दशमे कारकैकादशे वा द्वितीये वा कारकद्वादशे द्वितीये शनिगुलिकदृष्टे रवौ सति शा
त्रुणा वीरसमुदायैश्च हतदेहो भवतीत्यर्थः अथ कादशमस्थानमाश्रित्य फलमाह स्वैर्वैर्यमे रिपुः अत्र पूर्वोक्तस्थानादृश्चिमस्था
न परिग्रहः इति निर्वृत्ता स्वेति कारकस्यावधिभूतस्य पृथग्ग्रहणात् अन्यत्सर्वमनुवर्तते कारकत्रिंशांशाद्दशमे पदद्वितीये शनि
गुलिकदृष्टे रवौ सति जानकवानजनः सर्वेषामात्रु भवतीत्यर्थः अथ कारकाच्चतुर्थस्थानमवलंब्य फलमाह क्रूराश्रयवले रिपुह
तः अत्र खलु वितिनिवृत्तस्थाने क्रूरसामान्यग्रहपरिग्रहात् तथा च कारकत्रिंशांशाद्दशमान्नवमे कारकत्रिंशांशाच्चतुर्थे क्रूरग्रह
सामान्याश्रये पदद्वितीये गुलिकयानिदृष्टे रिपुणा हतो भवतीत्यर्थः अथ पुनरपि कारकाच्चतुर्थमेवाश्रित्य फलविशेषोपयोगवि
शेषं दर्शयति शन्यारफणिवर्गाद्यैः अत्र क्रूराश्रयनिवृत्तेः तत्स्थानापन्नार्थी तदग्रहणात् तथा च कारकाद्दशमान्नवमे कारकच
तुर्थे राश्यंशे शनिमंगलराहुक्षेत्रांशाद्येपदाद्द्वितीये शनिगुलिकदृष्टे सति रिपुहतो भवतीत्यर्थः अत्र राहोः वृश्चिकः कन्या वा
वर्गः इति विवेकः अथ पुनरपि कारकचतुर्थाश्रयेणैव फलमाह भावेशाक्रांतराशिस्थे रविपुत्रदृष्टे च[illegible]रजीवनं कारक

वंचात्मकारकाश्रितराशिं प्रथमं विधायायगराना कार्य्येत्यर्थ तथा च तस्मात्स्वाश्रिताद्राशेर्जातकवतः पुरुषस्य वंधनिधनं
५८ समाहारद्वंद्वः एवं च वंधनं च तत एव च विचारणीयं भवतीति भावः अथ द्वितीयादिभावान्हान्यं च भिः सूत्रैर्दर्शयति मातेत्यादि
भिः तत्रादौ द्वितीयभावाह दर्शयति मातापित्रोर्द्वितीये कारकाश्रितस्थानात् द्वितीयस्थानं मातापित्रोर्भवतीदृति य
थाकारकाश्रितराशिर्जातकवत्तस्थानस्माद्द्वितीयराशिर्मातापित्रोरितिभावः अथ तृतीयभावाह दर्शयति ज्ञातिवर्गभ्राता
दिस्तृतीये कारकस्थानात्तृतीयस्थाने कारकस्थानत् ज्ञातिसमुदाये भ्रात्रादौ विज्ञेयं अथ चतुर्थभावाह दर्शयति कलत्रं चतु
र्थेः भोगस्त्रीविषयश्चतुर्थस्थानं कारकस्थानाद्भवति अथ षष्ठभावाह दर्शयति शत्रुवर्गः षष्ठे कारकाश्रितराशेः षष्ठस्थाने
शत्रुसमुदायविषयं भवति अत्र पदे शत्रुषु नानाविधतासमुचितासर्वैपि षष्ठे विचारणीया भवंतीति संपन्नं एवं च यथा कारक
राशिं जातकं च तं विधाय प्रागुक्तयोगभेदैर्दुःखभेदश्च जातकवतो विचारणीयाः तथा द्वितीयादिपंचमभावानपिदृ॰ ज्ञातिव
र्गेभ्रातो भ्रात्रादिस्त्रीपुत्रशत्रुवर्गाश्रितस्थानानि परिकल्प्य तदीयस्थानतो द्वादशभावान्विचार्य जातकवतः दुःखप्रागुक्तक्ले राम
शादि विचारणीया इत्यर्थः तथा चात्मकारकाश्रयराश्यादिषु षट्सु स्थानेषु प्रथमराशित्वेन जातकवत्तनं मात्रादिसंबंधिते ५८
ष्विनेषु सत्सु आत्मकारकमात्रादिषट्राशीनां आदिभावत्वेन स्वीयेषु कुंडलीषु कल्पितासु तासु प्रत्येकं द्वादशभावेषु मध्ये प्राग्

राशिगे सति तत्र कुजे ज्ञातिहंतः शनौ मृत्युवदग्निकराश्चेति फलवान्भवतीत्यर्थः अथ कारकद्वादशमादाय फलं दर्शयति नी
चाभ्रयेविपरीतं तत्र शनौ रूपे विषभक्षणादिः कारकांशाद्द्वादशे पदद्वितीये भावे शान्ति नराशिरूपे कुजशनौ वा सति विपरी
तं पुरुषाभिलक्षणीयाद्यर्थाद्विपरीतं शुभविपरीतमनिष्टसामान्यं भवतीत्यर्थः अथ पदद्वितीयाधिकारनिवर्तनपूर्वकं प
दशामधिकृत्य कारकांशाद्द्वितीयमादाय वातिदिशति पदद्वादशस्य तद्विपरीतस्य परिग्रहात् एवं च कारकांशाद्द्वितीये पदात्द्वा
दशे भावे शान्ति नराशिरूपे यानौ सति विषभक्षणादिर्भवतीत्यर्थः अथ कारकांशादेकादशावलंबेन फलमाह ननु तेनोद
उहरतो कारकांशात्षष्ठे पदद्वादशे शून्ये भावे ग्रहो नराशिरूपे यानौ सति राजादिदंडेन द्रव्यादिहरणं भवतीत्यर्थः अथ
कारकांशाधिकारनिवर्तनाय राशिरूपं भावमधिकरोति एवं फले भावकुंडल्यामपि ज्ञापयति तत्र भावविशेषः स्वांशाग्र
घात् स्वत्रिंशांशे स्वांशे मूत्यादिषु अंशघटितयोगेषु तद्दशास्थाने भावविशेषोपि ग्राह्यः एवं च पदद्वितीयद्वादशभावे शान्ति
नराश्यादिघटितयोगाः सर्वेप्यशास्त्रेऽपि विवेकग्राह्याः फलानि च तत्र रविशनिराहुगुलिककुजचंद्रतद्दृष्ट्यादिभेदैः सिद्धा
नीत्यपि विज्ञातव्यानीति विवेकः अथ स्वांशकुंडल्यां कारकग्रहाश्रितांशं प्रथमं कृत्वा गणनां कृत्वा तथा कारकाश्रितराशिं
प्रथमं कृत्वा भावराशियोगा गणनीयाः ननु तत्र राशिमिमाह आद्यं स्वे वर्धं धननिधनं स्वे आत्मकारके प्रथमो राशिर्विज्ञेयः २

कस्वामिकांशेस्थिताभ्यांपापाताभ्यांमरणंनज्ञानवत् अज्ञानपूर्वकंमरणंभवतीत्यर्थः अथदशमराश्याश्रयेणारिष्टमाह न
५२ यनेग्रहरोगादिः कारकाद्दशमेकारकस्वामिकनवांशेस्थितपापाताभ्यांग्रहपूर्वकनानारोगाभवेति अथैकादशराश्याश्रयेणाफ
लमाह अन्येशत्रुमरणं कारकादेकादशेकारकस्वामिकांशेस्थिताभ्यांपापाताभ्यांशत्रुतोमरणंभवतीत्यर्थः अथद्वादशराशिमव
लंब्यफलमाह उच्चग्रहमिति कारकात्द्वादशेकारककेस्वामिकांशेपापाताभ्यांस्थिताभ्यांभूतप्रेतादिपीडाभवतीत्यर्थः अथकारक
राशेर्द्वितीयमवलंब्यारिष्टयोगमाह तत्ररविशनिभ्यामोजकूटराशौ ज्योतिश्चक्रे मेषवृषमिथुनानि तुलावृश्चिकधनूंषि चेति
ओजपदे कर्कसिंहकन्यामकरकुंभमीनाइति चयुग्मपदे भवतः एवंचमेषादित्रये तुलादित्रये च ओजकूटेसति इतरेषुयु
ग्मकूटे अत्रग्रहभीतिरिति सूत्रादनुवर्तते एवंचतत्रकारकराशेर्द्वितीयराशेरविशनीयद्योजकूटराशौ भवतस्तर्हिता
भ्यांतत्रस्थिताभ्यांरविशनिभ्यांग्रहभीतिर्भवतीतियोजना अथकारकराशेर्द्वितीयराशिमाश्रित्ययोगभेदेनफलमाह
युग्मेविपर्ययः कारकराशेर्द्वितीयेयुग्मकूटराशौस्थिताभ्यांरविशनिभ्यामितिताभ्यांविपर्ययः जातिकोनग्रहभीतिमात्रं राम
किंतुभूतादिग्रहेणशारीरविपर्ययोमरणमेवभवतीत्यर्थः अथरविशनिंसमाश्रित्यस्थानभेदेनफलभेदंदर्शयन्ति धनुषु ५२
स्वगदाभ्यांपादरोगः नवमतृतीयगाभ्यांरविशनिभ्यांओजकूटराशिगाभ्यांपादरोगोभवति अत्रपूर्ववत्शनिरप्येनेमि

क्रीत्याश्रयस्य द्वितीयादिभावेषु यथासंख्यं पदीतीयद्वादशाद्रूपेषु यथोक्रीतिनिततयस्ताक्रांतेषु निरूक्तदृष्टिषु तेषु अंशकुं
डल्याभिव विचारणीयं दुःखादिफलं जातं किं जनमात्रादंगत्वाभिमिति भावः अथ कारकाश्रये सति द्वितीये भावे राहुकेत्वन्यतर-
सत्वदृष्टिभ्यां वं धननिधने जाते किं जनसन्निहितस्य जनस्य भवतीत्याह अवपाताभ्यां सन्निकृष्टजने कारकाश्रयतो द्वितीय
राशौ राहुकेत्वन्यतरस्थितस्तानदृशा वा जातः किं [illegible] समीपवर्तिजने वंधनिधने भवत इति भावः अथ कारकाश्रयराशिसप्तम
राशिमाश्रित्य फलं दर्शयति लाभे स्त्रिया विपत्तिः कारकाश्रयराशेः सप्तमे रा[illegible]शौ राहुकेत्वन्यतरसत्वे तद्दृष्टेर्मुख्यस्त्री विपत्ति
र्भवति अथ जातकवतो मरणभेदमाह भावे स्वकर्मविनाशे कारकाश्रयराशेरष्टमराशौ कारकस्वामिकांशे कारकाश्रयीभू
ताद्राशेस्तृतीयस्थस्य वा राशौ स्थिताभ्यां पाताभ्यां जातकिनो वंधुनिधनं भवतीत्यर्थः अथारिष्टयोगभेदमरिष्टनिमित्तं चाह
स्वांशेनिधनान्निधनमप्युच्चात्पतनं कारकाश्रयराशेर्नवमान्नवमे कारकाच्चतुर्थे कारकस्वामिकनवांशगाभ्यां स्वीयोच्चभूमि
तः पतनं भवतीत्यर्थः अथ कारकनवमादेकादशमाश्रित्य मरणनिमित्तमाह शून्येमरनु निधनादित्यनुवर्तते कारकनव
मादेकादशे कारकात्सप्तमे कारकनवांशगाभ्यां पाताभ्यां स्वभूमेरुच्चात्पतने यापतनेन मृतो भवति एवं योगेऽनुत्पन्नमेव अस्मि
न्योगे तु मरणमपीत्यर्थः अथ नवमराशिसमाश्रयेण योगभेदात्फलभेदमाह धनेन ज्ञानेन ज्ञानवान्मरणं कारकान्नवमे कार

॥

कद्वितीयराशेरोजकूटद्वितीयराशौ केतौ पापदृष्टे पादरोगी पादहीनो भवति युग्मकूटद्वितीयराशौ स्थिते केतौ पापग्रहदृष्टे पादे
५३ न सर्वथा हीनो ऽङ्गहीनश्च भवतीत्यर्थः अथ दशाग्रहस्यावधिज्ञानाय बलं विचारणीयमित्याह अथ बलानि अथ यत्र ग्रहास्तत्र ग्रहो ज्यायान्
न्स्यग्रहे ऽधिकग्रहः साम्ये चरस्थिरद्वंद्वाः क्रमात्सुबलेशालिना वुभयाललोकबलान्यग्रिमव्यवहाराय निर्द्धारणीयानीत्यर्थः एवं चा
नेकत्वे च रस मभिधाने सति निरूढानि बलानि विचारणीयानीति भावः अथ नाथांताः समाः प्राग्गेशोनुपदिष्टः चरपर्य्यायग्रह
णो निमित्तमाह शालीनि शुभयुक्ते राशिबलभागे चरपर्य्याये दशा अत्र ह्यादितिन्यायेन बलवति ग्रहे कारकराशौ ऽप्यासन्नवमे
विद्यमाने सति बलवतो राशोर्ग्रहाद्दितिबलवतो राशेः स्थोन युते च सति चरपर्य्याये दशा प्रवर्तनेकार्य्यमित्यर्थः अथ पुनरपि
चरपर्य्याये दशाप्रवृत्तौ निमित्तद्वयमाह शुभत्रिशूले शानिशूले पात्रिशूले च अत्र पूर्वसूत्रे शुभयुक्ते इत्यंशाग्रहायस्सर्वेप्य
शिष्यमनुवर्तते तेन शुभयुक्ते इतितन्त्र[illegible] तिद्ध्ये दिनः शूलानि देशात् तथा च नवमयायो स्त्रिशूले त्रिकोणो द्वितीयभावस्य त्रिकोणो राम
बलवद्राश्यधोप्राशिनि ग्रहे सति चरपर्य्याये दशा कार्य्येत्यर्थः एवं च निरूढेषु निमित्तेषु स्थिरपर्य्याये दशा न प्रवर्तनीया च ५६
रपर्य्यायपर्यायत्वादिति भावः अथ दशाप्रवृत्तेरारंभावधिं दर्शयति भावको राशा चरपर्य्याये दशा प्रवृत्तिरस्मराशे येन वा गप
चमेनतनो भवति तत्रापि यो भेध्ये यद्बलवत्तनो भवतीत्यर्थः अथ शशिनंदपावकाद्युक्ते स्थिरदशायामारंभावधिमाह

लित्वेके आवस्थानमपेक्षितं किंतु एतयोरन्यतरो नवमे ऽन्यतरश्च तृतीये ऽतो द्वौ चोजकूटगावपेक्षितौ नवमे ओजकूटे सति तृती
येप्योजकूटराशिमेव स्थितात् अत्र युग्मे विपर्यय इत्यनुवर्तते ओजकूटराशिपदं चतुर्थस्तभीतिरिति पदं तु नानुवर्तते यदरोग इति
स्पष्टमेव फलांतरनिर्देशो नानुवर्तनात् तथा च नवमतृतीययोः ओजकूटराशौ रविशनीपादरोगमात्रं भवति युग्मकूटरा
शौ चेन्नो भवतस्तर्हि पादविपर्ययो नाशश्च भवतीत्यर्थः अथ पुनरपि स्थानांतरमुपादाय रविशन्योर्विशकलितकूटस्थित्या
योगभेदे फलभेदमाह तनुविक्रमगाभ्यामंगुलियोग कारका षष्ठाष्टमगाभ्यां पृथगवस्थिताभ्यां रविशनिभ्यां ओजकूटरा
शिगाभ्यामंगुलिरोगो भवति अत्र षष्ठे ओजपदाय राशिः षष्ठे द्वष्टमे ओजपदराशिर्भवतीति द्वयोरपि रविशन्योरोजकूटराशिगतत्वं
भवतीति योगो घटनीयः ओजपदस्य प्रथमराशिमपहाय द्वितीये तृतीये च स्थिते नायं योग इति विवेकः यदि रविशनी षष्ठा
ष्टमयोरेव युग्मकूटराशिगौ अंगुलीनां विपर्ययो नाशश्च भवतीति युग्मे विपर्यय इत्यनुषज्य योजनीयं ओजपदवदेव युग्म
कूटस्य षष्ठाष्टमयोः युग्मपदसंबंधो यथाक्रमं वेदितव्यः अथ कारकद्वितीयराशिनोपि भवति चकारेणांगरोगः संगृहीतो भवति
कारकद्वितीये ओजकूटराशौ केतुना स्थिते नागरोगहीनो भवतः युग्मकूटराशिगे नंतराविनिर्मितिश्च रोगपूर्विका भवतीत्यर्थः
अत्र कारकद्वितीयराशावेव ओजकूटयुग्मकूटद्वितीयरा[illegible]शिमादाय फलभेदं दर्शयति तत्र पापदृष्टेऽपदहीनः कार

पुत्राघन्यायुर्विजघन्यायुः अंतिमायुः खंडे पदाद्द्वितीये नवराश्योः परिपाककालेन तद्दशायां निधनं भवतीत्यर्थः प्रथम
तापित्रोरपि जातकवत्तद्वन्निधनमतिदिशति एवं निधने मातापित्रोः पदं द्वितीयमेव पदं परिकल्प्य शोणितनिसर्गाद्
तुशीतातराः स्थिरदशा प्रवर्तकग्रहपरिशोधनपूर्वकं जातकवत्तद्वन्निधनदशादिकं सर्वं विचारणीयं एवं तत्तीयादिस
शीनपि भ्रातृ पदं तत्वेन परिकल्प्य तेषां निधनदशादि विचारणीयमिति मातापित्रग्रहस्थानमुपलक्षणं तया स्नेच यती
तिवेदितव्यं अथ सन्यासकारकं चतुर्थराशिकारकं वा दर्शयति भूमंपाश्चानिहानिकारकः पदाद्द्वादशस्थः सन्यासकारक
य द्वादशमस्थो ग्रहः चतुर्थभावकारक इत्यर्थः अथ राशिनंदयावकादि ति स्थिरदशा क्रमप्रवृत्तौ केंद्रादिकं स्थिरदशा व
सम्यग्नसापवादं वक्ते नाथांता दशा न धिकरोति नाथांतसंज्ञा तु वक्ष्यमाणराशिषु स्थिरदशाप्रवृत्तावपि नाथांता स
मरवयाहा नतु राशिनंदेत्यादावाद्यत्यर्थः अथ स्थिरदशाप्रवृत्तौ सत्यां नाथांता दशा ग्रहणमिति राशिनंदयति
सद्बाभ्यां दाभ्यां कामसचरपर्याये भागपदारयोः स्थिरोभययोः कामात्तीयात्सप्तमे ऽथोत्तदान्नवमे यद्वा पदात्स
समी विद्धं भद्यमानस्य चरराशौ पर्याये प्राप्ते राशिनंदपावकादि इसद्दानयन नगग्राः अपि तु नाथांतसंज्ञा ग्रा एवं ग्रा
ग्राः स्तुः एवं पदात्द्वितीये स्थिरराशावुभयराशौ वा सति राशिनंदपावकादा नस्युः किंतु नाथांता दशा इति एवं तदवि
वेचनीयं एवं च स्थिरदशायां राशौ तत्रादि[illegible] नि[illegible]राशित्रये चरस्थिरद्विस्वभावराशि[illegible]देनाक्रमे

रामः
५८

निसर्गस्तत्र राशिनंदपावकसंख्यायाः प्रतिराशिनियतत्वात्स्थिरदशानिसर्गः सहजस्तिष्ठः इतिगीयते एवंचसास्थिरपर्या
यदशाचसास्प्रवर्त्तते इत्यर्थः अथस्थिरपर्य्यायदशाप्रवर्त्तकग्रहं दर्शयति आश्रयतो बलिष्ठः ग्रहसंबंधेनवलं तन्नग्राह्यं राशिसं
बंधेन चरस्थिरद्वंद्वत्वसंबंधेन बलं ग्राह्यं एवंच राशितो बलवान् ग्रहः स्थिरपर्य्यायप्रवर्त्तको भवतीत्यर्थः अथस्थिरदशाप्रव
र्त्तकस्याश्रयतो बलिष्ठस्यावस्थानराशिं दर्शयति पाक्स्थिरराशे पितृलाभयोः लग्नसप्तमयोस्तृतीयराशौ विद्य[illegible]शिव
लयुतो ग्रहः स्थिरदशाप्रवर्त्तकः इतिगोलार्थः अथानिरुक्तस्थिरदशाप्रवृत्त्यावपवादमाह स्वकर्मभेदेन कारकय[illegible]
द्वादशे ऽर्थात्कारकद्वितीये लग्नसप्तमाम्नतरस्तृतीयराशिभूते सति तत्राबलवान्विद्यमानो ग्रहः पाक्स्थिरराशौ वितिष्ठत्वेनास्थि
रदशाप्रवर्त्तकत्वेन सिद्धोऽपि न स्थिरदशाप्रवर्त्तकः तदाश्रयराशेः कारकाश्रयद्वितीयराशिनया तदपवादात् परंतु चरदशैव तत्र
प्रवर्त्तनीयेति अथस्थिरदशाप्रवृत्तिस्थानं पूर्वोक्तस्थानापवादेन तन्निमित्तं दर्शयति वृत्तिस्थानां पूर्वोक्तस्थानं प्रवर्त्तक
श्रुसदा तन्नवमा द्दशायाः स्थिराभिकाशाः प्रवृत्तिरित्यर्थः एवंच सप्तमतृतीये दशाप्रवर्त्तकग्रहे सति पदं तन्नवमयोर्दशा
रंभस्थानत्वेन कथं नापादितोप्रभ्रमाणो न तस्मात्तृतीये स्थिरदशाप्रवर्त्तकग्रहस्थैत्वस्मादेवदशाप्रवृत्तिरिति निसर्गस्तानहीनि
सामान्यशास्त्रतोऽवसेयं अथस्थिरचरपर्य्याययोर्निधनाश्रयराशिदशामाह जघन्यायुषितत्रपरिपाके दीर्घमध्या

दशायाद्दितिभावः अथलेयलाभपदवत्फलविवेचनपदांतरंदर्शयति भाग्यकारकाभ्यांमंगलपदं लग्नस्यपदस्यसप्त
मस्यवाद्वितीयोयोराशिरात्मकारकीभूतस्य योग्रहस्ताभ्यां यएकादशोराशिस्तस्यपदं कार्यंभवतीत्यर्थः एवंचलग्नाद्वि
तीयेकादशात्लग्नाद्यदाद्यंपदं सप्तमाद्वितीयेकादशः दन्यत्पदंआत्मकारकैकादशादपरंपदमिति पदत्रयमिती
हकर्तव्यताविचारायेति कुंडलीत्रयं विधेयमिति सिद्धं भवति अथैतत्पदकुंडलीत्रयेनिधनस्थानभिन्नाकुंडल्यपेक्षया
विलक्षणंदर्शयति मृत्युर्बुधे एतत्त्रिविधपदकुंडलीषुपंचमेराशौ मृत्युर्विचारणीयइत्यर्थः एतत्कुंडलीत्रयाति
रिक्तपदकुंडलीष्वितो वैलक्षण्यमाह अनैनान्यथा पदांतरेनैमृत्युः किंत्वष्टमेजघन्यायुषितत्रपरिपाकेइत्युक्ते
स्थानभेदेषु मृत्युर्विचारणीयः प्रकृतपदेषुतु पंचमेषुमृत्युर्विचारणीयइतिभावः अथमंगलपदकुंडल्यांमृ
त्युविचारातिरिक्तोपिविचारः सर्वोपिलेयलाभवदेवकर्तव्यइत्याह भूतमन्यत् मृत्युविचारातिरिक्तं
दुःखसुखादिविचारस्वरूपं लेयलाभपदस्थलेभूतंसंपन्नं तत्तस्यसर्वमपि विचारणीयमितिदिक् ॥
इतिजैमिनीयेतृतीयाध्यायेतृतीयपादस्य वृत्तिः ॥

ऽष्टमौ बले मृत्युः जन्मलग्नात्संवमे स्थाने पदात् द्वादशे शनौ सति तत्र मृत्युर्विचारणीयो रुद्र [illegible] लादिभिर्वेत्यर्थः
४६ अथ जन्मलग्नमेवादाय पदाश्रये शशानि स्थिता मृत्युभेदमाह भाग्ये दंडात् लेयाद्बले मृत्युरित्यनुवर्तते पदाधिकारात् पदे
इति स्पष्टं बलं लग्नात् द्वितीये पदात् द्वादशात्मके शनौ सति राज्ञादिहृत दंडान्मृत्युर्विचारणीय इत्यर्थः अथ पुनर्जन्मलग्नपदं
चादाय शनि स्थिता मृत्यो भेदं विवेचयति कामे विषभक्षणात् लग्नात्तृतीये पदाद्द्वादशे शनौ सति विषभक्षणेन मृत्युर्भव
तीत्यर्थः पुनरपि जन्मलग्नपदं चादाय शनि स्थिता ऽरोगोपद्रवं दर्शयति दाहज्वरभयं लग्नाच्चतुर्थे पदाद्द्वादशे सति ज्वरभयं
संततमधिज्वरहृता पीडा भवति अथ पुनरपि लग्नपदे पीडाहर्षमाश्रयेणारिष्टं [illegible] दर्शयति मातापातुहृतः लग्नप
दाद्द्वादशरूपे शनौ सति मातुराहतो भवतीत्यर्थः अथ लग्नाद् बलं वा [illegible] निसमाश्रयेणादुष्टफलमाह तनौ रिपुभयं लग्ना
त्षष्ठे पदाद्द्वादशे शनौ सति शत्रुहृतं भयं भवतीत्यर्थः अथ पुनरपि लग्नपदं चोपाश्रित्य शनिमबलं बदोषमाह लाभे
शनौ कुष्ठरोगाः लग्नसप्तमपदद्वादशे सति कुष्ठरोगगलत्कुष्ठादिरोगो भवतीत्यर्थः अथ पुनरपि लग्नपदे समाश्रित शनिम
वलेब्ध दोषं दर्शयति विसूचीजलरोगादि दिने लग्नाद् अष्टमे पदाद्द्वादशे शनौ सति विसूचीमहोदरादिरोगो भवति अ
थ लग्नपदं चावलं अशनि स्थितारिष्टं दर्शयति धने ह्रासः लग्नान्नवमे पदाद्द्वादशे शनौ सति वज्रपातादिहतो भवति अथ राम
पुनरपि पदलग्नाश्रयेण शनिं चाबलं च दोषमाह नित्ये दुर्मरणं लग्नदशमे पदाद्द्वादशे शनौ सति दुर्मरणं भवतीत्यर्थः अथ ४६

यदात्सप्तमः पर्यवस्यति तस्मा योगे सप्तमे यदा त्ला करा: सप्तसमुद्राः ते न पदसप्तमं गृहीतं तस्मा योगे सप्तमे पदाभिधे स्थाने भौ
मात्स्थिते नाकालदंडान्मरणं दुःकालकृतान्नादिपीडया मरणं भवति यदा दुःकालाडाजदंडाद्वा मरणं भवतीत्यर्थः यदा द
त्ताकराश्चत्वारः समुद्राः तेन पदचतुर्थं गृहीते तस्मात्सप्तमेऽर्थात्पदर्थामे स्थिते भौमात्कालदंडान्मरणमित्यर्थः अथ पुनर
पि भौमाश्रयेणैवस्थानविशेषान्मृत्युविशेषमाह शषेभुजंगादेः पदात्पंचमे स्थिते भौमात्सर्पव्याघ्रादेर्मरणं भवतीत्यर्थः
अथ पुनरपि भौमाश्रितस्थानभेदाद्रोगविशेषानाह कीटेवृषहृश्चिकंधरोगः यदा दशकादशे वृश्चिकान्यतरराशौ स्थि
ते भौमाद्रोगो नित्यानुबंधी भवतीत्यर्थः अथ पुनरपि भौमाबलेनैव स्थानभेदान्मृत्युभेदं दर्शयति मानस्थे भौमे वैमू
षकादेर्मृतिः पदपंचमषष्ठाष्टमे स्थिते भौमान्मूषकादेर्मृतिः पदपंचमषष्ठाष्टमे स्थिते भौमान्मूषकादिः [illegible]ती
क्षुद्रजंतुपीडातो मृतिर्भवतीत्यर्थः अथ शन्याश्रयेण स्थानभेदेन मृत्युविशेषमाह तत्र मंदे विषपानादेः यदा तद्वितीयेषा
ने स्थिते सति विषपानादुष्टभुजंगभक्षणादेर्मृत्युर्भवतीत्यर्थः अथ पदद्वितीयगतशनिभावाद्यसौम्ययोगदर्शनाभ्यां मरणवि
शेषं दर्शयति सौम्यग्रहयोगाभ्यां मंडूकभेदादेः पदद्वितीयस्थे मंदे सौम्यग्रहयोगे सौम्यग्रहदर्शने वा सति मंडूकभेदादि
दंशनादेर्मृतिरित्यर्थः अत्र मंडूकभेदयोरर्थांतरभेदो जातकेपि विवेचनीयः अथात्मकारकांशाश्रितपदाबलेनैव श
निश्रितमारणविशेषमाह स्वांशपापयुते व्रणादिभिः आत्मकारकांशाश्रितनवांशात् द्वादशे पदाद्वितीयराशौ यात
के मंदे सति व्रणयामादिलक्षणो भवतीत्यर्थः जन्मलग्नमवलंब्य पदाश्रयेण शनिस्थित्या मृत्युविचारं दर्शयति लेया

अष्टमो बले मृत्युः जन्मलग्नात्सप्तमे स्थाने पदात् द्वादशो शनौ सति तत्र मृत्युर्विचारणीयो रुद्रस्थ[redacted]स्थलादिष्विवेत्यर्थः
४६ अथ जन्मलग्नमेवादाय पदाश्रयेण शनिस्थित्या मृत्युभेदमाह भाग्ये दंडात् लेपाद्वले मृत्युरित्यनुवर्तते पदाधिकारात्पदे
इति एवं च लग्नात् द्वितीये पदात् द्वादशस्थानके शनौ सति राजादिहृतदंडान्मृत्युर्विचारणीय इत्यर्थः अथ पुनर्जन्मलग्नपदं
चादाय शनिस्थित्या मरणभेदं विवेचयति कामे विषभक्षणात् लग्नात्तृतीये पदाद्द्वादशो शनौ सति विषभक्षणेन मृत्युर्भव
तीत्यर्थः पुनरपि जन्मलग्नपदं चादाय शनिस्थित्याऽरोगोपद्रवं दर्शयति दारे ज्वरभयं लग्नाच्चतुर्थे पदाद्द्वादशे सति ज्वरभयं
संततमधिज्वरहृता पीडा भवति अथ पुनरपि लग्नपदे पीठगृहे समाश्रयेणारिष्टं [redacted] दर्शयति मात्रापात्रुहृतः लग्नप
दाद्द्वादशरूपे शनौ सति शत्रुराहृतो भवतीत्यर्थः अथ लग्नाद्बलं वा शनिसमाश्रयेणारातुर्दुष्फलमाह तनौ रिपुभयं लग्ना
त्षष्ठे पदाद्द्वादशे शनौ सति शत्रुहृतं भयं भवतीत्यर्थः अथ पुनरपि लग्नपदं चोपाश्रित्य शनिमबलं च दोषमाह लाभे
शनौ कुष्ठरोगाः लग्नसप्तमपदद्वादशे सति कुष्ठरोगगलत्कुष्ठादिरोगो भवतीत्यर्थः अथ पुनरपि लग्नपदे समाश्रित्य शनिम
बलं च दोषं दर्शयति छिद्रे चीजलरोगादिदिने लग्नादष्टमे पदाद्द्वादशे शनौ सति छिद्रे चीमहोदरादिरोगो भवति अ राम
थ लग्नपदं चाबलं च शनिस्थित्यारिष्टं दर्शयति धने ह्रासः लग्नान्नवमे पदाद्द्वादशे शनौ सति वज्रपातादिहतो भवति अथ ४६
पुनरपि पदलग्नाश्रयेण शनिं चाबलं च दोषमाह नित्ये दुर्मरणं लग्नद्दशमे पदाद्द्वादशे शनौ सति दुर्मरणं भवतीत्यर्थः अथ

४५ कत्रिंशांशकुंडल्यामेव तुलादिषट्काश्रयेण रोगमाह पूर्वषट्के राहुकेतुभ्यां विजिह्वादि: ज्योतिश्चक्रस्य वामावर्तेन पूर्वाभिमु
खयस्ते: षट्कं जिह्वाग्रमिति कन्यायाः पश्चिमान्ततः पश्चिमषट्कं मेषादिकं पूर्वषट्कं तुलादिकं कारकत्रिंशांशे तुलादिषट्के
द्वये पदद्वितीये राहुकेतुभ्यां दृष्टे सति जिह्वानाशादिरोगो भवति अथात्मकारकात्रिंशांशाद्द्वितीयसमासमादाय रोगविशेषमकरयो
गमाह तत्र शनिभ्यां गलजिह्वादि: आत्मकारकत्रिंशांशकुंडल्यां द्वितीये भावे पदद्वितीये सति तस्मिन्गुलिकशनिभ्यां दृष्टे
गलजिह्वादिरोगो भवतीत्यर्थ: अथतत्र शनिमांदिभ्यामिति निरूतस्तत्रोपाश्रितात्मकारकद्वितीयस्थानाश्रयेण रोग्यविशे
षफलकं योगमाह लाभांशेमरणं आत्मकारकाश्रितत्रिंशांशकुंडल्यां कारका[illegible]त्तस्मिन्नंशे पदद्वितीये शनिगुलिकाभ्यां दृ
ष्टे भौमे सति शोषरोगान्मरणं भवतीत्यर्थ: यद्वा तृतीयांशात्सप्तमे नवमराशावित्यर्थ: अथसप्तमान्नवमाद्वा द्वितीयस्थान
माश्रितारिष्टयोगं दर्शयति तत्र रवौ प्रतिबंध, सप्तमे नवमराशावित्यर्थ: अथसप्तमान्नवमाद्वा द्वितीयस्थानमाश्रितरवौ
सति शत्रुकृतप्रतिबंधो भवतीत्यर्थ: अथाष्टमाद्दशमाद्वाष्टमस्थानाश्रयेण प्रतिबंधविशेषयोगमाह कौंतायुधनोरगे अष्ट
माद्दशमाद्वाष्टमे कारकात्तृतीये पंचमे वा पदद्वितीये शनिगुलिकाभ्यां दृष्टे रवौ सति कौंतायुधेभ्य: प्रतिबंधो भवतीत्यर्थ: अ
थपंचमात्तृतीयाद्वा नवमस्थानावलंबेन प्रतिबंधविशेषयोगमाह सायकेर्घने पंचमात्तृतीयाद्वा नवमे आत्मकारकाश्रितां राम
शे आत्मकारकाश्रितांशे कादशे वा पदद्वितीये शनिगुलिकाभ्यां दृष्टे रवौ सति शायकै: सायकायुधै: प्रतिबंधो भवति पारब्ध ४८

मेषात्रानुवर्त्तते नतुलेत्यादिति चलेइति चानुवर्त्तते इति सूचनाय एवं चलत्स्याद्वितीयेपदद्वादशोइति नार्थः किंनु महा
पदा द्वितीये गुरुस्थानिभ्यां स्वशास्त्रमर्यादया दृष्टे सति आत्मकारकग्रहस्यानुरोधेन मरणामित्यर्थः यद्वा गुरुगुरोर्न पानिगुरो
र्वा मरणामित्यर्थः अत्र गुरुशब्दो मेषे योग्य इत्युच्च स्वक्षेत्रादि गुरोश्च अग्रहस्य ग्रहोऽपायानिति सग्रहेष्वधिकारस्य सामर्थ्य वरास्थि
रद्वन्द्वाः क्रमात्सुर्वलशालि नइति उक्ता राशिस्थितानुरोधेन वायोवलवान्ननुसाव्ययेन मरणामिति भवति यदिद्वयोरपि निरूपणी
त्यासमवलतानहि गुणाद्वयवशो न निश्चयेन मरणामिति विवेचनीयं स्वत्रिंशांशे कोलिकाखिलरोगाः आदि अत्र पूर्ववत्सर्वस
र्वमनुवर्त्तते आत्मकारकाश्रितत्रिंशांशेपदद्वितीये गुरुस्थानिभ्यां दृष्टे कुलपरंपरयासमागताखिलरोगा भवंति कुलपरंपरा
रोगाभावे तत्सेवासाध्यरोगाभूयांसो भवंतीत्याह आदीति अथ कारकात्रिंशांशेपदद्वितीये गुरुस्थानि दृष्टे मेषादिषड्राशि ण्यात्मके
सति रोगविशेषमवयवविशेष ललाटादि लक्षणोद्दर्शयितुं मेषादौ कांश्चिदवयवान्नियमयति ललाटमित्यादिभिः षड्सूत्रैः
तद्यथा स्वत्रिंशांशे मेषादौ पदाद्द्वितीये च सति तस्मिन् गुरुस्थानि दृष्टे पूर्वं सत्र ग्रन्थादिपदया ह्रोरोगः कश्चिद्भवतीत्यर्थः अत्र षट्स्वपि
सूत्रेषु तत्र गुरुस्थानि दृष्टे सति इति स्वत्रिंशांशे इति आदीति चानुवर्त्तते तथा चैकवाक्यतया निरूपणीया योजनीये तत्रादौ मेषावय
वं दर्शयति ललाटं प्रथमं मेषादिर्ललाटरूप इत्यर्थः अथ वृषराश्यवयवमाह केशो द्वितीयं वृषः केशात्मकः अथ तृतीयं
कंधरा तृतीयं मिथुनं कंठात्मकं कर्कावयवमाह चतुर्थं नेत्रं कर्कराशिर्नेत्रद्वयात्मकः सिंहावयवमाह जिह्वादौ पंचमं सिंह
राशिः रसनामूलस्वरूपः कन्यावयवः षष्ठो जिह्वाग्रे षड्राशिर्जिह्वाग्रे क अथ फलादेशप्रकारः प्रागेव निरूपितः आत्मकार

पराष्टतीयाष्टमस्थानावलंब्येन मारकस्वरूपं दर्शयति मृत्युरोगाभ्यां राहुचंद्राभ्यां यथास्वं मृत्युः निसृष्टपदाष्टतीयाष्टमा
५१ न्यतरस्थानगाभ्यां राहुचंद्राभ्यां यथास्वं मृत्युः स्वमतिक्रम्य यथास्वं मृत्युः राहुचंद्राभ्यां हतो भवतीत्यर्थः अथ यथास्वमिति
निर्देशात् तृतीयाष्टमयोरन्यतरस्थयोरपि राहुचंद्रयोर्मिलित्वावस्थानं एकत्र राहुरपि च परत्र चंद्र इति रीत्यावस्थानं च न विव
क्षितं किंतु राहुचंद्रयोरन्यतरस्थान्यतरस्थानावस्थानमेवापेक्षितं एवं च राहुधातुकोपादिना चंद्रधातुकोपादिना मर
णं भवतीति भावः अथ यथास्वं मरणयोगभेदानाह दुष्टबलादिना प्रतिबंधः अत्र भावकरादितुरगाष्टवर्गो यदा प
तुर्यस्तरात् दशमनवमयोर्यावादीनयोः प्रथमयोः पदं तत् द्वितीययोर्धनुष्टवर्गे राशिहोराद्रेष्काणनवांशद्वादशांशत्रिं
शांशादिलक्षणो क्वापि राहुशनिभ्यां कुजकेतुभ्यां राहुचंद्राभ्यां वा स्थिताभ्यां यथास्वं मृत्युर्भवति राहुशनियुगलतः कुजके
तुयुगलतः राहुचंद्रयुगलतः राहुचंद्रयुगलतो वा मरणं यथायोगं भवतीति भावः यथ यदा दशमसा श्रित्य ग्रहविशेषयोगेन रो राम
गभेदानाह अथ कुजात्स्फोटकादि कुंडलध्वस्य पदाद्दशमे स्थिता द्वौ माज्ञातकवान्नरो मंगलोचितधातुकोपादिना मृ ५१
त्युर्भवति स्फोटकव्रणशस्त्राघातादिविसर्पकादिभेदेन कुंडलाकाराणि चिह्नानि वर्तुलाकाराणि चिह्नानि विश्रामाश्च भ
वति अथ भौममेवाग्निस्थानविशेषान्मरणभेदमाह रत्नाकरयोगकालदंडान्मरणं रत्नं द्वितीयमस्याकारः षष्ठः

मादन्यतमस्मिन्स्थाने क्रूराश्रये राहुदृष्टे सत्यां निश्चयेन सर्वशूलादिरोगो भवति एतेन राहुदृष्ट्यभावे एवं ज्ञातः शूलरोगः
स्वल्पो व्यथावद्भवति राहुदृष्टे सत्यां प्रबलो याप्यश्च निरूढं भवतीति विरूढं अनिरूढं पदाष्टमादिस्थानाश्रये राहुग्रहशत्रुसे
नामध्यानिवेशारिष्टयोगं दर्शयति राहुशनिभ्यां दुष्टे बलादिः पदाष्टमाद्यन्यतमस्थाने स्थिताभ्यां राहुशनिभ्यां दुष्टशत्रुसे
नादिसंबंधो भयादिक्लेशहेतुर्भवतीत्यर्थः अथ पदाद्द्वितीयस्थाने विशेषमपि कंचिदाह तत्र प्रतिबंधः पदाद्द्वितीयस्थाने स्थि
ताभ्यां राहुशनिभ्यां न केवलं दुष्टसेनादिसंबंधमात्रं अपि तु तत्स्तत्प्रतिबंधनिरोधोपि कियत्कालं भवति पश्चान्मोचनमपि भ
वतीति भावः अथ द्वितीयस्थानाश्रये रोधवशात् शत्रुसेनादितो मुक्तताभावकरं योगं दर्शयति कुजकेतुभ्यां नित्यं च पदात् द्वितीय
स्थिताभ्यां कुजकेतुभ्यां दुष्टसेनादिकृतः प्रतिबंधो नित्यं च भवति मोचनं कदापि न भवतीत्यर्थः अथ पदाद्द्वितीयस्थानि[illegible]:
श्रितः कुजो केतुहतः यः शत्रुसेनादिनिमित्तकः प्रतिबंधस्तत्रापरमपि विशेषमतितुष्टं दर्शयति वापीयोगफलदः पदात् द्वि
तीयस्थानगतकुजकेतुभ्यां यः प्रतिबंधः स वापीयोगफलदः वापीयोगफलं निषिद्धं दर्शयादित्यर्थः यद्यपि वापीफलं शुभम
पि भवति तथापि दुष्टसेनाहतवधे वापीफले दस्पोक्ता वापीफलमिदमपि दुष्टमेवेति निर्णीयते तत्रफले वापीजातो योनरोभा
ग्यहीनो विद्याहीनो बंधुभिस्त्यक्तः कार्यः मूर्खः कामी दंतकेशो र्धिकारोदुर्दारः स्याद्धृत[illegible]षितः कुत्सितश्चेति समाम्नातं अथ

४८

योजनीयं अत्रापि स्वर्वैषम्यं इत्यनुषज्य लग्नद्वितीयेपदद्वादशेष्वात्मकारकादष्टमे शनिना स्थितेनावश्यमेव ज्यायान्स
त्वरं विषभक्षणादेर्दुर्मरणं भवतीति विवेचनीयं राहुकेतुं चाश्रित्य फलमाह राहुकेतुभ्यां विषसर्पजलोद्बंधनादिः लग्न
द्वितीयेपदाद्द्वादशे स्थितेन राहुणा केतुना वा विषसर्पजलोद्बंधनाद्यन्यतमेन दुर्मरणं भवतीत्यर्थः अत्र राहुभ्यामिति समास
पदेन निर्देशो राहुकेत्वोरेकत्रावस्थानबाधात् एकैकमनुसंधेयं अत्रापि स्वर्वैषम्यमित्यनुवर्तते आत्मकारकादष्टमे लग्न
द्वितीये पदाद्द्वादशे स्थितेन राहुकेत्वन्यतरेण विषादितः सत्वरं नियमेन दुर्मरणं भवतीति विवेक्तव्यं अथ शनिराहुसमाश्रित
फलमाह शनिराहुभ्यां राजदंडादेः अत्र विरोधाभावात् प्रत्येकं पूर्वफलकथनात्समुपस्थितयोरेव योगकर्तृत्वं एवं च लग्न
द्वितीयेपदाद्द्वादशे स्थिताभ्यां राहुशनिभ्यां राजदंडादेर्दुर्मरणमित्यर्थः अत्रापि स्वर्वैषम्यमित्यनुवर्त्यात्मकारकादष्टमे च
लग्नद्वितीयेपदद्वादशे स्थितराहुशनितो नियमेन सत्वरं राजदंडादेर्दुर्मरणमिति विवेचनीयं अथ गुरुराहुसमाश्रयेण फ
लमाह तत्र गुरुराहुभ्यामभिचारादेः लग्नद्वितीये पदाद्द्वादशे स्थिताभ्यां राहुगुरुभ्यामभिचारादेर्दुर्मरणमित्यर्थः अत्र
तत्रेति पूर्वत एवाधिकारादनुवर्तते अत्रेत्येवानुवर्ततद्दूति सूचनमिति विवेकः अथोपक्रमोपात्तद्विविधपदावलंबेन मर
णाविशेषे योगभेदं दर्शयति तत्र गुरुशनिभ्यां हृद्रोगे यथास्वं नाशं अत्र तत्रेत्यनुवर्तमाने पुनरपि तत्रेति ग्रहणं पदद्वितीय

राम ४८

लग्नाद्द्वितीयेपदाद्वादशीभूतेरव्यादिग्रहाणां स्थितानां दुष्टफलानि नवभिः श्लोकैर्दर्शयति तत्रेमादिभिः तत्रादौ रव्याश्रयेऽफ
दोषमाह तत्ररविवियोगे रिपुशस्त्राग्निभयं तत्रेत्यधिकारः लेयान्वलेत्यनुवर्तते लग्नाद्द्वितीयेपदाद्वादशे रविवियोगे सति शत्रु
शस्त्रनामग्निकृतं वाभयं अस्तत्तयावापप्ययोगं भवतीत्यर्थः अथचंद्राबलेवेनफलं दर्शयति चंद्रेणकुवेरं लग्नाद्द्वितीये
पदद्वादशीभूतेस्थितेनचंद्रेणकुत्सितंवैरं शारीरं भवतीत्यर्थः अथभौमाबलेवेनफलमाह कुजेनव्रणास्फोटादिः लग्न
द्वितीयेपदद्वादशीभूते भौमेसति व्रणास्फोटादिरोगोभवतीत्यर्थः अथबुधाश्रयेणफलमाह बुधेनवृक्षपर्वतादेः लग्न
द्वितीयेपदद्वादशीभूतेस्थितेनबुधेनवृक्षपर्वतादेर्मरणं भवतीत्यनुषंगेनयोजनीयं अथगुरुमाश्रित्यफलमाह
गुरुणास्वैवैषम्येरौद्रात्पापकात् लग्नद्वितीयेपदद्वादशीभूतेआत्मकारकादष्टमस्थानात्मकेस्थितेनगुरुणारौ
द्रात्पापात्पापकाद्दुर्मरणं भवतीत्यर्थः अथशुक्राश्रयेणफलमाह शुक्रेणशुक्लमेहात् लग्नद्वितीयेपदद्वादशे
स्थितेनशुक्रेणशुक्लमेहरोगेणदुर्मरणमित्यर्थः अत्रपूर्वस्मात्स्ववैषम्यमित्यनुवर्तनात् लग्नद्वितीयेपदद्वादशेआ
त्मकारकाष्टमेनशुक्रेणशुक्लमेहेनयाप्येनावश्यं सत्वरं दुर्मरणंभवतीतियोजनीयं (अथशनिमाश्रित्यफलमाह) अथश
निमाश्रित्यफलमाह शनिनाविषभक्षणादेः पदद्वादशेलग्नद्वितीयेस्थितेनशनिनाविषभक्षणादेर्दुर्मरणंभवतीति

८५

र्थः अथ द्वितीये ध्याये कर्मणा पापयुतदृष्टेः मरणनिमित्तान्यादिष्टानि तत्रानेकानि निमित्तानि योगभेदेन दर्शयति अ
त्र गुरुयुक्तादिनिभिः तत्रादौ निरूक्तपदावलंबेन योगविशेषात्ममरणनिमित्तमाह तत्र गुरुक्ते पापदृग्योगे पापारामर
णं द्विविधादपि पदाष्टमे गुरुयुक्ते पापदृष्टे पापयोगे वा पापाणामरणं भवतीत्यर्थः द्विविधादपि पदोपपदात्पुनरपि मर
णनिमित्तविशेषसूचकं योगभेदमाह अत्र केतुयुते दोषेणाह नवं पदाष्टमादष्टमे यदा तत्तीराश्यात्मके केतौ दोषेणास्वग
तापराधेन हेतुभूते न हिंसनं परेणाहतं मरणं वसाधि भवतीत्यर्थः अथ दोषहननेऽस्य योगांतरं दर्शयति केतोः पापदृ
ष्टेर्वा लग्नसप्तममन्मनपदे पापग्रहदृष्टे सत्यां दोषेण परावलंबरोन परहननहिंसनं भवतीत्यर्थः अथ द्वितीये प्राये
णायुष्मरणयोगः कर्मणीत्यादिना समाप्तस्तत्रानाम्नानो वदुष्ठमरणयोगविशेषान्कांश्चिद्दर्शयति अत्र मुभयोगे
मलिना भावे आंतिराशौ कर्मणि तु ष्टं मरणं निरूक्तपदतोष्टमे नवमे सप्तमे एकादशानीष्टमे पदात्मघराश्यात्मके द्वि
तीये तृतीये वा पापदृग्ग्रहदृष्टे सत्यां दुष्टं मरणं भवतीत्यर्थः अथ पदाष्टमादिस्थानाश्रये शूलादिरोगमाह क्रूराश्र
ये सर्वं शूलादिः पदतोष्टमे नवमे सप्तमे एकादशाष्टमाद्द्वितीये तृतीये वा क्रूराश्रये सर्वे शूलादयो हृदुदरकुक्षिशीर्षादि
शूलपूर्वकरोगसामान्यं भवतीत्यर्थः अस्मिन्नेव योगे रोगाभिमरणयोगमाह राहुदृष्टे निश्चयेन एतस्मिन्पदादष्ट

राम ८५

र्थः अथ द्वितीये ध्याये कर्मणि पापग्रुतदृष्टे मरणानिमित्ता यादिदृष्टा नितन्त्रा नी स्माता निनिमित्तानि योगभेदेन दर्शयति अ
४५ त्र गुरुयुक्ताद्रुतिभिः तत्रादौ निरूपदावलोकेन योगविशेषायतं मरणनिमित्तान्याह तत्र ग्रुक्तो पापदृष्टयोगे पाषाणाग्नम
णं द्विविधादपिपदात्समे गुरु युक्ते पापदृष्टे पापयोगे वा पाषाणामरणं भवतीत्यर्थः द्विविधादपि पदोपपदात्पुनरपि मर
णानिमित्तविशेषसूचकं योगभेदमाह अत्र केतुयुक्ते दोषेणाह तनं पदात्समादष्टमे यदा तीराश्यात्मके केतौ दोषेणाग्न
तापराधेन हेतुभूतेन हिंसनं परेणाहतं मरणं वसाधिभवतीत्यर्थः अथ दोषहननेनेएव योगान्तरं दर्शयति केतोः पापदृ
ष्टेवा लग्नसप्तमस्थान्तरपदे पापग्रहदृष्टे सत्यां दोषेण पराबलेनारोन परहननहिंसनं भवतीत्यर्थः अथ द्वितीये ध्याये
राहुदृष्टमरणयोगः कर्मणीत्यादिना समाप्तानन्तत्रानाम्नानो वहुधमरणयोगविशेषान्कां श्चिद्दर्शयति अत्र शुभयोगे
मलिनाभावे कांतिराशौ कर्मणि तु दृष्टं मरणं निरूपदतोष्टमेन वमे सप्तमे एकादशानां ष्टमे पदात्प्रथराग्न्यात्मके द्वि राम
तीयेतृतीयेवा पापग्रहे ग्रहदृष्टे सत्यां दुष्टं मरणं भवतीत्यर्थः अथ पदाष्टमादिस्थानात्प्रथमे शूलादिरोगमाह क्रूराग्न ४५
येसर्वं शूलादिः पदतोष्टमेनवमे सप्तमे एकादशाष्टमाद्द्वितीयेतृतीयेवा क्रूराग्नयेसर्वशूलादयो हृदरकुक्षिशीर्षादि
शूलपूर्वकरोगसामान्यं भवतीत्यर्थः अस्मिन्नेवयोगे रोगाभिग्रमरणयोगमाह राहुदृष्टे निम्नयेन एतस्मिन्पदादष्ट

र्भवति अथपुनरपितत्रैवद्व्यष्टिप्रकारयोगभेदेनदर्शयति तत्रकर्म्मादि यथापदमादितः हत्वातदष्टमाष्टमस्थितयोर्भै
मात्मकारकयोर्मेकादशाष्टभिर्दृष्टिः तथापदयोरुभयोर्द्वितीयतत्नीयराश्योरन्यतरमादितः हत्वा तदष्टमस्थिताभ्यामा
त्मकारकमंगलाभ्यांएकाष्टदृष्टिर्जैयेमर्थः अथद्वितीयेष्वायेस्थिरदशायांयथारुंवड्डनिधनं तत्रर्क्षविशेषद्वृत्तुपक्रेमपा
पमध्येतदीशयोर्हिंसादिनानिधनतत्रापिनिर्णीतिः तत्रैवात्मकारकमंगलस्थितिविशेषेणनिर्याणराशिमपरंदर्शयति चर
चरयोर्विपरीतकाले लग्नसप्तमपदान्मतस्मद्विह्नोर्दशायोःस्थिताभ्यांमात्मकारकमंगलाभ्यांविपरीतस्यपदंहत्वान्यतरदष्ट
मराश्योःकालेप्रथमाद्यन्यतमोच्चितरुंवड्डस्यप्रहतौस्थिरदशारित्यादशामसमयेनिधनमित्यर्थः अत्रनिधनमितिपदस्य
त्रस्यस्थिरदशायामितिसूत्रेशेषत्वेनतत्सूत्रादागतमितिविवेचनीयं अथस्थिरदशायांयथारुंवडुनिधनं तत्रर्क्षविशेषः
इतिसमुपात्तराशिविशेषोनिधननिमित्तभूतः पापमध्येपापकोणेयोःपरपापेवातदीशयोःक्षीणेंदुभ्युक्तोदृष्टाविति सूत्रा
भ्यां पापमध्यवर्तिराशेःपापाक्रांतत्रिकोणराशयोःपापाक्रांतयोःक्षीणेंदुभुक्तदृष्टस्वामिनोर्वीद्वादशाष्टमराश्योःदशायांनि
धनमितिकथितं संप्रतितत्रैवविशेषेनिधनायराशिविशेषतदीशयोरितिसूत्रावलंवेनदर्शयति ततोर्कसपत्नीदृष्टा
पदमथेपदत्नीये पदेर्वाद्विविधेदृष्टाकेवलक्षीणेंदुभुक्तयोर्दृष्टेदुष्टवतीयपददशायांयथारुंवडुमितुक्तंनिधनंभवतीय

११

दीर्घप्रथमद्वितीययोरंतययोर्वा मध्यं मध्ययोराद्यंतयोर्वा हीनं एवं मंदचंद्राभ्यां पितृकालतश्च पित्रात्मभागे चंद्रे चंद्रमंद
भ्यामिति दीर्घमध्याल्पलक्षणानामायुरानीतं एवमानीतायुर्योगभेदस्यापवादोपि ह्रासवृद्धिलक्षणस्तत्राम्नातः शनौ योगहे
तौ कक्ष्याह्रासः विपरीतामित्यनेन न स्वर्क्षतुंगकेवपापदृग्योगिनी चेति शन्यबलेन कक्ष्यावृद्धिह्रासौ निरूपितौ एवं त
त्रैव पितृलाभगे गुरौ केवलभद्रापोगिनि च कक्ष्यावृद्धिरिति बृहस्पतेर्बलेन निरूप्यायुर्योगापवादतया कक्ष्यावृद्धिः
पठिता एवं पुनरस्यायुर्योगः पठितः पितृलाभरोगेषु प्राणिनि कंटकादिस्थितश्चै यत्रिधेति त्रिविधमप्यायुरतंतदपवादो
पि पठितः योगात्समे स्वांशेमि विपरीतं अथ पुनस्तत्रैव मध्यायुर्योगापवादाः साधारणेन पठितः पितृलाभयोः पापमध्य
त्वे कोणपापयोगे वा कक्ष्याह्रासः स्वामिन्यप्येवं तस्मिन्नपि जीवे तुंगे शुभसंयुक्ते चेति एवं तत्रैव कक्ष्याह्रासापवाद प्र
संगेन कक्ष्यावृद्धिरपि परिगृहीता अमंदमध्या गुरौ चेति अत्र सर्वत्रापि आत्मकारकमेगत्तयोर्द्वितीयतृतीये कायश
योर्द्वितीयाध्यायोपात्तदीर्घमध्याल्पायुर्योगानां येपवादा नानाविधाः ह्रासवृद्धिलक्षणाः पठितास्ते न भवंति प्रथमं यो
गाये निर्दिष्टास्त एव तथाभूता इति भावः अथ द्वितीयाध्यायोक्ताः कक्ष्याह्रासादिस्थलेष्वयः सर्वत्र कांश्चिद्वृद्धियोग राम
भेदेन तद्दर्शयति दिनदिनेः पुराणं लग्नसप्तमपदयोर्योवृषमोराशीनतो वृषराशौ मंदाराभ्यां पुराण एकादशावृद्धि ५

सद्योरिष्टं भवति यद्वा केवलयोः ग्रहशून्ययोः लग्नतदष्टमयोः षष्ठेशाभ्यां रिपुरोगादिस्थाने शुभाभ्यां हेतुस्सद्यो
रिष्टं भवति अथारिष्टं तद्दशामाह तत्रापि विशिन्नाथापकारे निरूक्रूराश्रयराशिदशायामपि महत्यां चिन्नाथस्य ष
ष्ठेशस्यांतर्दशायामरिष्टं भवतीत्यर्थः इत्युपदेशसूत्रे जैमिनीये तत्तीयाध्याये द्वितीयपादविवृतिः ॥ ॥ अथ द्वितीया
ध्यायोपात्तायुर्योगाद्वीनामस्तु भेदादिनिरोपायपलक्षणानुगमयोः पदमधिकारोयं लेयलाभयोः पदं लग्नसप्तम
योरिदं यत्पदं यावद्दीशाश्रयं पदमक्षाराणामिमेवं लक्षणामिमधिहृतमिहेति वेदितव्यं अथ द्वितीयाध्यायेन्यनाविष
योगभेदे आयुर्निर्णीतं तदपवादाश्च बहवो निरूपिताः संप्रति द्वितीयाध्यायोपात्तायुर्योगापवादानां प्रतिप्रसवं कं
चनदर्शयति पदभावयोश्चेकं मिति [illegible] पापैमजाभ्यां यथानुबंधः अत्रपदपरमधिकाराः लग्नसप्तमपद
परं द्वयोरपि पक्षयोरिहपदपदेन संग्रहः एवंच लग्नपदाष्टमयोर्वा सप्तमपदाष्टमराशौ येलिनि क्षिप्रति एवंच द्वि
विधपदाष्टमराशयोः द्वितीये तत्तीये एकादशे वा राशौ आत्मकारकमंगलाभ्यां स्थिताभ्यां द्वितीयाध्यायाम्नातयोग
भेदैरागतदीर्घमध्याल्पलक्षणं आयुः यथाप्रतिज्ञमेव भवति नान्यथा एवंच द्वितीयाध्यायोक्तापेऽपवादाः कस्मा
त्सहस्राद्विलक्षणास्तेन भवंतीत्यर्थः अत्र द्वितीयाध्याये आयुःपित्रादिनेशाभ्यामित्युपक्रम्य प्रथमयो रुद्रयोर्वा

नि महेश्वरब्रह्मलग्नेशयोस्तयोः स्वस्ववांशादष्टमायां निधनं अत्र निरूढं सुयोगे सुप्रतिमहेश्वरब्रह्मादिग्रहो चांशः कार्यः
४२ तत्र महेश्वरस्य ब्रह्मराशिपर्यंतं सर्वराशीनां चरनवांशाष्टाभाग्न ब्रह्माश्रितराशिसंगतचरनवांशाष्टायां निधनं भवती
दिशो दितिभावः अथ ब्रह्म महेश्वराश्रितराशितः षष्ठस्थानेशात् यतो दुरिष्टयोगमाह चित्रनाथाभ्यां रिपुरोगाचित्रक
र्मोशा क्रूरग्रहे स्तु सद्योरिष्टं महेश्वरब्रह्म षष्ठाधिपत्यात् द्वादशाष्टम षष्ठ तृतीयेषु क्रूरग्रहसत्वे सद्योरिष्टं भवति द्वि
तीयेस्व कर्मस्थानादिनामारकादिनिरूपणं कृतं तत्रानुक्तो यद्ग्रहस्थितिः इति विवेकः अथ पुनरपि महेश्वरब्रह्मग्रहचित्र
नाथा बलं वेनाष्टयोगमाह शनिराहुचंद्रयोगेषु सद्योरिष्टं महेश्वर ब्रह्मराशितः षष्ठेयो राशीनदधिपत्यात् पंचमदश
मद्वितीयसप्तमेषु क्रूरग्रहेषु सत्सु सद्योरिष्टमित्यर्थः अथ प्रकारांतरेणाप्यरिष्टयोगं दर्शयति कोणाश्रयेषु सद्योरिष्टम्
महेश्वरब्रह्मचित्रनाथायेतत्संख्यमेतन्नवमेच क्रूरग्रहसत्वे सद्योरिष्टं भवतीत्यर्थः अथारिष्टयोगांतरमाह सर्वमेवं
पापग्रहेषु च महेश्वरब्रह्मचित्रनाथाभ्यां रिपुरोगचित्रकर्मसु शनिराहुचंद्रयोगेषु कोणाश्रयेषु वा पापराशिषु सत्स्व राम
पि क्रूरग्रहे व देव सद्योरिष्टयोगो भवतीत्यर्थः अथ प्रकारांतरेणारिष्टयोगमाह केवलारिपुरोगचित्रनाथाभ्यां के ४८
वलग्रहाशो द्वादशाष्टमे लयोः षष्ठे स्थाभ्यां रिपुरोगचित्रकर्मस्थितानिराहुचंद्रयोगेषु कोणाश्रयेषु च क्रूरेषु सत्सु

अथाष्टमराश्यंतर्दशायां निधनं भवतीत्यर्थः अथ लग्नात् द्वितीयराशिदशायां शनियोगे न निरूढमरणस्यापवाद
मित्रे शुभयोगान्न लग्ने शुभयोगान्निरूढं मरणं न भवतीत्यर्थः अथ द्वारबाह्यराशिमात्रस्यापवादे मरणेराश्यंतरं द
र्शयति लग्ने रोगभावे स्वलाभयोर्भावयोः क्रूरे रुद्राश्रयेपि लग्नस्य चंद्रस्य वाष्टमे क्रूरग्रहे सति आत्मकारकग्रहात् ल
ग्नसन्नमराशेरष्टमयोरुभयोरपि क्रूरग्रहे सति रुद्रग्रहाश्रितराशिदशायां निधनं भवतीत्यर्थः अथ यथा शनियोगा
दापवादास्तत्र शुभग्रहादिकृताः स्थितास्तथा कराश्रयमरणप्रदयोगे अपवादा न संतीत्याह न वापवादाः रुद्राश्रयम
रणप्रदे योगे नैवापवादा इत्यर्थः यद्वा द्वितीयाध्याये जैकेचनापवादा इत्युक्ताः ततः परमपवादाः अन्ये शिष्टा न संतीत्य
र्थः अथ वायव्रजनेशाभ्यामिति गुरुकेंद्रे इति तत्रयानेति चरइति स्वपितृचंद्राइति शुभदानि सौरेति द्वादशाइति मि
श्रइति चेहनापवादादि द्वितीयाध्याये तदध्यायस्थापवादरूपेन निबद्धा इत्यर्थः अथ प्रकारांतरेण मरणराशिनिर्णयपूर्व
कमाह इह शुक्राभ्यां रोगयोः श्रामायणान्निधनं रविशुक्राष्टमराशयोर्मध्ये यत्र मरणयोगवाहुल्यं तद्दशायां मरण
मित्यर्थः अष्टौ त्र्यष्टे क्रूरस्वैः राश्रितत्व शुभग्रहाश्रितत्वादिकं मरणदायकं तदाहुल्यं यथा योगमिह विवेकम् अथ द्वि
तीये ब्रह्मणो यावत्स्वेश्वरर्क्षदशां तत्मायुरित्युक्तं संप्रति निरूढे योगेषु उपमहेश्वरादि ब्रह्मणो तमायुरिति मत्यं दर्शी

५१ गेशात्तुंगे नवांशस्य द्विरिसेवं लक्षणः तस्य सकलस्येहापवादो भवतीतियावत् अथ यद्वारवाह्यराशिमालिन्या
दिकृतनिधनापवादभूतमशुभकफलयोगस्य योगमपवादः सोस्तीति प्रकृतस्तत्रावगतः तस्यापवादं दर्शयति द्वारे
चंद्रदृग्योगान्न द्वारराशेः चंद्रदृष्टो चंद्रयोगे सति वाह्यद्वारादिशुभफलापवादो नेत्यर्थः अथवा दातुरमाह केव
लशुभसंबंधे वाह्येव वाह्यराशौ शुभमात्रस्य शुभरहितस्य च संबंधे वसति शुभफलापवादस्यापवाद इत्यर्थः संबं
धे सत्यपवादो नास्त्येव तथाच्यापवादे द्वितीयाध्यायोक्तशुभफलसिद्धिरितिभावः अथ द्वारवाह्यशुभापवादस्यापवादां
तरमाह लेयरोगक्रूरग्रयेपि लग्नाष्टमे क्रूरग्रहे सत्यपि द्वारवाह्यराशिशुभफलापवादः सौरदृष्टियोगाभ्यामिति
सूत्रशापितो नेत्यर्थः यद्वा द्वारवाह्यराशिशुभफलस्य द्वितीयाध्यायोक्तस्य सौरस्तत्रैवदपवादमाह लेयलग्नाष्टमे
क्रूरग्रहे सति द्वादशराश्यादिशुभस्यापवादो भवतीत्यर्थः अथ यद्वारवाह्यराशिमालिन्यहेतुमरणापवादं तत्र किंरा
शिदशायामध्ये मरणमित्याकांक्षायामाह रोगत्रिकोणदशाद्दशाहे तेगनवांशदशायां निधनं अग्नाद्यष्टमततः पंचमत राम ५१
नवमराशिदशायामष्टमराशिनवांशांतर्दशायां निधनं भवतीत्यर्थः अथवा ह्यराशिमालिन्यापवादविषये निर्ण्या
रोपाठांतरं दर्शयति तत्रापि शनियोगे लग्नाष्टमराशित्रिकोणे शनियोगे सति लग्नाद्द्वितीयराशिदशायां अ

वेशयोरैक्ये योगे वा स्वपितृचंद्रेष्वात्मकारके लग्नयोर्द्वेष्कंवद्वयोस्तनो द्वादशाष्टमयोश्च यथा योगं योगघटकी साश्चु
भदृष्टौ शुभयोगे च सत्यपि न कक्षाह्रासः स निहतो भवति एवं च यत्र लग्नाष्टमसप्तमाष्टमेशयोरैक्ययोगे वा न दृष्टिः अपि ता
यं कक्ष्याह्रासो भवतीत्यर्थः अथ यथा च कक्ष्याह्रासस्यापवादे तदपवादस्य शुभदृग्योगादिवाक्ये च निरूपणरीत्या संख्यातेऽसति
याद्याद्याद्योऽपपक्षौ विशदयति अत्रापसंवादात्प्रामाण्यं अत्र कक्ष्याह्रासेषु तदपवादेषु च यत्र यत्र वाक्येषु अस्ये ना
पि प्रकारेण तत्रैव ह्रासे वा तदपवादे वा प्रामाण्यं भवति यस्मिन्पक्षे बहुनां सद्वाक्यानां द्योतनात्मकः पक्ष इति भावः एवं च ह्रा
साधिक्ये ह्रास एव स्वीकार्यः अपवादाधिक्ये ह्रासो न स्वीकार्य इति सिद्धं अथ मालिने द्वारबाह्ये नवांशे निधनं
द्वादशयोश्च मालिन्य इति निधनराशिनिर्णयः शुभदृग्योगान्न रोगेशोत्तुंगे नवांशाहद्रिरिति द्वितीयाध्याये द्वारबाह्य
नवांशादिनिधनापवादपठितस्यापवादं वक्तुं अधिकारपरं सूत्रं प्रवर्तयति रोगतुंगयोः प्रारी अधिकारपरो लग्ना
त् द्वादशाष्टमयोर्वली अग्रस्तादिति न्यायेन सता वदिरुधिकृत इत्यर्थः अथ द्वारबाह्यादिमालिन्यप्रयुक्तनवांश
निधनापवादस्य शुभदृग्योगादिलक्षणस्यापवादं द्वारबाह्यनवांशादिनिधनपर्यवसन्नं दर्शयति सोऽरदृष्टियो
गाभ्यां द्वारबाह्ययोरपवादः लग्नात् द्वादशाष्टमयोः शाशि निशनि दृष्टौ वानियोगे सति द्वितीयेऽध्याये निरूक्त
समालिने नवांशे द्वारबाह्ये निधनं द्वारद्वारेशयोश्च मालिन्ये इति निधनस्यापवादेषु शुभदृग्योगान्न रो

वा हीनत्वमिति द्वितीयपठितो हीनायुः कल्पो यौतयोर्मध्येमध्ययोरिति कल्पः प्रकृते मध्यायुषि स्थिरे मध्यमिति पठितः
१५. आद्यंतयोर्वा दीर्घमिति कल्पस्तु अनेनाप्यल्पायुष्येवं द्वयोराद्यमिति पठितं तथा च प्रथमयोरित्युपात्तमाद्यंतयोरिति कल्पि
तचकक्ष्येष्वाविहृतमेवामापितु कोष्ठे अल्पस्थानि भवंति एवं च द्वितीयाध्यायोक्तव्यवस्थापवादभूतास्वचकक्ष्यासिद्धेति वेदित
व्यं अथ द्वितीयाध्यायप्रथमपादे शनियोगहेतोः कक्ष्याह्रासः पितृलाभयोः पापमध्यत्व कारापार्श्वयोगे वा कक्ष्याह्रासः स्व
स्मिन्नपि वं तस्मिन्नपि नीचे ३ तुंगे ३ शुभसंयुक्ते च गुरौ चेत्यादिना कक्ष्याह्रासो निरूपितः एवं च तेषु कक्ष्याह्रासनिमित्तभूतेषु
योगेषु ह्रासहेतुभूतयोगांतरं सूत्रयन्नाधिकरोति । स्वपितृचंद्राः आत्मकारकः लग्नचंद्रः पिते ३ ग्रे ३ षि शनिनावोदितव्यावृत्त
र्थः अथ कक्ष्याह्रासयोगौ द्वाभ्यां सूत्राभ्यां दर्शयति तत्र शनिदृष्टौ कक्ष्याह्रासः रिपुमध्यवर्ग्योऽप्य द्वितीयाध्यायप्रथमपा
दपठिते आयुर्योगे चैतत् पादपठितायुर्योगेषु च आत्मकारकलग्नचंद्रेषु त्रिष्वपि शनिदृष्टेषु सत्सु कक्ष्याह्रासो भवतीत्यर्थः
अथात्र स्वपितृचंद्रेषु त्रिष्वपि शनिदृष्टेषु त्रिभ्योपि द्वादशाष्टमयोः शनिदृष्टौ च कक्ष्याह्रासो निरूपितः संप्रति द्वयोः शनि रा.
दृष्टौ द्वाभ्यां परयोः द्वादशाष्टमयोर्वा शनिदृष्टौ कक्ष्याह्रासं प्रतिमृगयाहि क्रियां दर्शयति अथ यत्र चरममध्ययोरंत्य ५८
मध्ययोर्वा आत्मकारकलग्नयोर्लग्नचंद्रयोर्वा शनिदृष्टौ तद्विकल्पद्वयाद्द्वादशाष्टमयोर्वा शनिदृष्टौ सत्यां कक्ष्याह्रासः
त्यर्थः अत्र स्वपितृचंद्राद्वित्यादिनोक्तेकक्ष्याह्रासपक्षे अपवादात् द्वाभ्यां सूत्राभ्यां दर्शयति शुभदृग्योगान्न पितृलाभमा १५.

वा हीनत्वमिति द्वितीयपठितो हीनायुः कक्ष्यौ यौ तयोर्मध्ये मध्ययोरिति कल्प्यः प्रकृते मध्यायुषि स्थिरे मध्यमिति पठितः
आद्यंतयोर्वा स्थितिमिति कल्पसु अनेनाल्पस्यायुष्येव द्वंद्वद्वराभ्यामिति पठितं तथा च प्रथमयोरित्युपात्तमाद्यंतयोरिति कल्पि
तं च तद्द्वयेप्याविरुद्धमेवाम्नापितु कोष्ठे अतस्त्वानि भवंति एवं च द्वितीयाध्यायोक्तत्वकापवादतास्य च कक्ष्यसिद्धेति वेदित
व्यं अथ द्वितीयाध्यायप्रथमपादे शनियोगहेतोः कक्ष्याह्रासः पितृलाभयोः पापमध्यत्वकारणपार्श्वयोगे वा कक्ष्याह्रासः स्व
स्मिन्नप्येवं तस्मिन्नापनीचे ऽतुंगे ऽशुभसंयुक्ते च गुरौ चेत्यादिना कक्ष्याह्रासो निरूपितः एवं च तेषु कक्ष्याह्रासनिमित्तभूतेषु
योगेषु ह्रासहेतुभूतयोगांतरं स्पष्टयन्नाधिकरोति स्वपितृचंद्राः आत्मकारकः लग्नचंद्रस्तेपेते ऽथ ऽधिकृतावेदितव्या द्रष्ट
व्यः अथ कक्ष्याह्रासयोगौ द्वाभ्यां सूत्राभ्यां दर्शयति तत्र शनिदृष्टौ कक्ष्याह्रासः रिपुषष्ठयोश्च द्वितीयाध्यायप्रथमपा
दपठिते आयुर्योगे चेतत् पादपठितायुर्योगेषु च आत्मकारकलग्नचंद्रेषु त्रिष्वपि शनिदृष्टेषु सत्सु कक्ष्याह्रासो भवतीत्यर्थः
अथात्र स्वपितृचंद्रेषु त्रिष्वपि शनिदृष्टौ त्रिष्वपि द्वादशषष्ठयोः शनिदृष्टौ च कक्ष्याह्रासो निरूपितः संप्रति द्वयोः शनि
दृष्टौ द्वाभ्यां पत्योः द्वादशषष्ठयोर्वा शनिदृष्टौ कक्ष्याह्रास इति भंग्या हि क्रियादर्शयति अथ प्रथममध्ययोरंत्य
मध्ययोर्वा आत्मकारकलग्नयोर्लग्नचंद्रयोर्वा शनिदृष्टौ तद्विकल्पद्वयाद्द्वादशषष्ठयोर्वा शनिदृष्टौ समः कक्ष्याह्रास इ
त्यर्थः अत्र स्वपितृचंद्राद्युत्पादिनोक्ते कक्ष्याह्रासपक्षे ऽपवादात् द्वाभ्यां सूत्राभ्यां दर्शयति शुभदृग्योगान्न पितृलाभमा

मस्थानावलंबेन यज्ञजनेशयोरन्यतरस्योभयोरपि वात्मकारकतायां सत्यां द्वितीयाध्याये प्रथमचरस्थे आयुःपितृदिनेशा
भ्यामित्युपक्रमप्रथमयोरुत्तरयोर्वा दीर्घः प्रथमद्वितीययोरन्त्यतयोर्वा मध्यं मध्ययोराद्यंतयोर्वा हीनमिति निरूपके चरस्थिर
द्विःस्वभावराशियुतेष्वायुर्योगेषु तदपवादतया कांश्चिद्विशेषानिदर्शयति यद्भिः सूत्रैः चरे प्रथमं स्थिरे मध्ये द्वंद्वेंऽत्यमाः
एवं चरस्थिराभ्यां स्थिरद्वंद्वाभ्यां द्वंद्वचराभ्यां चरे इति यज्ञजनेशाश्रिते ऋक्षे यदि चरे भवतः तर्हि प्रथमयोरिति सूत्रेण
प्रथममायुः प्राप्तं दीर्घायुर्भवति स्थिरे इति यज्ञजनेशाश्रिते ऋक्षे यदि स्थिरे भवतः तर्हि मध्ये मध्यस्थानपठितं मध्यायुर्भवति
द्वंद्वे इति एवं यज्ञजनेशाश्रिते ऋक्षे यदि द्वंद्वे भवतः तर्हि अंत्ये तृतीयस्थानपठितमल्पायुर्भवति तथा यज्ञजनेशाभ्यामा
श्रिताभ्यां स्थिरद्वंद्वाभ्यां मध्यमायुर्भवति एवं यज्ञजनेशाभ्यां ताभ्यामाश्रिताभ्यां द्वंद्वचरराशिभ्यां स्वल्पमायुरिति विभज
नीयं प्रथमयोरुत्तरयोर्वा दीर्घः प्रथमद्वितीययोरन्त्यतयोर्वा मध्यः मध्यमयोराद्यंतयोर्वा हीनमित्यपवादात् चक्रविन्य

प्र		ना	ड्र	को	ष्ठ
दी १	म १	अ २	दी २	म २	अ २ २
दी ३	म ३	अ ३	दी ३	म ३	अ ३ ३

नाप्रकारः तत्रप्रथमयोरितिचक्रमप्येकमेव कोष्ठसमानं उत्तरयोर्वा दीर्घमिति दीर्घायुर्मकरः द्विती
याध्यायोक्तमित्यमध्यायुषि स्थिरद्वंद्वाभ्यामिति पठितं प्रथमद्वितीययोरन्त्यतयोर्वा मध्यमिति मध्या
युःकरो योगस्तस्यो द्वितीयाध्यायपठितो तत्र प्रथमद्वितीययोरितिपक्षः प्रवृत्तेरपं चरस्थिराभ्या
मिति दीर्घायुःपठितः उत्तरयोर्वेतिकल्पस्तु अल्पायुषि प्रसक्ते द्वंद्वे चेतामित्युक्तमध्ययोराद्यंतयो

३५

रत्वेन तत्रभानाविमआम्नातेपि राहोर्द्वितीयमिति राहुकल्पमेकग्रहाति ननु स्वपक्षमिति यावत् एवमुक्ते द्वेवस्थाने द्वेकत्र
शनिकेत्वोः संभूयावस्थाने सति नात्र शनिः समुचितः प्रथमः कल्पः किंतु समुचितोत्र एव कल्पो भवति एवंचाल्पायुः पितृका
लतश्चेति कथिते सति सपक्षस्थ भवतीति सिद्धं केवलेति पातयो राहुकेत्वोः संभूयैकत्रावस्थान बाधादन्यतरस्य त्वस्य च राहोर्द्विती
यं केतोस्तृतीयं केताविति पक्षाभ्यामाक्रांतत्वात् पातयोरित्येतावन्निर्देशोपि धानिराहोः नथानिवारणाय केवलपदे प्रयोजन
नाभावात् ग्रहांतराणां च धानिराहुकेतुषु विपरीतानां निग्रहत्रयेस्यैव प्रस्तावेन प्रसक्त्याभावात् केवलपदं प्रथमान्तं केव
लग्रहपरं तथा च राशिमात्रदशालग्नं पश्यन्नेवरस्तु केवलः दशारंभे हेतुभूतलग्नात्मकारकराशिमात्रं पश्यन् दृग्गतांशाल
ग्नं पश्यन् विद्यमानो ग्रहः केवलेनामेति वलक्षणाविशिष्टकेवलग्रहस्य राहुकेत्वन्यतरस्य च संभूय निरुक्तस्थाने षुए
कत्र सत्वेप्यादिः प्रथमं दीर्घायुः आयुः पितृदिनेशाभ्यामिति पक्षस्थपरित्याग सत्वेन सिद्धं भवति अथ तत्र सानो प्रथममि
त्यादिभिः षड्भिः प्रकारैः द्वेधा निरूपितैः समागतेषु दीर्घमध्याल्पायुष्षु क्रमेण तत्तृतीयमध्यमप्रथमखंडेषु यथायोगं निध
नराशिं दर्शयति नद्दष्टदशायां निधनं दीर्घायुरादियोगत्रियामकं धान्याद्याश्रितराशिदशायां निधनं भवतीत्यर्थः
अथ सामान्याकारेण राशिदशायां निधनाश्रयत्वे सिद्धे यां यं तद्दशाराशिं दर्शयति नत्रिकोणेषु शन्यादियोगकर्तृग्र
हाश्रितराशितः पंचमतन्नवमयोः पीनाम्रह्रलक्षणाख्यं तद्दशासु निधनं भवतीत्यर्थः अथ लेपलाभयोरिति समुपात्त पश्य

राम ३५

२४

वादात्म्रामारांपविसंवादेपितृकालतः पितृलाभोत्रयचंद्रेवंद्रमंदाभ्यामितियोगेत्रयोपिपरस्परानुरूपत्वेयाह्यः कल्पस्तत्रैवेव
वस्थापितः तस्यामेववस्थायांप्रहृतेर्प्यवस्थांतरमपिपूरयति तत्रेत्यादिभिः सूत्रैः तेषुप्राग्गुपपदस्थानेषुशनौसति प्रथममायुः
पितृदिनेशाभ्यांइतिप्रथमोक्तंयाह्यं तेष्वेवस्थानेषुकेतौसतिपितृकालतश्चेतितृतीयस्थानपठितंयाह्यं राहौसति एवंमं
दचंद्राभ्यामितिद्वितीयस्थानोक्तंयाह्यं तथातेष्वेवस्थानेषुकेतौसतिपितृकालतश्चेतितृतीयस्थानपठितंयाह्यमित्यर्थः अथ
तित्रयानावित्यादिभिःसूत्रैर्निरुक्तस्थानेषुशन्यादीनामेकतमसत्वेत्रिविधायुष्षुदीर्घमध्याल्पलक्षणेषुलग्नेशाष्टमेशयुग्म
लग्नकाललग्नद्वंद्वेषुवान्यतमप्रकारउक्तः संप्रतितेषुस्थानेषुशन्यादीनांत्रयाणामेकत्रावस्थानबाधात् द्वयोर्द्वयोस्त
त्रावस्थानेनप्रथमादियाह्यकल्पात्सर्वतोविपरीतान् सामान्याकारेणदर्शयति शनिराहुकेतुषुविपरीतानि शनिरा
हुकेतुषुपयायथायोगंसंभूयस्थितेषुप्रथमद्वितीयतृतीयकल्पलक्षणानिदीर्घायुरादिरूपाणि आयुःपितृदिनेशा
भ्यामित्यादियोगकर्तृस्वरूपाणिचविपरीतानिभवंति शनिराहुकेतुक्रमेणप्रथमद्वितीयतृतीयकल्पाइतिमवस्था
नोविपरीतानिव्यस्तानि अन्याह्याणिभवंतीत्यर्थः तथाचशनिरित्यादिसूत्रंपक्षांतरपरिग्रहोपयोगिमितिसिद्धः अथाने
वपक्षान्विशिष्यत्रिभिःसूत्रैर्दर्शयति शनिराहुरार्ध्यं शनिकेत्वोरंसे केवलयानयोरादिः इक्तेषुस्थानेषुएकत्रश
निराह्वोः संभूयस्थितयोर्मध्यंभवतिमध्यमायुः एवंमंदचंद्राभ्यामितिक्रमध्यमपक्षस्यभवति अत्रशनिःप्रथमकल्पक

१८ रकाच्छनिर्यातिरिक्तात्मकारकाद्वा अष्टमराशिगे सति तथा नो प्रथमसूत्रोक्तयोगस्य प्रथमाष्टमराशीशत्वात्मकारकत्वाभ्यां
घटके सति निरुक्तायुर्दीर्घकक्ष्यायाः प्रोक्तरीत्या ह्रासो भवतीत्यर्थः ॥ अथ राहुकेतू परिगृह्य तत्कक्ष्याया अपवादं तरमाह लेयता
भयोरित्युक्त प्रथमस्थानाद्वा तदेकादशराशौ वा गुरुराशौ वात्मकारकाभिन्नराशौ वा द्वादशाष्टमयोरन्यतरत्र राहुकेत्वोरन्यतरस्य
सत्वे प्रथमसूत्रोक्तयोगे वा नो प्रथमाष्टमराशीशत्वात्मकारकत्वाभ्यां हेतौ सति पूर्ववदेवागतायुर्दीर्घकक्ष्या ह्रसतीत्यर्थः ॥ अ
थ सूत्रः अथ द्वितीयाध्यायोपरि गृहीतेषु दीर्घमध्याल्पायुःकरयोगेषु नाम विशेषु दीर्घायायु ह्रस्वयोगं नराशि दर्शयति त्रिभिः
सूत्रैः तत्र शनौ प्रथमं राहौ द्वितीयं केतौ तृतीयं लेयराद्विरूपा शिष्टायुः पितृदिनेशाभ्यामित्युक्तः प्रथमराशीति दशरा
शिवृहस्पतिः केन्द्रराश्यात्मकाभिन्नराशिषु तु राशीनां द्वितीयेषु वा समे सति दीर्घमायुर्भवति तेषु राहौ सति मध्यमायुर्भवति ते
ष्वेव केतौ सति प्रयोल्पमायुर्भवतीत्यर्थः ॥ अथ द्वितीयेध्याये प्रथमो नरयोर्वा दीर्घः प्रथमद्वितीययोरंशयोर्वा मध्यं मध्ययो राम
राद्यं तयोर्वा हीनं स्व तश्चैवं त्रिधेति दीर्घमध्याल्पायुषां प्रथमद्वितीयतृतीयसूत्रैः क्रमेणानिर्देशानीस्त्र प्रथमपदं प्रथमस्था १८
न पठितं दीर्घायुर्द्वितीयस्थान पठितं मध्यायुस्तृतीयस्थान पठितं तृतीयस्थान पठितमल्पायुर्बोधयतीति निवेदितम् य
दा द्वितीयस्यौ प्रथमपाद एव आयुः पितृदिशा [illegible]भ्यां एवं चंद्राभ्यां पितृकालतश्चेति त्रिधा योगकर्तारः क्रमेणा वर्णिताः तत्र सं

य

मस्थानेशत्वेसत्यात्मकारकतया योगस्यप्रथमसूत्रोपात्तस्यहेतुभूतेकक्ष्यावृद्धेर्द्वितीयाध्यायोक्तायाअपवादोभवतीतिकक्ष्या
वृद्धिःसानभवतीतियावत् अथनिरुक्तकक्ष्यावृद्धिंद्वितीयाध्यायपाठादौद्वौयोगाभ्यांदर्शयति रिपुरोगयोश्चंद्रे स्वभावगास्यहद्
स्थानेद्वादशाश्यो इत्यतरत्रचंद्रेसतितदानीचपूर्ववत् प्रथमस्थानाधमेशत्वात्मकारकत्वाभ्यांयोगस्यप्रथमसूत्रोक्तस्यकर्त्तरिसतिक
क्ष्यावृद्धेर्नापवादोभवति एवमात्मकारकाच्छनेरष्टमराशिगेचंद्रेसतिप्रथमसूत्रोपात्तयोगस्यप्रथमाष्टमराशीशत्वात्मकारक
त्वाभ्यांहेतौसतिनिरुक्तकक्ष्यावृद्धेर्गुरुदृष्टतायाअन्यदन्यथोपाद्युपात्तायाअपवादोभवतीत्यर्थः अथनिरुक्तकक्ष्यावृद्धेःपुनरप्यप
वादंप्रकारभेदेनाह योगानुगयोःपातयोर्वा आत्मकारकीभूताच्छनेर्बृहस्पतेर्भवतीत्यर्थः यदा द्वितीयाध्यायपरिपठितयोग
वातृतीयगेसत्यपियानवंतशोलार्थः तत्तुल्यंहि चंद्रःकविंकविश्चंद्रंपश्यत्यपितृतीयगो शुक्राच्चंद्रेततःशुक्रेतृतीयेवाहतो राम
र्थवान् शुक्रकुजकेतुषुवैतानिकाः शुक्रादिषुमिथोदृष्टिमत्सुपरस्परंतृतीयस्थेषुवाधितानादिराजचिह्नवंतोभवंति एव १८
भाग्यदात्माभावसप्तमेषुराजानः आत्मकारकाद्भाग्यादिनाद्वितीयचतुर्थपंचमभावतुल्येषुशुभग्रहेषुराजानोभवंति श

वं च तत्तत्कारकवशात्तेषामपि फलम्॥ एवं तस्मात्पुत्रादिकारकेष्वपि राजयोगवत्वे पुत्रादीनामपि राजत्वं वाच्यं कर्मदा
सयोः पापयोश्च आत्मकारकात् तृतीयषष्ठभावसमयोः पापयोश्च राजानो भवंति कारके निरुक्ते योगद्वयं लग्नसप्तमाधिप
तयोरपीति द्रष्टव्यमिति पितृत्वाभाधिपाद्येवं लग्नाधिपात्सप्तमाधिपाद्वेवं द्वितीयचतुर्थपंचमभावसमेषु शुभेषु तृतीयषष्ठ
भावसमयोः पापयोश्च राजानः तुल्यार्थः न चारूढाधिकारात् पितृपदेवारूढोग्राह्य इतिवाच्यं जन्मेति सूत्रात् सूत्रकारेणा क
चित्कारकात् कचिज्जन्मलग्नात् उक्तत्वात् पितृत्वाद्येनास्मिन् ग्रंथे भाष्ये लग्नस्यैव ग्रहणाद्वेति यदि तत्र पापः शुभस्थाने शुभः
पापस्थाने तत्र फलमाह मिश्रे समाः योगद्वये शुभपापमिश्रे रोसमाः राजसमाः इत्यर्थः दारिद्र्यं विपरीते शुभस्थाने पाप
एव पापस्थाने शुभा एव तर्हि दारिद्र्याभवंति मातरि गुरौ शुक्रे चंद्रे वा राजकीयाः लग्नाधिपात्सप्तमाद्वा पंचमे गुर्वादि
ष्वेतमेसति राजकीया राजाधिकारवंतो भवंति कर्मणि दासे वा पापे सेनानायकः लग्नसप्तमाधिपाभ्यां तृतीये षष्ठे
वा पापे सति सेनाधिपतयो भवंति अथ बुद्धियोगमाह स्वपितृभ्यां कर्मदासस्थदृष्ट्या तदीशदृष्ट्या मातृनाथदृष्ट्या च
धीमंतः आत्मकारकात् लग्नाद्वा तृतीयषष्ठगतग्रहदृष्ट्या कारके लग्ने चेत्यर्थः तथा च तृतीयषष्ठेशदृष्ट्या लग्नकारक

योर्धीमंतो भवंति दारेशाद्दृष्ट्या सुखिनः कारकाद्वा चतुर्थाः चतुर्थेशाद्दृष्टा लग्नकारकयोः सुखिनः भवंति रिपुनाथदृष्टा
भयभीताः कारकलग्नाभ्यां द्वादशेशस्य लग्नकारकयोर्दृष्टा भयस्वभावा भवंति स्वामिदृष्टा प्रबलाः लग्ने लग्नेशदृष्टा
कारके कारकाश्रयराशीशदृष्टा बलवंतो भवंति अथाप्ययोगानाह पश्चाद्रिपुभाग्ययोर्ग्रहसाम्ये बंधः कोणयो रिपुजात
योः कीटयुग्मयोर्दारेरिष्फयोश्च चतुर्थदशमयोर्वा ग्रहसाम्ये एकश्चेदेकः द्वौ चेत् द्वौ त्रयश्चेत्त्रयः इतिरीत्या स्वरसाम्ये सति
बंधः कारागृहपतनं भवति अत्र पठितेषु द्विकेषु न समुच्चयनियम इति बोध्यं एवमक्षाणां तदीयानां च शुभसंबंधो निरोध
मात्रं पापसंबंधान्नृशंसखला प्रहारहृदयः अक्षाणां द्विद्वादशादिद्विकानां एवंरीत्या शुभसंबंधे सति द्वितीयद्वादशयोरि
तिपादिद्विकयोरन्यतरत्र योगकारकतया शुभयसंबंधश्चेन्निरोधमात्रं ननु पीडा पापसंबंधात्केवलपापसंबंधाच्च खला
दयो भवंति द्विद्वादशादिषु शुभसंबंधाभावेपि द्विद्वादशेशादिषु शुभसंबंधे सति निरोधमात्रं पापसंबंधे सति स्फुटं खलाद
यो भवंति अथ नेत्रभंगयोगमाह शुक्राद्यौ सापदस्थौ राहुसूर्येदृष्टे नेत्रहा शुक्राल्लग्नाद्यौ सापदस्थः पंचमराश्याह्रू ठ
स्थो राहुः सूर्यदृष्टश्चेन्नेत्रनाशकरः स्यात् स्वदारगयोः शुक्रचंद्रयोः सतोः पंराजचिह्नानि स्वादात्मकारकाच्चतुर्थयोः शुक्र
चंद्रयोः सतोः आनोद्यं वाद्यविशेषो राजचिह्नानि पताकादीनि च स्युः ॥०॥ इति जैमिनिसूत्रव्याख्यायां सुबोधिन्यां प्रथमाध्यायस्य

अथोपपदादिक्रमवत्तेष्वफलमाह उपपदं पदं पित्रनुचरात् लग्नानुचरात्पदं द्वादशराशौ यत्पदं तदुपपदमित्यर्थः ननु पित्रनुचर
पदेन द्वादशस्य बोधः कथमिति चेत् उच्यते पितृलग्नमनुचरं द्वितीयं यस्येति बहुव्रीह्याग्रहणात् यत्तु पित्रनुचरादिति पाठं स्वीकृत्य स्वंडा
त्पन्नसंख्यालाभात् सन्नमात्पदमुपपदमिति यैरुक्तं तदयुक्तं एवं चेद्व्याघातात् उपपदं पदं लाभादिति सूत्रप्रणीतं स्यात् इत्यलं तत्र
फलमाह तत्र पापस्य पापयोगे प्रव्रज्या दारनाशो वा पापस्य तत्र स्वामिके तस्मिन्नुपपदद्वितीये पापयोगे सति प्रव्रज्या संन्यासः
स्त्रीनाशो वा स्यात् यथाकाधिकारप[illegible]दाधिकारयोः स्यादेति पदे न कारके पदे इत्यर्थो भवति तथा तत्रोपपदे इति कुतो नोक्तमिति चे
न्नस्ये तत्रोभयत्राधिकारस्थितः अत्र नाक्तीति तत्र पदे न द्विसंख्यालाभादुपपदद्वितीये इत्युक्तं अनुभवसिद्धत्वाच्चेति तदुक्तं वृद्धैः

उपपदाद्विती यराशौ

आरूढात्सप्तमे पापे चोरः स्यात्कुमवर्जिते आरूढाद्वापि सौम्येषु सर्वदिश्यधिपो भवेत् सर्वज्ञस्तत्र नीचे स्यात्कृ विवादी च भागी
वेद्धृति आरूढादुपपदात् आरूढपदेन चेदारूढं गृह्येत तर्हि पदाधिकारस्वोक्तं स्यान्नत्वत्रेति न चोपपदादिति वक्तव्ये आरू
ढादिति कथमुक्तमिति वाच्यं उपपदस्याप्यारूढत्वादेव नात्र रविः अत्र विषये रविः पापत्वेन न ग्राह्यः तेन सिंहे उपपदद्वितीये मे
षादिपापराशौ रवौ वा सति नेदं फलमित्यर्थः शुभदृग्योगान्न उपपदद्वितीये शुभदृष्टियोगाभ्यां युक्तयोगे सत्यपि नेदं फलं भव
ति नीचे दारनाशः उपपदद्वितीये नीचग्रहे स्वकेनीचग्रहाधिष्ठिते वा सति दारनाशो भवति उच्चे बहुदारः उपपदद्वितीये उ

उच्चांशे उच्चग्रहाधिष्ठिते वा सति बहुदारः स्यात् युग्मे च उपपदद्वितीये मिथुने सति बहुदारः स्यात् दारनाशयोगे विलंबकरयोगमाह
१८ तत्र स्वामियुक्ते स्वक्षेत्रे वा तद्धेतावुत्तरायुषि निर्दारः तत्र उपपदद्वितीये स्वामिनायुक्ते उत्तरायुषि निर्दारः स्यात् तच्छब्देन पूर्वपरामर्शः
तद्धेतौ तस्य उपपदद्वितीयस्य हेतुः स्वा... तस्मिन्स्वक्षेत्रे स्वराशौ सति वा उत्तरायुषि निर्दारः स्यात् राशेः कारणीभूतो ग्रह एव तस्मात्स्वा
मिनः स्वग्रहयोगोऽपेक्षितः ननु स्वाम्यादिभिस्तच्छब्देन दारकारकग्रहणाद्भवयेनेदं कथमुक्तमिति चेच्छृणु आदौ दारकारकग्रह
णाच्च ननु रविचंद्रयोरेकग्रहत्वात्स्वक्षेत्रे तद्धेतावितरांशस्य संभवो नेति चेन्नास्त्यस्माकं काक्षतिरिति उच्चे तस्मिन्नुत्तमाकुलाद्दारलाभः
तस्मिन्नुपपदद्वितीयस्वामिनि उच्चराशौ स्थिते उत्तमकुलाद्दारलाभः स्यात् नीचे विपर्ययः तस्मिन्नुपपदद्वितीयस्वामिनि नीचरा
शिस्थितेऽनुत्तमकुलाद्दारलाभः स्यात् शुभसंबंधात्सुंदरी उपपदद्वितीये शुभवर्गदृष्टियोगे सति स्त्री सुंदरी भवति राहुशनिभ्यां
अपवादात्त्यागो नाशो वा उपपदद्वितीये राहुशनिभ्यां योगे लोकापवादात्स्त्रियस्त्यागो नाशो वा स्यात् शुक्रकेतुभ्यां प्रदरः शुक्रकेतुयोगे
सति रक्तप्रदररोगवती स्त्री स्यात् शनिराहुभिरस्थिज्वरः उपपदद्वितीये शन्यादित्रिकयोगे अस्थिज्वरवती स्यात् बुधकेतुभ्यां स्थौ राम
ल्यं उपपदद्वितीये बुधकेतुभ्यां योगे स्थूला स्त्री स्यात् बुधक्षेत्रे मंदाराभ्यां नासिकारोगः कुजक्षेत्रे च बुधगृहे भौमगृहे च उपपद १८
द्वितीयगते सति शनिभौमाभ्यां योगे नासिकारोगवती स्यात् गुरुशनिभ्यां कर्णरोगः नरहकोच्च बुधकुजान्यतरक्षेत्रे उपपद
अस्थिस्रावो बुधकेतुभ्यां उपपदद्वितीये बुधकेतुभ्यां योगे अस्थिस्रावरोगवती स्त्री स्यात्

लग्नाद्युपपदाद्वा सप्तमो राशिस्तद्भावनवांशादिश्च तयो राश्योर्यः स्वामी सप्तमतदंशाद्यग्रहः सप्तमकारकश्च तेभ्यो यद्वांशकुंडल्यां सप्तमांशात्तदीशादिग्रहेभ्यः अथवा सप्तमांशकुं
डल्यां सप्तमांशतदीशादिग्रहेभ्यश्चैवं भवति तत्र पापस्थेत्युक्तानि फलानि समुन्नेयानि इति ग्रन्थटीकाकारः ४ यावंतो योगा निरुक्तास्ते सर्वेपि न भवेयुः २
द्वितीयगते सति तत्र गुरुशनियोगे कर्णरोगवती नरकुनाड्यादिकानिः सरणरोगवती च स्यात् राहुगुरुभ्यां दंतरोगः बुधकुजान्यतर
स्थेत्रयोगे उपपदद्वितीये गुरुराहुभ्यां योगे दंतरोगवती च स्यात् शनिराहुभ्यां कन्यातुलयोः पंगु वातरोगो वा कन्यातुलान्यतरगे उपपदद्वि
तीये शनिराहुभ्यां योगे पंगुर्वा वातरोगवती वा स्यात् शुभदृग्योगान्न उपपदद्वितीये शुभयोगो दृष्टिर्वा स्यात्तर्हि निरुक्तादोषा न स्युः सप्त
मांशाद्यग्रहेभ्यश्चैवम् उपपदाद्यः सप्तमो भावस्तद्भावस्थनवांशश्च ताभ्यां तयोः स्वामिनोर्ग्रहौ ताभ्यां च द्वितीये एवं पूर्वोक्तानि समुन्नेया
नि तदुक्तं वृद्धैः सप्तमेशाद्द्वितीयस्थेप्येवं फलमुदाहृतमिति बुधशनिशुक्रेष्वनपत्यः उपपदात्सप्तमांशाद्यग्रहेभ्यः पंचमे बुधशनि
शुक्रयोगे सत्यपत्यहीनो भवति पुत्रे गुरुरविराहुगुरुभिर्बहुपुत्रः उपपदात्सप्तमांशाद्यग्रहेभ्यः पंचमस्थानेषु रव्यादिषु सत्सु बहुपुत्रः चं
द्रेणैकपुत्रः उक्तस्थानेषु चंद्रे सति एकपुत्रो भवति मिश्रे विलंबात्पुत्रः उक्तस्थानेषु शुभपापमिश्रत्वे सति विलंबात्पुत्रलाभः कु
जशनिभ्यां दत्तपुत्रः उपपदात्सप्तमांशाद्यग्रहेभ्यः पंचमेषु कुजशनिभ्यां स्थिताभ्यां दत्तपुत्रवान्स्यात् ओजे बहुपुत्रः उपपदात्सप्त
मांशाद्यग्रहेभ्यः पंचमेषु ओजराशौ सति बहुपुत्रः स्यात् युग्मेऽल्पप्रजः ओजस्थानेषु युग्मराशौ सति अल्पापत्यो भवति ग्रहक्रमा
त्कुक्षितदीशपंचमांशाद्यग्रहेभ्यश्चैवं ग्रहक्रमाद्ध्यानक्रमाद्यथाभावानां विज्ञानम् कुक्षितदीशाद्युपपदेशौ ताभ्यां पंचमांशाद्यग्रहाः पंच
मेषादितः कुक्षितदीशेषु सिंहराशीतरः अल्पापत्यादिकं चिंतनीयं सिंहलग्ने वृद्धे वाल्पप्रजतोत्के पंचमभावानां योंशस्तदीशस्तत्कारकश्च यद्वा त्रिंशांशकुंडल्यां यः पं
चमांशस्तदीशादयश्चैते एतद्विचारः सर्वोपि कर्तव्य इति ग्रन्थटीकाकारः ५

[illegible]

[illegible]

भ्रातृस्थानस्थाभ्यामेकादशातृतीयाभ्यां शनिराहुभ्यां ज्येष्ठकनिष्ठनाशइत्यस्यटीका २

मभावात्तद्भावस्थनवांशस्थताभ्यांतयोःस्वामिग्रहाभ्यांचैवंपूर्वोक्तफलविचारःकर्तव्यइत्यर्थः गराऽपठितोपपदस्यग्रहणं ननुस्वा
म्यादिभिः कुक्षितदीर्घाविति सिंहरवीत्युक्तेतत्सर्वसाधारणत्वादनुपयुक्तं विशेषतोऽस्मिन्शास्त्रेऽक्षरसंख्यांशानामेवग्रहणादिति भ्रा
तृभ्यांशनिराहुभ्यांभ्रातृनाशः उपप[redacted]देशाभ्यांभ्रातृस्थानस्थाभ्यामेकादशतृतीयस्थाभ्यांशनिराहुभ्यांभ्रातृनाशः एकादशे ज्ये
ष्ठस्यतृतीयेकनिष्ठस्यनाशः कर्म्मादिभ्रातृस्थितिर्यादिज्येष्ठस्येतिसूत्रदर्शनात् नन्वुपपदेशाभ्यामितिकुतः समागतमितिचेत्कूण
गरुकमादितिसूत्रात्कुक्षितदीर्घपदात् नचसमासघटितपदानामेकांशानुवृत्तेरसंभवादितिवाच्यं अन्यपदेभ्योभ्रातृवि
चारायोग्यत्वादेकांशानुवृत्तेरितिभावः शुक्रेणाव्यवहितगर्भनाशः एकादशतृतीयान्यतरस्थेनशुक्रेणयथाक्रमंव्यवहितपूर्वापर
मातृगर्भनाशःस्यात् पितृभावेशुक्रदृष्टेपि लग्नेतन्मादृशमेवाशुक्रदृष्टेसत्यपिव्यवहितगर्भनाशइत्यर्थः कुजगुरुचंद्रबुधैर्बहु
भ्रातरः उपपदेशाभ्यांतृतीयेकादशस्थैःकुजादिभिर्भ्रातृबाहुल्यंस्यात् शन्याराभ्यांदृष्टेयथास्वंभ्रातृनाशः उपपदेशाभ्यांतृती राम
येकादशयोःशन्यारदृष्टेसतीयथास्वंभ्रातृस्थानमनतिक्रम्यतृतीयेदृष्टेकनिष्ठस्यएकादशेदृष्टेज्येष्ठस्यउभयत्रदृष्टावुभयो १८
श्चनाशःस्यात् शनिनास्वमातृशेषश्च उपपदेशाभ्यांतृतीयेकादशयोःशनिदृष्टेसतिकेवलंस्वमातृशेषःस्यात् अनेन

२ सप्तमेशाद्द्वितीयस्थेप्येवं फलमुदाहृतं उपपदात्सप्तमस्थानेशो यत्र वर्तते तस्मात्स्थानाद्द्वितीयस्थाने धिकापे चोरः स्यादित्यादिफलमुन्नेयमित्यर्थः

राज्ञावधिकदंष्ट्रो वा दंष्ट्रायुक्तोपि वा भवेत् २

शंपतीत्यर्थः केतौ भगिनी वा हृत्वं उपपदेशात्स्यात् तृतीये कादयायोः केतौ सति यथा हत्वं भूयस्तां भवेति लाभेशाद्वा गैरे पश्चे राहौ दंष्ट्रावान् उप
पदसप्तमेशाद्द्वितीयराशौ राहौ सति स्थूलदंष्ट्रावान्स्यात् तदुक्तं प्राच्यैः सप्तमेशाद्द्वितीयस्थे राहौ मूकः खले स्थिते ऽधिदंतो धिकदंतो वा
दंष्ट्रायुक्तोपि वा भवेत् पवनव्याधिमान्केतौ यदा स्याद्दस्तुरो ऽक्षिमान् तत्र नानाग्रहैर्योगे मिश्रफलमुदाहृतं इति केतौ स्तब्धवाक् उ
पपदसप्तमेशाद्द्वितीये शनौ सति कुरूपो भवति केतौ स्तब्धवाक् उपपदसप्तमेशाद्द्वितीये [redacted] केतौ सति स्तब्धवाक् भवति मंदे कुरू
पः उपपदसप्तमेशाद्द्वितीये शनौ सति कुरूपो भवति स्वांशवशात् गौरनीलपीतादिवर्णाः आत्मकारकाश्रितनवांशस्वाभाव्याज्जातको
त्तरप्रसिद्धजातकवतो वर्णा ग्राह्याः एवं च तत्तत्कारकांशात्तत्तत्स्थानेषु वर्णा ज्ञेया इत्यपि बोध्यं अमात्यानुचराद्देवताभक्तिः अमात्यग्र
हान्मूनो योग्रहस्तस्माद्देवताभक्तिर्विचारणीयेत्यर्थः अमात्यानुचरो देवताकारकस्तस्य पापत्वे सति क्रूरदेवतायां भक्तिः शुभत्वे सौम्यदे
वतायां तत्र वर्गतत्वे च भक्तिर्दृढता नीचगतत्वे भक्त्यस्थैर्यमित्यादिकं ज्ञेयं स्वांशे केवलपापसंबंधे परजातः कारकांशेशुभग्रहराहि
तकेवलपापसंबंधे परजातो भवति संबंधस्तु दृष्टियोगषड्वर्गैर्ज्ञेयः नात्र पापात् अत्र कारकस्थे पापे भवति तदा इदं फलं तस्मा
त् कारकातिरिक्ताद्देव पापसंबंधादिदं फलं वाच्यं न कारकात्पापादित्यर्थः अथवा अत्राष्टमे पापे सति नाये योगः शनिराहुभ्यां प्रसि
द्धोविति शनिराहू यदि योगघटकौ शनिराहुदृष्टियोगषड्वर्गैः परजातत्वप्रसिद्धिर्भवति गोपनमन्येभ्यः अन्येभ्यो पापग्रहेभ्यो यो

२०

गेसतिपरजातत्वगोपनंभवति शुभवर्गेपवादमात्रं पापग्रहेषुयोगघटकेषुसत्सुकारकांशेशुभषड्वर्गसंबंधेसतितुपरजातत्वापवा
दएवभवेन्नतुपरजातत्वमित्यर्थः द्विग्रहेकुलमुख्यः कारकांशेद्विग्रहयोगेसतिकुलमुख्योभवति इतिश्रीनीलकंठज्योति
र्विद्विरचितायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांप्रथमाध्यायस्यचतुर्थःपादःसमाप्तः अथायुर्दायोपायंनिरूप्यते आयुःपि
तृदिनेशाभ्यां लग्नेशाष्टमेशाभ्यामायुर्विचार्यमित्यर्थः लग्नेशाष्टमेशस्थितिवशात्दीर्घायुर्योगमाह प्रथमयोरुत्तरयोर्वादी
र्घं प्रथमयोश्चरयोरुत्तरयोःस्थिरद्विस्वभावयोर्वायदिलग्नेशाष्टमेशौभवतस्तर्हिदीर्घायुर्भवति अयमर्थः यत्रक्वापिचरराश्योर्लग्ने
शाष्टमेशयोःस्थितत्वात्दीर्घायुर्योगः स्थिरद्विस्वभावयोर्लग्नेशाष्टमेशयोःस्थितत्वात्वा स्थिरेलग्नेशेसतिद्वंद्वेऽष्टमः द्वंद्वेलग्नेशेसतिस्थि
रेऽष्टमेशः इतिपर्यायेणाभवतस्तर्हिदीर्घायुर्योगःस्यादिति अत्रैकस्मिन्नेवचरादौतदुभयसत्वे एकस्यैवतदुभयस्वामित्वेवानयो
गहानिः अथमध्यायुर्योगंदर्शयति प्रथमद्वितीययोरन्त्ययोर्वामध्यं प्रथमद्वितीययोश्चरस्थिरयोश्चरेलग्ने ।।।
शःस्थिरेष्टमेशः चरेऽष्टमेशःस्थिरेलग्नेशइतिरीत्यायदिभवतः यदिवाद्विस्वभावयोर्द्वावपिलग्नेशाष्टमेशौयत्रक्वा
पिभवतस्तर्हिमध्यायुर्भवतीत्यर्थः अथाल्पायुर्योगमाह मध्ययोराद्यंतयोर्वाहीनं यदिमध्ययोःस्थिरयोर्यत्रक्वापि
लग्नेशाष्टमेशौस्तः यदिवाआद्यंतयोश्चरद्विस्वभावयोर्लग्नेशाष्टमेशौस्तः चरेलग्नेशः द्वंद्वेष्टमेशः द्वंद्वेलग्नेशश्चरेऽष्ट

दी १ १	१ २ म	अ १ ३
दी २ ३	२ १ म	अ २ २
दी ३ २	३ ३ म	अ ३ १

मेषाः इति क्रमेणायदि तर्हि हीनमल्पायुर्भवतीत्यर्थः अथ यथा लग्नेशाष्टमेशयोः राशिस्थितिभेदेन दीर्घमध्याल्पायूंषि प्रोक्तानि तथैव
लग्नचंद्राभ्यामप्युच्यते एवं मंदचंद्राभ्यां मंदचंद्राभ्यां लग्नेंदुभ्यां एवं पूर्वोक्तप्रकारेण दीर्घमध्याल्पायूंषि विचार्याणीत्यर्थः पित्र
कालतश्च जन्मलग्नहोरालग्नाभ्यां च पूर्वोक्तप्रकारेण दीर्घमध्याल्पायूंषि समानीयानि तथा च त्रिविधद्वंद्वयुगलेन दीर्घमध्याल्पायूंषि
त्रेधा समानीयानीति पर्यवसितोऽर्थः होरालग्नानयनं तु पूर्वमेवोक्तं एतत्तु लेद्वेः लग्नेशाष्टमपत्योश्च लग्नेंदोर्लग्नहोरयोः तत्रापि एवं प्रत्यु
जीयात्संवादादायुषां त्रये चरे चरस्थिरद्वंद्वाः स्थिरे द्वंद्वचरस्थिराः द्वंद्वे स्थिरोभयचरा दीर्घमध्याल्पकायुषः प्रथमयोर्हित्यादिस्तत्र
चरे चरस्थिरेति यसंख्याङ्कश्चरेति प्रश्नास्श्लोकः ग्रस्तस्य च केद्रष्टव्यः अथ अत्र त्रिविधेष्वायुर्दायनिर्णयोपायेषु त्रयाणामेकाकारायुःप्रदत्वे निर्विवादमेव द्वयो
रेकाकारायुःप्रदत्वे परस्य भिन्नायुःप्रदत्वे निर्णयमाह संवादात्प्रामाण्यं प्रकारद्वयेन यादृशमायुरायाति तदेव ग्राह्यं न त्वेकेनागतमिति
अथ त्रयाणां पक्षाणां वैरूप्ये सति ग्राह्यः पक्षमाह विसंवादे पित्रकालतः त्रयाणां पक्षाणां विसंवादे वैरूप्ये सति जन्मलग्नहोरा
लग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः सर्वत्रैव विसंवादे लग्नहोराभ्यामेवायुः अस्यापवादमाह पित्रलाभगे चंद्रे चंद्रमंदाभ्यां लग्ने
सप्तमे वा चंद्रे स्थिते सति चंद्रलग्नाभ्यामागतमायुर्ग्राह्यमित्यर्थः अल्पायुष्यादिकं हद्रेकाणं द्वात्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततो भवे
त् चतुःषष्ट्याः पुरस्तात्तु ततो दीर्घमुदाहृतमिति द्वात्रिंशच्चतुःषष्टिवर्षसंमतिरूपेष्वायुर्दायेषु स्पष्टीकरणं हद्रेकाणं पूर्णमादौ हानि

रंतेनुपातो मध्यतो भवेत् राशिद्वयस्य योगार्द्धं वर्षाणां स्पष्टमुच्यते एवं द्विकानां संचिंत्य त्रयाणां सूत्रवर्त्मनेति अयमर्थः प्रथम
सम्यूहेन योरित्यादिसूत्रजातेनायुर्निर्दिष्टं तत्र दीर्घायुषि समागते [illegible] मध्यायुरवधिपर्यंतं निर्विशेषं कं सिद्धमेव तदुपरितने दीर्घायुःखंडे द्वा
त्रिंशद्वर्षरूपे कियत् ग्राह्यमिति संशयनिराकरणाय यं श्लोकः पितृदिनेशौ लग्नेशाष्टमेशौ द्वावपि यद्राशौ भवतस्तद्राशेरारंभे चेत्त
र्हि तत्रोनः खंडः पूर्ण एव तद्राश्यंते य[illegible] यदि भवति तर्हि तत्खंडस्य विनाश एव मध्ये त्वनुपातेन खंडैकदेशो ग्राह्यः अनुपातस्त्वित्थं
त्रिपादंशेष्वेत् द्वात्रिंशद्वर्षाणि तर्हि एकेनांशेन किमिति प्राप्तं १।२४ तत्र लग्नेशाष्टमेशयोः पृथक् स्पष्टं विधाय राशीन् दूरीकृत्यांशादे
रेकखंडस्य त्रैराशिकेन यदायाति लग्नेशस्याष्टमेशस्य च तयो राशिगतयोर्वर्षादिखंडयोर्योगं विधाय तद्योगार्द्धं स्पष्टं भवति तत्र यदि दीर्घा
युःसंबंधि तर्हि चतुःषष्टिमध्ये योज्यं यदि मध्यायुःसंबंधि तदा द्वात्रिंशन्मध्ये योज्यं यद्यल्पायुःसंबंधि तदा प्रथमखंडाभावात्स्वयमेव
जन्मप्रभृति वर्तमानमायुर्भवति एवं मंदचंद्रयोः पितृकालयोरपि समागतायुष्यंतिमखंडस्पष्टीकरणं विज्ञेयं अन्येतु होराल
ग्नादिमोशेनानुपूर्णमतेन न किंचन स्पष्टीकरणमेतस्या दीर्घमध्याल्पकायुषि अनुपातस्तु पूर्ववत् अनेन होरालग्नस्यापि सावयव
त्वं दर्शितं अपदीर्घमध्याल्पायुर्योगेषु किंच न विशेषं दर्शयति शनैर्योगहेतोः कक्ष्याह्रासः अथात्र शनिर्योगे बहुलग्नेशाष्टमादिभिः राम २१
कर्तृत्वमापन्नेऽस्यात्तदा कक्ष्याह्रासो भवति दीर्घे चेन्मध्यं मध्ये चेदल्पं अल्पे चेन्न किंचन विपरीतमिसमन्ये शनैर्योगकर्तरि विप मतांतरमाह

होरालग्नमेषाकलाविकलादिभिः समानीय होरालग्नसमारंभे पूर्णो निमःखंडः अंते खंडस्य नाशः [illegible] शेनापि [illegible] राशिकमिति खंडस्पष्टत्व पूर्ववद्योगं सति संभवेदिवायायुर्निर्णयमिति २
आयुर्दासामान्येकक्ष्यात्रयं भवति दीर्घमध्यमल्पं चेति १

रीतं ह्रासो न भवति किंतु यथास्थितस्वेत्यर्थः अन्ये आचार्या वदंति परपक्षं निर्दिश्य स्वपक्षमाह स्वस्त्राभ्यां न स्वर्क्षतुंगगे सौरे केव
ल पापदृग्योगिनि च स्वराशिस्थो च्चगेश नो तथा शुभदृग्योगरहित केवल पापदृग्योगविशिष्टेशनौ च न कक्षाह्रासः अन्यथा ह्रा
सो भवत्येव सर्वं तमसि सिद्धांत कक्षावृद्धिं योगांतरेणोपदिशति पितृलाभगो गुरौ केवल शुभदृग्योगिनि च कक्षा वृद्धिः लग्नसप्तम
योर्गुरौ सति तथा पापदृष्टि पापयोगरहिते शुभदृष्टि शुभयोगसहिते सहिते गुरौ च कक्षा वृद्धिरित्यर्थः तथा च अनायुषो ल्पायुर्वृद्धि
अल्पायुषः मध्यायुर्वृद्धिः मध्यायुषो दीर्घायुर्वृद्धि दीर्घायुषः सप्तवत्सरवृद्ध्या युर्भवतीत्यर्थः आयुषि प्रमाणासिद्धे पूर्णे मरणे म
ध्ये तरणमपि मरणं भवतीत्याकांक्षायामाह मलिने द्वारबाह्ये न वांशो निधनं द्वारद्वारेशयोश्च मालिन्ये द्वारं बाह्यं चेति समा
हारद्वंद्वः तस्मिन्द्वारबाह्ये पाकभोग्य दशाश्रयो द्वारं ततस्तावतिथं बाह्यमित्यग्रे वक्ष्यति तस्मिन्पाकभोगापरपर्याये द्वारबाह्ये म
लिने स्वयं पापे पापयुक्ते पापदृष्टे च सति द्वारबाह्ययोर्नवांशे नवांशदशायां निधनं भवति अत्र नवांशपदेन प्रतिराशि नवांशमि
ता नवांशदायाः विषमे तदादिर्नवांश इत्यादिना वक्ष्यमाणा नवांशदशेति जन्मकाले आद्य दशाश्रय राशेर्यावत्संख्याको द्वार
राशिस्तस्मात्तावत्संख्याको राशि र्बाह्यमुच्यते द्वारबाह्ययोर्द्वयोरपि मलिनत्वं एव निधनं न त्वन्यतरस्य एवं द्वारेशराशेशौ द्वेशस
आयुर्बाधकं दर्शयति अथवा दीर्घादिषु योगेष्वन्यतमसिद्धौ तत्र योगे प्रायः पूर्णे किं राशिदशायां निधनमित्यपेक्षायामाह अथवा दीर्घादिषु योगेष्वन्यतमसिद्धौ दीर्घयोगे समागते मध्यायुर्दायप
र्यन्तं तस्य निरपवादात् मध्यायुर्योगे समागते च समाल्पायुर्दायांतस्य निर्दिष्ट [illegible] पूर्णपूर्णयोगाभावात् जन्मतः प्रकृते चाल्पायुः स्वं देयपायोगं विंशतिराशिदशायां निधन
मित्यपेक्षायामाह मलिने इति इति स्वामिकृतटीकातस्माद्वितं ५ द्वारनवांशो बाह्यनवांशो वा निधनं भवतीत्यर्थः ३ दशाप्रदो राशिः पाकः लग्नाद्यावत्संख्यो राशिः पाकः पाकात्तावत्संख्यो राशिर्भोगः ४

तत्रापि द्वारबाह्यत्रिकोणगांतर्दशायां निधनमिति विवेकः एवं योगमुदीपसमाप्तिसमये मरणमपीभूतेष्ठोक्ते खंडे बाधीदिपाकस्य वा ह्यस्य वा मलिनत्वदशांतर्हि तत्त्रिकोणगांतर्दशांते निधनमिति भावः अन्यादी १
द्वारबाह्यनवांशादशानेतरमपि पुनर्नवांशपर्यंतं ४

त्वमलिनत्वे सति द्वारनदीशाश्रयराशीयनवांशादशायां निधनं भवतीत्यर्थः निधनयोगापवादमाह शुभदृग्योगान्न द्वारबा
२२ ह्यद्वारेशानां शुभदृष्टियोगसत्वे द्वारबाह्यद्वारेशाश्रयनवांशदशायां निधनं नेत्यर्थः अथ शुभदृग्योगाभावेपि नवांशकालनि
धनापवादमाह रोगेशेनुगे नवांशवृद्धिः जन्मलग्नादष्टमेशे उच्चगते सत्युक्तनिधनयोगे सत्यपि तद्दशायां मरणमुक्तं त[illegible]नि
धनं तदा न भवेदेव तदुत्तरनवांशवृद्धिः नवांशवृद्धिरित्यर्थः कुत्र वा निधनमिति शंकायामाह तत्रापि पदेशादशांते पद पदसेशस्य दशा
नवांशदशायां पित्रादिनेशत्रिकोणे वा तत्रापि वृद्धिपक्षेपि पदस्य लग्नारूढस्येशः स्वामी तदाश्रयीभूतराशेर्दशायामंते निधनं स्या
त् अथ जन्मलग्नारूढनवांशदशायां निधनं किंवा लग्नेशाष्टमेशाभ्यां त्रिकोणे लग्नपंचमनवमान्यतरराशिदशायामंतर्द
शायां वा निधनं भवतीत्यर्थः अथ प्रकारांतरेण दीर्घादियोगत्रयमाह पितृलाभयोगेषाप्राणिनि केंद्रकादिस्थे स्वतश्चैवं त्रि
धा लग्नात्सप्तमाद्वा यावदष्टमेशेन तयोर्यः प्राणी बली तस्मिन्केंद्रकादिस्थे लग्नादिकेंद्रपणफरआपोक्लिमस्थे त्रिधा योगो भवति
लग्नादिकेंद्रगते तस्मिन्दीर्घायुर्योगः पणफरस्थे मध्यायुः आपोक्लिमस्थे त्वल्पायुरित्यर्थः एवं स्वतश्च कारकादपि योगत्रय केंद्रादियोगत्रयमितं २
मितं बोध्यं तथा च कारकात्सप्तमाद्वा योग्रष्टमेशेन तयोर्बली तस्मिन्कारके केंद्रादिस्थे दीर्घमध्याल्पायुर्योगा भवंतीत्यर्थः अपेन
एवं च द्वादश योगाः संपद्यंत इति विभावनीयं अंतिमखंडस्य टीका [illegible] कातः १

एवाष्टमेश। स्वोच्चस्थः पर्य्यायाद्वयं दद्यात् नीचस्थो नाशयेत्पर्य्यायाद्धमायुषि निश्चिते नीचरंध्रेशसंयुक्ताः पर्य्यायार्द्धं पृथक्पृथक् ग्रहा विनाशयंत्येव निर्णीते परमायुषि उच्चरंध्रेशसंयुक्तग्रहेऽप्येकमुन्नयेत् एवैकमर्द्धं पर्य्याय परमायुषि निश्चिते ३

योगानामपवादमाह योगान्समेस्वस्मिन्विपरीतं योगाजन्मलग्नात्सप्तमात्समे नवमे स्वस्मिन्कारके सति विपरीतं पितृलाभेत्यादिसूत्रोपादिष्टयोगानस्तु किंतु दीर्घं चेन्मध्यं मध्यं चेदल्पं अल्पं चेन्न किंचिदित्यर्थः वैपरीत्यंतु दीर्घं चेदल्पं अल्पं चेद्दीर्घं मध्यं चेन्मध्यमेवेति नु संप्रदायविदः आयुर्दाविषये विशेषमाह सूत्रैः एकैवाष्टमेशः स्वोच्चस्थः पर्य्यायाद्वयं पृथक्पृथक् ग्रहा विनाशयंत्येवं निर्णीते परमायुषि अयमर्थः आयुः पितृदिनेशाभ्यामित्यनेनाष्टमेश उच्चस्थः स्वपर्यायार्द्धं स्वदशार्द्धमधिकं ददाति नाथांतादृति रीत्या यावदायुरायाति तस्मिन्पुनरपि तदर्द्धमधिकं [illegible] योज्यमितियावत् अष्टमेशो नीचराशिगतश्चेदायुषोर्द्धं नाशयेत् एवमेव नीचाष्टमेशयुक्ता ग्रहा अपि तदीयमानायुषोर्द्धमर्द्धं नाशयेयुः एवमुच्चाष्टमेशसंयुक्ता ग्रहा तदीयमानायुषि स्वदशार्द्धमधिकं दद्युः एवमेव लग्नेशादयोपि ग्रहा उच्च नीचगुणा तो वृद्धिह्रासौ कुर्य्युरिति संप्रदायः अस्मिन्नत्र कारयोः किं बलं ग्राह्यमित्याकांक्षायामाह राशितः प्राग्‌ग्‌ अत्र राशितो बलं ग्राह्यं कारकयोगः प्रथमो भानामित्यादिकं वक्ष्यमाणाराशिबलं ग्राह्यं अत्रांशाधिक्यबलं न ग्राह्यमित्यर्थः अथ प्रकारांतरेणामध्यायुर्योगमाह रोगेशयोः स्वतः एकोयोगेवामध्यं लग्नात्सप्तमाच्च रोगेशयोरष्टमेशयोः स्वतः कारकेरोगेसति योगेवासति पितृलाभेत्यादिसूत्रेणाप्राप्तदीर्घायुषमपि मध्यमायुरेव भवतीत्यर्थः ११२११को तरेलग्नस्यास्मिन्ग्रंथे कारकस्य प्राधान्यादष्टमेशयोगेन आयुषो ह्रासोऽयं इति विभावनीयम्

अथ दीर्घादित्रिषुयोगेषु कक्ष्याह्रासमाह पितृलाभयोः पापमध्यत्वे कोणपापयोगे वा कक्ष्याह्रासः स्वस्मिन्नप्येवं स्वस्मिन्पापे
नीचेऽतुंगेऽशुभसंयुक्ते वा पितृलाभयोर्लग्नसप्तमयोर्द्वयोरपि पापग्रहमध्यवर्तित्वे कक्ष्याह्रासो भवति लग्नकुंडल्यां द्विर्द्वादश
योः षष्ठाष्टमयोश्च पापयोः पापयोगे सति पापमध्यवर्तित्वं भवति एवं लग्नसप्तमयोः केवलपापयोगे वा कोणे त्रिकोणेषु लग्नपंच
मनवमेषु पापयोगे वा कक्ष्याह्रासो भवति स्वस्मिन्कारकेप्येवं लग्नकुंडलीवदेव भवति अयमर्थः कारकराशेस्तत्सप्तमराशे
श्च पापमध्यत्वे एको योगः कक्ष्याह्रासाय कारकात्सप्तमयोस्त्रिकोणे सर्वत्र पापयोगे सति द्वितीयो योगः कक्ष्याह्रासायेति वेदितव्यं
तस्मिन्कारके पापे नीचे सति कक्ष्याह्रासः कारके पापेऽतुंगेऽनुच्चराशौ अशुभसंयुक्ते सति कक्ष्यानाशो भवतीति द्वितीयो योगः
अथ कक्ष्याह्रासयोगेऽपवादमाह अन्यदन्यथा अन्यथा लग्नसप्तमयोः कारकसप्तमयोर्वा शुभग्रहमध्यगतत्वे लग्नकारक
योः कोणे शुभयोगे वा कारके शुभेऽनीचे वा कारके शुभे तुंगे शुभसंयुक्ते वा अन्यत्कक्ष्यावृद्धिरित्यर्थः तथा च सर्वत्र योगे पापा
त्मके कक्ष्याह्रासः शुभात्मके कक्ष्यावृद्धिः शुभपापरहितेन वृद्धिर्न ह्रास इति बोध्यं अथ ह्रासवृद्धिप्रकारान्गुरावपि दर्शयति २२
गुरौ च एवमित्यर्थः गुरोर्द्विद्वादशषष्ठाष्टमत्रिकोणेषु पापयोगेषु सति कक्ष्याह्रासः गुरौ नीचेऽतुंगे अशुभसंयुक्ते वे च कक्ष्या
ह्रासः अर्थं अन्यथा वेदन्यथेति प्राग्वद्योजनं तत्रापवादं दर्शयति दाराद्भुशुक्रयोरेकराशिवृद्धिः उक्तस्थानेषु शुभग्रहयोगप्र

अत्र एवं कक्ष्याप्रदं प्रागुक्तार्थकं नेयं शुभग्रहयोगेन या वृद्धिः अन्यदन्यथेत्युपात्त तत्रापवादं दर्शयतीति टीकान्मा १

एकाष्टमेश: स्वोच्चस्थ: पर्य्यायार्द्धं प्रयच्छति नीचस्थो नाशयेत्पर्य्यायार्द्धमायुषि निश्चिते नीचरंध्रेशसंयुक्ता: पर्य्यायार्द्धं पृथक्पृथक् ग्रहा विनाशयेत्येव
निर्णीते परमायुषि उच्चरंध्रेशसंयुक्ता ग्रहे:ऽप्येकमुन्नयेत् एकैकमर्द्धपर्य्यायं परमायुर्विनिश्चिते २

योगानामपवादमाह योगान्समेस्वस्मिन्विपरीतं योगाज्जन्मलग्नात्सप्तमात्समे नवमे स्वस्मिन्कारके सति विपरीतं पितृलाभे
त्यादिसूत्रोपादिष्टयोगानस्तु: किंतु दीर्घं चेन्मध्यं मध्यं चेदल्पं अल्पं चेन्न किंचिदित्यर्थ: वैपरीत्यं तु दीर्घं चेदल्पं अल्पं चेद्दीर्घं म
ध्यं चेन्मध्यमेवेति तु संप्रदायविद: आयुर्दा विषये विशेषमाह एकैष्टमेश: स्वोच्चस्थ: पर्य्यायार्द्धं पृथक्पृथक् ग्रहा वि
नाशयेत्येवं निर्णीते परमायुषि अयमर्थ: आयु:पितृदिनेशाभ्यामित्यनेनाष्टमेश उच्चस्थ: स्वपर्यायार्द्धं स्वदशार्द्धमधिकं द
दाति नाथांता दृति रीत्या यावदायुरायाति तस्मिन्नुनरपि तदर्द्धमधिकं दद्यादेयोऽप्यं इति यावत् अष्टमेशो नीचराशिगतश्चे
दायुष्यर्द्धं नाशयेत् एवमेव नीचाष्टमेशयुक्ता ग्रहा अपि तदीयमानायुष्यर्द्धमर्द्धं नाशयेयु: एवमुच्चाष्टमेशसंयुक्ता ग्रहास्तदी
यमानायुषि स्वदशार्द्धमधिकं दद्यु: एवमेव लग्नेशादयोऽपि ग्रहा उच्चनीचगता वृद्धिह्रासौ कुर्युरिति संप्रदाय: अस्मिन्न
कयोः किं वलं ग्राह्यमित्याकांक्षायामाह राशित:प्राग: अत्र राशितो वलं ग्राह्यं कारकयोग: प्रथमो भानामित्यादिके वक्ष्यमा
णराशिवलं ग्राह्यं अत्रांशाधिक्यवलेन ग्राह्यमित्यर्थ: अथ प्रकारान्तरेण मध्यायुर्योगमाह शेगेशयो: स्वत: एके वा योगे वा म
ध्यं लग्नात्सप्तमाच्च शेगेशयोरष्टमेशयो: स्वत: कारके वा योगे वा सति योगे वा सति पितृलाभेत्यादिसूत्रेण प्राप्तदीर्घायुष्यमपि मध्य
मायुरेव भवतीत्यर्थ: २।३।२।को तरेलग्नस्यास्मिन्ग्रंथे कारकस्य प्राधान्यादष्टमेशयोगेनाप्यायुषो ह्रासो यैतिविभावनीयम्

कररोगपूर्णौगुरुशुक्रयोर्योगेसतिनकक्षावृद्धिः किंत्वेकराशिवृद्धिरेवेत्यर्थः पापयोगेनयः कक्षाह्रासउक्तस्तत्रापवादंदर्शयति शनौ
विपरीतं शनावुक्तस्थानगेसतिनकक्षाह्रासः किंत्वेकराशिह्रासएवेत्यर्थः अत्रयदिचंद्रशुक्रौप्राधान्येनयोगकरौयदिवाप्रा
निःप्राधान्येनयोगकरस्तर्हिसत्रअसौनरेषुयोगकरेषुसत्स्वपिएकस्यैवराशेर्ह्रासोवावृद्धिर्वानतुकक्षायाइत्यर्थः अथसक
लायुर्योगापवादत्वेननिधनयोगंस्थिरदशामालंब्याह स्थिरदशायांयथाखंडेनिधनं खंडमनतिक्रम्यपयथाखंडं स्थिरद
शायांशशिनंदपावकाद्युक्तखंडेवक्ष्यमाणादशायांदीर्घमध्याल्पायुर्भेदेपूर्णायुषः त्रेधाखंडकरणाद्यःखंडंसमागतस्त
स्मिन्नेवखंडेनिधनंभवतीत्यर्थः एवंवक्ष्यमाणप्रकारेणानिधनाश्रयखंडात्स्वखंडेनिधनलक्षणाक्रांतराशेर्दशायामागा
तायामपिननिधनंस्यात् किंतुक्लेशःस्यात् अथदीर्घमध्याल्पायुर्भेदेनमरणखंडेनिर्णीतेयविशेषतोमरणकालज्ञानमि
तःसंभवतीत्याह तत्रर्क्षविशेषः तत्रनिधनेऋक्षविशेषःराशिविशेषोस्तीत्यर्थः सराशिविशेषःकइत्यपेक्षायामाह पापम
ध्येपापकोणेरिपुरोगयोःपापेवा पापद्वयमध्यगतराशिदशायांप्रथमदशाप्रदराशेस्त्रिकोणेरोगाद्दशाष्टमयोर्वापापयोगेसति
तद्राशिदशायांनिधनंभवति एतदुक्तंवृद्धैः शुभमध्येस्थितिर्नैवपापमध्येस्थितिर्भवेदिति लग्नात्कारकाद्वापापाक्रांतद्वाद
शात्मराशिदशायांनिधनंभवतीत्यर्थः बहुवर्षव्यापिन्यांदशायांकदामरणमित्याकांक्षायामाह तत्राप्याद्यर्क्षादिनाथ

तृतीयं तदीशयोः [illegible] शुक्रेद्दृष्टेवा पुनरपिनिधनज्ञानायराशिविशेषदेशं [illegible] सत्यंप्रतांतरदृष्टिर्विदित [illegible] शुक्र
होसत्वशुक्र, मात्रदृष्टेचसत्यांवानिधनंभवतिद्वादशाष्टमद्वयोरिहभाव: १

लग्नात्कारकाद्वा २

दृश्यनवमभागाद्वा तत्रापि नियतस्थानत्वेनादृशात्तु पापमध्यराश्यादिदशायुक्ता पक्षौदिनाथौ प्रथमदशाप्रदराशिनत्वष्टरा
शिनाथौ ताभ्यां दृश्यो यो नवमभागो नवांशकं कुंडलीस्थं तद्दशायां वा निधने भवतीत्यर्थः ननु आद्यपादेन दशामराशिः अशिवाद्दे
नाष्टमराशिः कुतो न गृह्यत इति एवं चेन्नु नैक्तान्यथैतर्हि हि रिष्फ तेनु नाष्टदृश्यनवमभागाद्देति कुतो नोक्तमिति लं अथ निर्ध्या
णविशेष [illegible] षप्रकारांतरेणादर्शयन् रुद्रग्रहं लक्षयति पितृलाभभावेशप्राणी रुद्रः लग्नसप्तमयोर्यावष्टमेशौ तयोर्यः प्राणी
बलवान्स रुद्रसंज्ञो ग्रहो भवतीत्यर्थः द्वितीयरुद्रमाह अप्राणापि पापदृष्टः लग्नात्सप्तमाद्वा योऽष्टमाधीशो दुर्बलः सोपि पापग्र
हदृष्टश्चेद्रुद्रः स्यात् तथा च द्वौ रुद्रौ भवतः प्राणी अप्राणी चेति प्राणिरुद्रस्य फलमाह प्राणिनि शुभदृष्टे सति रुद्रशूलांतमायुः
बलवति रुद्रे शुभदृष्टे सति रुद्रशूलांतं रुद्राश्रयप्रथमपंचमनवमदशांतमायुर्भवति अत्र मध्यदीर्घायुर्योगभेदात् प्रथम
त्रिकोणांते द्वितीयत्रिकोणांते तृतीयत्रिकोणांते वा आयुःसमाप्तं भवतीत्यर्थः अप्राणिरुद्रे विशेषमाह तत्रापि शुभयोगे
तत्र द्वितीयरुद्रे शुभयोगे सति रुद्रशूलांतमायुर्भवति न तु शुभदृष्टेति भावः उक्तयोगेऽपवादमाह अर्कपापयोगेन रविं २३
[illegible] विहाय इतरपापयोगे सति इदं फलं भवति रवियोगे तु नास्य फलस्य भंग इति अथ रुद्रद्वयस्य गुणविशेषेणापफलं दर्शयति
मंदारेंदुदृष्टे शुभयोगाभावे पापयोगेपि वा शुभदृष्टे वा परतः प्राणिन्यप्राणिनि वा रुद्रे मंदारेंदुदृष्टे शुभयोगाभावे एको
अत्र रुद्रग्रहस्य शुभदृष्टत्वाभावे प्राणित्वाभावे वा नेदं फलं भवति तु इति

योगः मंदारेंदुदृष्टेरुद्रद्वये पापयोगेपि वा द्वितीयो योगः मंदारेंदुदृष्टे रुद्रद्वये शुभदृष्टो वा सत्संततीयो योगः प्रथमयोगे शुभयोगः
प्रथमयोगे शुभयोगाभावे द्वितीयेनेन पापयोगे द्वितीययोगे वक्रक्षेपे शुभपापरहिते रुद्रेऽयमर्थः संपन्नः योगत्रये संपूर्णे सति रुद्रशूलो
तात्परतोऽग्रेऽप्यायुःसमाप्तिर्भवतीत्यर्थः वकारद्वयमनास्थायामित्युक्तो योगद्वयपरमितिपंथे रुक्षेनैतन्न वाकारद्वयस्यानास्थाकल्प
नायां प्रमाणाभावात् योगत्रयपरमेव वाकारबाहुद्वयेन मम्यतइति अस्मिन्प्रकरणे शुभपापाहेद्वेरुक्ताः अर्कीरमंदाः पशिनः क्रमात्
क्रूराः यथाश्रयं चंद्रोपि क्रूरएवात्र कश्चिदंगारकाश्रये गुरुध्वजकवित्रास्तु यथापूर्वं शुभाग्रस्ताइति अयमर्थः अर्कोयाउत्तरोत्तरं यथा
श्रयं क्रूरराशिगताः क्रूराभवंति शुभराशिगतास्तु न पापाः किंतु शुभा एव गुर्वादयस्तु शुभाः यथापूर्वं शुभाः कविः कवेः केतुः केतोर्गुरु
इति क्रमेणोत्तरं शुभाः क्रूरग्रहाणां यथा क्रूराश्रये क्रूरत्वं शुभाश्रये शुभत्वं तथा गुर्वादीनामपि शुभाश्रये शुभतानक्रूराश्रये शुभ
ता एवमेव हेद्वेरुक्तं यत्येकं शुभराशिस्थः उच्चस्थो वा बुधः शुभः गुरुः शुक्रोच [illegible] सौम्यस्थो ततो नत्र शुभाः स्मृताइति यदि शूले
मृतिस्तर्हि कस्मिन्शूले स्यादित्यत्र विशेषो हेद्वेरुक्तः पापमात्रस्य शूलत्वे प्रथमर्क्षे मृतिर्भवेत् मिश्रे मध्यमशूलर्क्षे शुभमात्रे त्वभे
मृतिरिति अस्यार्थः द्वौ रुद्रौ यदि पापौ तर्हि प्रथमशूले मृतिः स्यात् यदेको रुद्रः शुभोपरः पापस्तर्हि मध्यमशूले मृतिः द्वावपि रुद्रौ य
दि शुभौ तदंत्यशूले मृतिः स्यादिति रुद्राश्रितराशावपि कदाचिन्मरणयोगमाह रुद्राश्रयेपि प्रायेणा रुद्राश्रयराशावप्यायुःस

पापमात्रस्य शूलत्वे प्रथमर्क्षे मृतिर्भवेत् मिश्रे मध्यमशूलर्क्षे

माप्तिर्भवतीत्यर्थः प्रायःशब्दाद्वद्वान्दूर्वंपरतोवाआयुःसमाप्तिर्भवतीतिध्वनितं अथविशेषमाह क्षियेपितरिविशेषेण मेषेल
ग्नेसति ~~विशेषे~~ विशेषेणरुद्राश्रयेआयुःसमाप्तिर्भवतीति रुद्रद्वयसाधारणेनफलविशेषमाह द्वंद्वे रुद्रेतदंतंप्राय इति द्वंद्वेद्विस्व
भावराशौ रुद्रे प्राणिनामप्राणिनिवासतितदंतं रुद्राश्रयद्विस्वभावांतं प्रायः प्रायेणायुर्भवति प्रायःपदाद्योगभेदेन रुद्राश्रयद्विस्वभा
वराशेः पूर्वंपरतोवाभवतीतिगम्यते लग्नादष्टमराशौरुद्रेसतिरुद्राश्रयांतं प्रायेणायुःसमाप्तिर्भवतीति योगभेदेननिधनस्थानं
दर्शयति प्रथममध्यमोत्तमेषुवातत्तदायुषां तत्तदायुषामल्पमध्यदीर्घायुर्योगवतां प्रथममध्यमोत्तमेषु प्रथमद्वितीयतृतीय
रुद्रशूलेषुवाक्रमेणायुःसमाप्तिर्भवति रुद्रशूलराशिमहादशायांनिधनेसिद्धेकस्यामंतर्दशायांनिधनमित्याशंक्याह शू
लेवेत्तदंतशूले रुद्रशूलेयथायुःसमाप्तिस्तर्हि रुद्रशूलमहादशायां रुद्रशूलांतर्दशायांनिधनमित्यर्थः अथशूलेचेदित्युक्त
रुद्रशूलेचेदित्युक्तमा रुद्रशूलनिर्याणयोगेसत्यपिवलवत्तरयोगांतरवशातोरुद्रशूलनिर्याणवाधोपिभवतीतिध्वनितं अथ
फलंत्वग्रे फलविशेषकथनायमहेश्वरग्रहंलक्षयति स्वभावेशोमहेश्वरः स्वादात्मकारकाद्भावेशोष्टमेशः स्वोच्चेस्वगृहेवास्यात्त २४
दाकारकात्तदादशाष्टमेशयोर्मध्येयोवलीसएवमहेश्वरःस्यात्तत्तुस्वभावेशादित्यर्थः द्वावपितुल्यवलौ चेद्द्वौमहेश्वरौभ
वतएव स्वोच्चेस्वगृहे इतिहेतुः कारकोच्चराशौग्रहयुक्तेसतिकारकादष्टमद्वादशयोर्मध्ये योवलीसमहेश्वरः अस्मिन्न
महेश्वरइत्यर्थः अथप्रकारांतरेणमहेश्वरग्रहंदर्शयति स्वोच्चेसग्रहेरिपुभावेशात्प्रारगी स्वात्मकारकात् २
कारकग्रहराशौ

यथा रुद्रयमानयने अष्टमेशयोर्द्वयोरपि समबलत्वे द्वावपि रुद्रौ तयोरिति यावत् टीका १ ... महेश्वरयोगमाह स्वग्रहस्योदितो ... कलाद्ध ... माह २

क्षेत्रकारांतरेणायमपि महेश्वर इत्यर्थः प्रकारांतरेण महेश्वरमाह पाताभ्यां योगे स्वस्पतयोर्वा योगेन ततः स्वस्वकारहस्या
ताभ्यां राहुकेत्वोरन्यतरेण योगे तथा कारकाङ्गयोगे ... मेत योराहुकेत्वोर्द्वयोर्योगे वा सति कारकात् रव्यादिग्रहसिद्धग्रहाणां पाताला
भ्यां ततः षष्ठो ग्रहो महेश्वरो भवति द्वित्राणां महेश्वराणां संभवे यो बली स एव महेश्वरः स्यादिति प्रभुर्द्द भावरवेरीदृशा
राशिपितृलाभशारापनुत्तरो विषमस्थो ब्रह्मा पितृलाभशारणीतिस्तत्र मध्ये स्थितत्वदेहलीपकन्यायेन लग्नसप्तमयोर्बलव
द्राशितस्तस्मात् षष्ठाष्टमद्वादशराशिस्वामिनां मध्ये यो बलवान् भवन्न्नेव लग्नतत्सप्तमराश्योर्मध्ये यो बलवद्राशिस्तत् षष्ठ
श्च सन् मेषमिथुनादिविषमराशिगतः स्यात् स एव ग्रहो ब्रह्मा भवतीति लग्नेषष्ठराभाप: सप्तमादिद्वादशांतं सप्तमस्य षष्ठ
राश्यो लग्नादिषष्ठांतं बोध्यं प्रकारांतरेण ब्रह्माणमाह ब्रह्मस्थिते शनौ पातयोर्वा ततः शनौ ब्रह्मणि ब्रह्मलक्षणाक्रांते
सति पातयो राहुकेत्वोर्वा ब्रह्मत्वे सति ताः तस्मात् शनेः राहोः केतोर्वा ततः षष्ठो ग्रहो ब्रह्मा भवतीत्यर्थः ननु ब्रह्मलक्षणाक्रांत त
याप्रशस्त्ये: शन्यादिब्रह्मा स्यात् बहूनां ब्रह्मलक्षणाक्रांतत्वे कतमो ब्रह्मा स्यादित्याशंकायामाह बहूनां योगे स्वजातीयः व
हू बहूनां ग्रहाणां ब्रह्मयोगे सति स्वजातीयः कारकजातीयः अधिकांशको ब्रह्मा स्यादित्यर्थः अत्रैव विशेषमाह राहुयो
ब्रह्मत्वमध्येऽधिकभागयुक्तो ग्राह्य इत्यर्थः १

षष्ठाष्टमलग्नाद्वादशे
पुत्रो बलवान् मेषादिवि
षमराशिगतः लग्नस
प्तमराश्योर्यो बलवान्
तदनुचरस्तात् षष्ठभाग
...लग्नस्य षष्ठसप्त
...दिषष्ठं कंसप्तमस्य
षष्ठं लग्नादि षष्ठं
तत्र राशि विषमान:
...तदुराजश्चतुर्थो
ग्रहो ब्रह्मा ब्रह्मत्वा
मको भवतीत्यर्थः ३
...शामी ३

ततः षष्ठग्रहादि केतं
...कारणानाथं वा र
...यतात् षष्ठः
य इह महेश्वरः २

तदनुचरस्तात्
षष्ठभागस्थः
शन्यादिस्या
नाह ८

अथवा

राहोर्ब्रह्मत्वयोगे सति १

गे विपरीतं राहोर्ब्रह्मणा सह संयोगे सति विपरीतं बहूनां ब्रह्मणां मध्ये योन्यूनांशकः स ब्रह्मा स्यात् शनिराहुके
तूनां नतु इत्युक्त्या ब्रह्मत्वाभावात् ब्रह्मत्वे सति तु राहोर्ब्रह्मत्वयोगे राहुर्न्यूनांशकश्च ब्रह्मा स्यात् इत्यर्थः पुनः प्रकारां
तरेण ब्रह्माणमाह ब्रह्मा स्वभावे शोभावस्थः कारकादष्टमेशः कारकादष्टमस्थश्च ग्रहो ब्रह्मा स्यात् [illegible]
मेशत्वे सति अष्टमराशिगतत्वमेव ब्रह्मत्वे प्रयोजकमिति मतं तन्न तथा सति विवादप्रशक्त्यभावेनैतत्सूत्रे समं ॥
न्वितं स्मात् न ह्येतत्सर्वान्वितं अवहितत्वात् ग्रंथस्वारस्यप्रशक्तेः बहूनामिति सूत्रे शेषशंकायां उपक्षीणत्वाच्चेति
अथ स्वमेशाष्टमस्थयोरेकत्वे निर्विवादं ब्रह्म तयोर्भेदे तु कतमो भवेदित्यत आह विवादे बली विवादे इयो[illegible]
ह्मत्वे सति यो बली स एव ब्रह्मा स्यात् अथवा सर्वेषु ब्रह्मसु समानोपायवत्सु योः ग्रहास्तसैंय हृदु इत्यादिना बोध्य ॥

अंतर्दशाधिपानां मध्ये ३

शायां निधनाश्रयीभूतायामंतर्दशायामीह तत्रापि कालाद्रिपुरोगवित्तनाथापहारे तत्रापि मार
कग्रहदशायामपि कालात्कारकसप्तमाद्वादशाष्टमषष्ठेशानामंतर्दशायां निधनं स्यादित्यर्थः ए
षां मध्ये बलवतोंतर्दशायां निधनमितिविवेचनीयं अत्रविशेषो हेद्रेरुक्तः चरेचरस्थिरद्वं
द्वाइति योराशिरागतः स एव मारको राशिर्भवतीति विनिर्णयः बहुराशिसमावेशे बलवा
न्मारकस्मृतः इति अयं भावः पितृदिनेशादिद्विकानां माश्रयीभूतो योराशिः समारकः ते
राशयोयदिबहवस्तर्हि अग्रग्रहात्स ग्रह इति बलेनयोराशिर्बलवान्समारकः तद्राशिदशा
यां तद्दीशाः अयराशिदशायां वामृतिरिति अपरेनु चरेइत्यादिना पुंर्युग्मेन समाप्तुवि
तो भवेत् योराशिः सतुविज्ञेयो मारकः सूत्रसंमत इति चरइत्यादिश्लोकेनैयद्दीर्घायुः समागतं
पूर्णमित्यादिनाखण्डीकृतं तदायुयद्राशौ समाप्तिं तद्राशिरेव मारक इत्यर्थः ॥ इतिजैमिनीये प्रथमः पादः

मारकग्रहाश्रयीभूतमहादशायामपि १

इतरांतर्दशायां रोगः

चरइत्यादिनायुर्यत्समाप्तुवितोमरः

राम

२८

स्वामी।
ब्रह्मग्रहाश्रितराशितः महेश्वरराशिपर्यंतं यावन्तो महादशाश्चराशिपर्यायादिरीतितो भवंति तावदायुरितिवर्द्धितार्थः ब्रह्मराशिदशामारभ्य महेश्वरराशिदशांतमायुरित्युक्तं तत्र महेश्वरदशातावन्निधनस्थानमितिसिद्धं १

ब्रह्ममहेश्वरयस्तो: लीयः स ब्रह्मा भवतीत्यर्थः ॥ अथ ब्रह्ममहेश्वरयोः फलमाह ब्रह्मणो यावन्महेश्वरर्क्षदशांतमायुः स्थि
रदशायां ब्रह्मग्रहाश्रितराशिदशापर्य्यंतमायुर्भवतीत्यर्थः महादशायां । निधनाश्रयीभूतामंतर्दशामा
ह तत्रापि महेश्वरभावे सैत्रिकोणाद्वे: तत्रापि महेश्वराश्रितराशिमहादशायामपि महेश्वराश्रि
तराशितोऽष्टमराशिनाथस्य यः त्रिकोणराशिः प्रथमपंचमनवमात्मको राशिस्तस्मै कायद[redacted]त्म
कोयं तदशाकालस्तत्र मृत्युः स्यात् रसौ वद इति द्वादशवर्षैस्तत्तद्राशिदशेत्यभिप्रायेणान्यूनसं
ख्याया दशास्तत्वे त्वधिकतोन्यूनमंतर्दशास्वप्यानेयमेव अथ सूत्रद्वयेन मारकग्रहं सूचयति स्वक
र्मा रुद्रश्चित्तरिपुरुद्रोग नाथप्राणी मारकः स्विमनाथः प्रायेण स्वस्मादात्मकारकात् तृतीयषष्ठ
द्वादशाष्टमेशानां मध्ये यो बलवान्स मारकग्रह इत्यर्थः सर्वेषां समबलत्वे सर्वेपि मारकाः सुः बहू
नां मारकत्वे कस्य दशायां निधनमित्याशंकायां मल्ल मध्य दीर्घायुषां यत्र यत्र यस्य संभवस्तद्राशिदशा
यां निधनमित्य[redacted]र्थः षष्ठेशात् पापचरस्थिरादिरूपायां निधनं स्यादित्यर्थः मारकमहाद
१ मारकस्य फलमाह तद्दक्षदशायां निधनं मारकग्रहाश्रितो मारकस्वामिको वा यो राशिस्तन्महादशायां चरस्थिरादिरूपायां

पित्रादीनां निधनकालेबोधयितुं पित्रादिकारकमुपदिशति रविशुक्रयोः प्राणी जनकः सूर्यभार्गवयोर्मध्ये यो वलवान् अग्रग्रहाणां ग्रहदृष्ट्या दिना १
स पितृकारकः स्यात् चंद्रारयोर्जननी चंद्रभौमयोर्मध्ये यो वली स मातृकारकः अथ पापपिपापदृष्टः रविशुक्रयोश्चंद्रा
रयोश्च मध्ये यो निर्वलः सोपि पापग्रहदृष्टश्चेद्यथाक्रमं पितृमातृकारकतां लभते अथ प्राणिपित्रादिकारकस्य फलमाह पित्रादिकारकौ द्विविधः प्राणापप्राणिभेदात् ३
प्राणिनि शुभदृष्टे तत्काले निधनं मातापित्रोः पितृकारके मातृकारके वा प्राणिनि शुभदृष्टे सति पितृमातृकारकाश्रित
राशित्रिकोणदशायां पितुर्मातुश्च वा मरणं ज्ञेयं द्विविधकारकस्य फलमाह तयोर्द्वयोस्समवलेन तत्समत्वे ताभ्यां
प्राणापप्राणिकारकाभ्यां भावेशद्वयेयो पितृमातृकारकौ स्पष्टवलेधिकवले समस्य मेशाश्रित राशितस्त्रिकोणराशिदशा
यां निधनं भवतीत्यर्थः प्राह अधिकवलत्वं तु निवद्धमस्पष्टवलत्वं तु कोशाधिकवलत्वमिति याह्य आयुर्विचारात् पित्रादी
नामायुर्विचारणीये ऽसह्येतत्कारकं प्रकारांतरोक्तनिर्याणशूलदशादिकं च विचार्यमित्यर्थः पितृनिधनेविशेषमा
ह अर्कज्ञयोगे तदाश्रये त्रिके १२ लग्नमेषदशायां पितुरित्येके त्रिकेलग्नात् द्वादशराशौ तदाश्रये ऽर्कबुधाश्रये सिंहमि
थुनकन्यान्यतरराशिसत्वे ऽर्कज्ञयोगे सति लग्नमेषदशायां लग्नात्पंचमराशिदशायां पितुर्निधनं स्यादित्येके यदीति लग्ने
इति पाठे त्रिके मेषराशौ रविज्ञयोगाश्रये लग्ने सति मेषस्य दशायां पितुर्निधनमित्यर्थः अथ बाल्य एव मातापित्रो जातकवतो बालकस्य २
र्मरणयोगमाह अर्कपापमात्रदृष्टयोः पित्रोः प्राग्द्वादशाब्दात् पित्रोः मातृपित्रादिपितृकारकयोः प्राणिनोरप्राणिनो

५ अल्पायुर्योगभेदात् दशानयनेतद्व्यासंवारे तदायुर्दायाभरणादिनिर्णयादौ चान्यद्विशेषज्ञातं जातकवत इव द्वादशस्वभावेषु ज्ञातस्मुचितं भावं तत्कारकं तत्कारकाश्रयराशिमारूढा
दिकं द्वारवाह्यादि सर्वं संपाद्य सम्यगुन्नेयं इत्यर्थः टीका ५

शुभदृष्टेन
विवेचनीयं

गुरोः पतिकलत्रादिकारकत्वान्नदाश्रित[...]त्रिकोणादशायां निधनं स्यात् २

वीरविरहित पापमात्रे शोद्दृष्टयोः सतो द्वादशाब्दात् सर्वमेव मातापित्रोर्यथाक्रमं निधनं भवति रविशुभदृष्टे नायं योग
इति स्त्रीनिधनमाह गुरुसूले कलत्रस्य गुर्वाश्रितत्रिकोणादशायां पत्नीनिधनं स्यात् एवमन्येषामपि निधनमाह
तत्तत्कूले तेषां निधनं पुत्रमातुलादिकारकराशेस्त्रिकोणदशायां पुत्रमातुलादिनिधनमित्यर्थः मरणे शुभाशुभभे
दं दर्शयति सूत्रैः कर्मणि पापयुत दृष्टे दुःखं मरणं लग्नात्कारकाद्वा तृतीये पापेन युते दृष्टे वा दुःखं मरणं भवति शुभं शुभदृ
ष्टियुते लग्नात्कारकाद्वा तृतीये शुभेन युते दृष्टे वा शुभं मरणं स्यात् अग्निजलपतनं धनादि प्रयोज्यं दुःखं मरणं ज्वरादि
रोगप्रयोज्यं शुभमुच्यते मिश्रे मिश्रं शुभपापयोर्द्वयोरपि दृष्टे योगे वा शुभाशुभात्मकं मरणमित्यर्थः मरणनिमित्तानि
दर्शयति आदित्येन राजमूलात् तृतीये रवियोगे दृष्टे वा सत्यां राजहेतो मरणं चंद्रे यक्ष्मणा तृतीये चंद्रेण युते दृष्टे
वा यक्ष्मादितो निधनं शनिना वातरोगात् तृतीये शनिना युते दृष्टे वातरोगतो निधनं मंदमांदिभ्यां विषसर्पजलोद्वं
धनादिभिः तृतीये शनिगुलिकाभ्यां युते दृष्टे वा विषादिभिर्मरणं गुलिकस्य टीकरणमित्यत्रानुसंधेयं केतुना वि
सूचीजलरोगाद्यैः तृतीये केतुना [illegible] युते दृष्टे विसूच्यादितो मरणं चंद्रमांदिभ्यां क्षुद्रगमदान्नकवलादि[illegible]भिः क्षणि
कं तृतीये चंद्रगुलिकाभ्यां युते दृष्टे वा क्षुद्रकमदादिना सत्वरं मरणं गुरुणा शोफरुचि रवमनाद्यैः तृतीये गुरुणा दृष्टे
४ कुजेन व्रणशस्त्राग्निदाहाद्यैः तृतीये कुजेन दृष्टे युते वा व्रणादितो निधनं ४

एवं तत्तत्कारकात्तत्त्व
या तत्कीयाद्वा तृतीये पा
पयोगदर्शने दुःखं मरणं
तेषां तेषां भवतीति टिका ॥

एवं कलत्रादिभावतदी
शतदारूढादि पीडकत्व
ज्ञानकतद्वायुर्दायप्र
योगादि सर्वमपि सफलत्व
मानेयं इत्यन्यटीका २

राम
३२

सत्वे इति कुतो नोक्तमिति चेत् राहुकेत्वोरेकस्थाने स्थितेर्बाध्यत्वादित्येति नोक्तमिति अपवादमाह शुभग्रहयोगान्तं तत्र
लग्नादि द्वादशादि सप्तमेषु शुभग्रहयोगसत्वे पूर्वोक्तयोगो नस्यात् किंतु पित्रोः संस्कर्तास्यादेव ॥ इति जैमिनीयेद्वितीयेध्याये द्वि
तीयः पादः अथ दशाभेदबलभेदादीनाह तत्रादौ नवांशदशामाह विषमेतदादिर्नवांशाः अन्यथादर्शादिः विषमे लग्ने स
ति तदादिर्लग्नादिर्नवांशदशास्यात् अन्यथा समराशौ लग्ने सत्यादर्शादिः सप्तमराश्यादिर्नवांशदशास्यात् आदर्शः सन्मु
खो भवति सन्मुखराशिः सप्तमराशिः सप्तमराशिः सप्तमएव भवति एतद्दशायां प्रतिराशि नवनवाब्दा भवंतीति नवांशदशे
ति नामधेयं ज्ञेयं यत्तु स्थिरराशेः षष्ठराशिश्चरस्यादष्टमे [illegible]वसः द्विःस्वभावस्य राशिस्तु सप्तमः सन्मुखो मतः इति श्लोके सत्वा
सन्मुखत्वं कृत्वा पेयेरुक्तं तन्न तद्दृष्टिपरमेव न त्वन्यपरं अथ स्थिरदशामाह शशि ७ नंद ८ पावकाः ९ क्रमादब्दाः स्थिरदशा
यां चरस्थिरद्विस्वभावराशीनां क्रमेण सप्ताष्टनवाब्दा नियमाः स्थिरदशायां भवंतीत्यर्थः तथा मेषे सप्त वृषेऽष्टौ मिथुने न
व पुनः कर्के सप्त सिंहेऽष्टौ इति क्रमेण द्वादशराशिपर्यंतमब्दा ज्ञातव्याः एतद्दशायां भस्थानमाह ब्रह्मादिरेषा एषाद्दशा
ब्रह्मग्रहाश्रितराशिमारभ्य वर्तनीयेत्यर्थः अथ बलमधिकरोति अथमाणाः अथानंतरं प्राणो बलं तदुच्यते कारकयो
गः प्रथमो भानो भानो राशीनामाद्यं बलं कारकयोगो भवति साम्ये भूयसा ग्रहयोगसाम्ये उभयत्र ग्रहयोगसत्वेसति

भानां राशीनां प्रथमः आद्यः प्राणो बलं कारकयोगः स्वस्वकारकसंबंधः तथा च [illegible] प्रथमबलमित्यर्थः [illegible] १

न संस्कर्तेति न किंतु संस्कर्तैति यावत् १

राम
२८

शशि नंदेत्यादि स्थिरदशा ३

भूयसा ग्रहयोगेन बलं भवति ग्रहयोगभूयस्त्वादिभिरपि साम्ये निर्णायकमाह ततस्तुंगादिः ततो भूयस्त्वानंतरं तुंगादिब
लं स्यात् राशेस्तुंगस्वगृहे मित्रग्रहस्थग्रहयोगः प्राग्वदित्यर्थः आश्रयराशीनां निसर्गबलमाह निसर्गस्ततः ततस्तुंगादि
बलानंतरं निसर्गबलं ग्राह्यं चरात्स्थिरं स्थिरात् द्विःस्वभावं बली इत्यर्थः तदुक्तं शक्तेः अग्रहात्सग्रहो ज्यायान्सग्रहेष्वधिक
ग्रहः साम्ये चरस्थिरद्वंद्वाः क्रमात्स्युर्बलशालिन इति तदभावे स्वामिन इत्यभावः राशौ (तदभावे) कारकयोगा[illegible]भावे अभावे स्वामि
नो राश्यधिपतेरित्यभावः कारकयोगादिर्बलं यद्राशिनाथो बलवान्स राशिर्बलीति भावः यत्तु अविशेषात् एकराशौ बहुग्र
ग्रहाणां ६ हेषु सत्सु तेषां राशिद्वारकबलसाम्येपि अत्रास्मिन्ग्रंथे आम्नाय योग्रहो विशेषाद्बली भवति अत्रैमायतनगतः आम्नायत एव ग्र
आयत्तः अधिकांशा इति यावत् तथा च बहुग्रहेष्वेकराशिस्थेष्वधिकांशको बलवानिति प्रातिवेशिकः पुरुषे ओजराशौ प्रा
पुरतः ४४ तो वा ४ तिवेशिकः पार्श्वराशिवर्ती द्विद्वादशगतोपि ग्रहः स्वस्वबलेकलीस्यात् इति प्रथमः इति प्रोक्तप्रकारेण प्रथमः प्राग्वदि
त्यर्थः स्वामिगुरुज्ञदृग्योगैर्द्वितीयः स्वामिगुरुयोगो बुधयोगश्चैकैकशो राशीनां बलं भवति स्वामिदृष्टिर्गुरुदृष्टिर्ज्ञदृ
ष्टिर्बुधदृष्टिश्चैकैकशो द्वादशराशीनां बलं स्यात् एवं षड्बलानि द्वितीयः प्राग्वदित्यभिधीयते द्वितीयं भावबलं इत्यग्रिम
श्लोके द्वितीयं बलं ग्राह्यमिति स्पष्टीकृतं स्वामिनस्तृतीयः स्वामिनो राश्यधिपतेर्वक्ष्यमाणाः प्राग्वत्तृतीयः प्राग्वदित्यर्थः

एकादशादिस्थूलदशाज्येष्ठभ्रातुर्निर्याणाय ४ पापदृग्योगः पापैरेकादशोदृष्टिः योगः ग्रहयोगश्च बलमित्यर्थः यदा पापदृग्योगः स्थूलदशादौ कश्चित् कश्चित्कारको भवती
ति तुंगादिः तुंगमूलत्रिकोणस्वर्क्षातिमित्रमित्रनीचादिभिरतो भवति ग्रहयोगः ग्रहयोगोऽपि प्राणाय इति वा चारः इतिस्थानबलनिकरादिभेदेनत्वाश्रयाणामित्यर्थः टीकास्वामिकृता ११

एवं तत्र ज्ञातव्यं स्थूलदशा
तत्र ज्ञायते नाथायेत्सूत्रं ५

५ कारिते लग्ने वा विषमे
ततश्च दशाप्रवृत्ति
समे चेत् स्थानमतिक
रः सप्तमं वा कर्तव्य
इत्यर्थः ५

नष्टचतुर्थेराशौ स्थूलदशायां शत्रौ पमातुर्निर्याणं स्यात् कर्मादिस्थानुः लग्नात्सप्तमाद्वा बलिनस्तृतीयराशौ स्थूलदशायां
भ्रातुर्निर्याणं मातृत्रादिर्भगिनीपुत्रयोः मातृभ्रात्रादिरितिपरिच्छेदः लग्नात्सप्तमाद्वा बलिनः पंचमराशौ प्रवृत्तस्थूलदशायां
भगिनीपुत्रयोर्निर्याणं अथादिज्येष्ठस्य लग्नात्सप्तमाद्वा बलिनः एकादशराशौ प्रवृत्तायां दशायां ततः स्थूलदशायां
ज्येष्ठभ्रातुर्निर्याणं पितृवत्पितृवर्गे लग्नात्सप्तमाद्वा बलिनो नवमराशौ प्रवृत्तायां दशायां पितृवर्गस्य पितृव्यादेर्निर्या
णं अथ ब्रह्मदशामाह ब्रह्मादिसमादासंतानाः पुरुषे पुरुषे विषमलग्ने सति ब्रह्मादिब्रह्मस्थग्रहाश्रितराशितो दशा प्रव
र्तनीया समादासंताना कोऽर्थः स्वराशेः षष्ठराशिस्वामिनं समादशाद्यां ग्राह्याः ननु दासांतशब्देन षष्ठराशिस्वामिनमित
र्थः कथमिति चेत् उच्यते षष्ठस्वमित्यंत वर्षानयने सर्वेषां संमतत्वात् दासस्य सुतरां वर्षाभावाद्वापोग्यत्वात्स्वामिनं तदित्यर्थः संप
न्नइति चेत् वर्षानयनं ब्रह्मादिगणनात् तदापुरुषे ब्रह्मादिसमादासंतानाद्धितिस्तत्र प्रणीतं स्यादिसम●ले स्थानमतिकरः
तत्रस्थानमतिकरः सप्तमस्यैवेदोस्ति अयंभावः विषमे आदौ ब्रह्माश्रितराशिदशा ततः क्रमेणान्येषां समे लग्ने तु आ
दौ ब्रह्माश्रितसप्तमराशिदशा ततो व्युत्क्रमेणान्येषां राशीनां दशा विषमे ब्रह्मादि समे तु ब्रह्मसप्तमादि क्रमव्युत्क्रमभेदे
न दशा आनेया इति फलितार्थः अथ चतुर्थबलमाह पापदृग्योगः तुंगादियुग्योगः पापग्रहाणां दृष्टियोगं वर्त्मा
शेर्बलं भवति तुंगमूलत्रिकोणस्वर्क्षादिनिमित्तराशिस्थितशुभग्रहयोगश्च बलं स्यादित्यर्थः यत्तु तुंगादिरितिपाठ
शोध्याह्याः ओजे क्रमव्युत्क्रमदृष्ट्यादि पूर्ववत् लग्ने समे सति ब्रह्मग्रहाश्रयराशितः सप्तमं तत्र सर्वत्र षष्ठांतं समाख्याद्याः यदा ब्रह्मग्रहे ओजे सति ब्रह्मतोऽतः षष्ठांतगणना ब्रह्मग्रहे समे सति
सप्तमतः षष्ठांतगणनेति ५ इत्यर्थः कृतोऽस्मट्टीकातः

५ अथ बलविशेषं दर्शयति स्थानमतिकरः स्थानयोः अतिकरः अन्यथः लग्नेशः एकादशो एकादशो वा लग्ने तुम्या
दिस्थानकसप्तयो पित्राशा यदा स्थानमतिकरः सद्वर्गादिस्थानसंबंधः यदास्य बलमित्यंदृष्टं सप्तमेशानामिति ३

तृतीयमारभ्य प्रवृत्तदशा
यां भ्रातुर्निर्याणं १
पंचमादिप्रवृत्तस्थूलदशा २

५ पूर्वोक्तलक्षणा क्रौ तेषां
ब्रह्मग्रहस्थग्रहमारभ्य
षष्ठांतदशा द्वादशगणनीयाः
पुरुषे ओजे लग्ने सत्यर्थः अथ
मायाः ओजे लग्ने सति रवि
चंद्रमंगलादिपाठक्रमेण ब्र
ह्मणो यः षष्ठः रवेः शुक्रः के
तोर्गुरुरिति क्रमेण सिद्धः स
ब्रह्मग्रहाश्रितराशितो याव
त्समे राशौ तिष्ठति ब्रह्मणा श्रि
तस्तद्राशिपर्यंतं समाख्या
यदा ब्रह्माश्रितराशिमार
भ्य षष्ठराशिपर्यंतं समाख्या
इति एतेः द्वा आपुर्वीयां

अस्मट्टीकातोऽर्थो लिख्यते नवमे ओजपदं चेत्क्रमात् युग्मपदं चेदुत्क्रमाद्दशा नेया मेषादित्रिकं त्रिकं क्रमतः ओजपदं युग्मपदमिति व्यवह्रियते नवमे ओजपदांतर्गतराशिश्चेत्क्रमः अन्य
थाप्युत्क्रमः यद्वा पदमारूढं नवमे आरूढराशिर्यदि विषमस्तर्हि क्रमः यदि समस्तर्हि उत्क्रम इति यद्वा पंचमे पंचमभावे पि इत्यर्थो ग्राह्यः इदं पदक्रमार्थं दशांतरमेवेति वेदितव्यं चरद
शायावत् अत्र नाथांतादुत्यद्यानयनं ५

~~इति योगविभागं कृत्वा तुंगादिवलं ग्रहस्य ग्रहवलं स्वस्थादि स्वर्क्षे~~ यत्तु तुंगादीति योग इति योगविभागं कृत्वा तुंगादिवलं ग्र
हयोगवलं चेत्युक्तं पंथेऽस्तु तन्न पापदृग्योग इति सूत्रेण पापदृग्योगवलमुक्तमेव ग्रहयोग इति सूत्रे शोचनदर्थं लाभांतौ न
३. पापदृगित्येववक्तव्ये योगपदं व्यर्थं स्यात् तस्मात्पापग्रहाणां यत्र कुत्र स्थितानामपि योगे वलं शुभग्रहाणां तुंगादिस्था
नामेव योगे वलं न तत्रस्थानामिति भावः इति चत्वारः कारकयोगमित्यादिना त्रयः पूर्वोक्ताः एकोयमिति चत्वारः आगा
इत्यर्थः पूर्वोक्तमुत्क्रमभेदमाह पंचमे पदक्रमात् आरूढमुक्तं त्रिभिस्त्रिभिर्भैरसमैः समं च पदानि चत्वारि भवंति च तम
क्रेइ लग्नान्नवमे ओजपदांतर्गतराशिश्चेत्क्रमात् युग्मपदांतर्गतराशिश्चेदुत्क्रमाद्दशा नेया पूर्वं चरदशावर्णन ४
यनमात्रमुक्तं क्रमव्युत्क्रमभेदानुनोक्तस्तस्मादत्रोक्तमानमेवात्र ग्राह्यमिति चरदशायामत्र शुभः केतुः पंचम इति सूत्रे ५ ६
दशारंभावधेरनुक्तत्वादत्र चरदशायां केतुः शुभः शुभग्रहफलद इति इति जैमिनिसूत्रव्याख्यायां सुबोधिन्यां द्विती १० ११
याध्यायस्य तृतीयः पादः समाप्तः द्वितीये भाववलं स्सां चरनवांशे चरराशेर्नवांशदशायां द्वितीये भाववले स्वामिगु १२
रुदृग्योग इति फलादेशाय ग्राह्यमित्यर्थः अथ द्वारवाह्यराशीन्दर्शयति दशाश्रयो द्वारं ततस्तावतिथं वाह्यं यस्मिन्का राम
ले यस्य राशेर्या दशा चरस्थिरपर्य्यायतस्तद्दशाश्रयो राशिर्द्वारमित्युच्यते एतमेव पाकराशिरिति व्यवहरंति लग्नाद्या ३७
द्वारराशेः १ वत्संख्याको द्वारराशिस्तस्मात्तावत्संख्याको राशिर्वाह्यमिति निगद्यते एतमेव भोगराशिं वदंति अत्र लग्नशब्देन ज वाह्यराशिमेव १
स्थिरनवांशदशास्तु प्रतिराशि नव नव वर्षाणीति वेदितव्यं २

२ अयोराशि: परि
ग्राह्य: आद्यदशा

न्मकालेयद्राशिस्थितः आयुर्मिकीदशासमारभ्यतेसराशिर्ग्राह्यः लग्नंसप्तमोवात्रलग्नस्तयोराश्रितराशिर्वायस्यायोग्यमाद्य
दशाश्रयराशिरेवपाकराशेरेवविधिर्नप्रसिद्धंलग्नं एवंचेन्नोच्येतर्हिसएवभोगराशिश्चपर्यायेप्रथमेस्यात्तद्गति [redacted] नलग
ति यत्रसप्तमात्प्रहस्ताश्रितराशितोवादशाप्रवृत्तिस्तत्रयः पाकराशिःसभोगराशिरिति नसंभवति तदुक्तंवृद्धैः चरेतुभितमा
गःस्यात्प्रथमपष्ठादिकाःस्थिरेः उभयेकंटकाज्ञेया लग्नपंचमभाग्यतः चरस्थिरद्विस्वभावेष्वेतेषुपाकक्रमोमतः तेष्वेवत्रि
षुयुग्मेषुग्राह्यंव्युत्क्रमतोखिले एवमुद्धिश्चितोराशिःपाकराशिरितिस्मृतः सएवभोगराशिश्चपर्यायेप्रथमेस्मृतः लग्ना
द्यायावतिथःपाकःपर्यायेयत्रगृह्यते तस्मात्तावतिथोभोगःपर्यायेतत्रगृह्यतां तदिदंचरपर्यायस्थिरपर्यायपर्योईयोः त्रि
कोणागम्यदशायांचपाकभोगप्रकल्पनोभितिपर्यायेदर्शीमित्यर्थः अत्रद्वारबाह्ययोःफलमाहत्रिभिःसूत्रैः तयोःपापेवंध
योगादिः तयोर्द्वारबाह्ययोःपापग्रहेसतितद्दशायांबंधादिःस्यात् तदुक्तंवृद्धैः पाकेभोगेचपापाढ्येदेहपीडामनोव्यथेति स्व
क्षेस्थिततस्मिन्नोपजीवस्य तस्मिन्द्वारेवाह्येवाराशौपापाश्रयीभूतेःस्वपापस्यपरंतूपजीवस्य उपसमीपेजीवोयस्येतिगुरु
समीपवर्तिनः स्वक्षेस्थितोमत्तां [redacted] नबंधादिरित्यर्थः पाकभोगाश्रितःपापोयदिस्वक्षेगुरुयुक्तस्तर्हिउक्तदोषोनेतियावत्
तथि भयन्तयोगोक्तसर्वमस्मिन् अस्मिन्द्वारेवाह्येविरासभ्यांजातायेयोगास्तेषूक्तंसर्वंशुभाशुभफलंवेदितव्यमित्यर्थः अथकें
द्रदशारंभस्थानभेदंदर्शयति पितृलाभप्राणिनोयं लग्नसप्तमयोर्बलवान्राशिस्तस्मादयंवक्ष्यमाणादशाक्रमोज्ञेयः

र्थः अथ द्वितीयेध्याये कर्मणापापयुतदृष्टेमरणनिमित्ता यदि द्वादशानि तत्रानीतानि निमित्तानि योगभेदेन दर्शयति अ
६६ त्रगुरुयुक्ताद्भिरितिः तत्रादौ निरूपपदाबलेनयोगविशेषायतं मरणनिमित्तमाह तत्रगुरुकेपापदृग्योगेपापवाणामर
णं द्विविधादपिपदादशमेगुरुयुक्ते पापदृष्टेपापयोगेवा पापवाणामरणंभवतीत्यर्थः द्विविधादपि पदोपपदान्मुनरपि मर
णनिमित्तविशेषसूचकं योगभेदमाह अत्रकेतुयुक्तेदोषेण तन्नं पदादशमादशमे पदात्तीरस्थान्मकेकेतौ दोषेणास्थग
तापराधेन हेतुभूतेन हिंसनेन परेणाहतं मरणं वसाधि भवतीत्यर्थः अथ दोषहननेनैव योगान्तरं दर्शयति केतोः पापदृ
ष्टेवा लग्नसप्तममन्तरपदे पापग्रहदृष्टे सतां दोषेण परावलक्षणेन परहननहिंसनं भवतीत्यर्थः अथ द्वितीयध्याये
राहुग्रहमरणयोगः कर्मणीत्यादिना समानतत्रानाम्नो बहुमरणयोगविशेषान्कौ विदर्शयति अत्र शुभयोगे
मलिनाभावेनातिराशौ कर्मणि शुद्धं मरणं निरूपपदतो दशमे नवमे सप्तमे एकादशानां द्वादशे पदात्पञ्चदशस्थानके द्वि राम ६६
तीये तृतीये वा पापदृग्ग्रहदृष्टे सतां दुष्टं मरणं भवतीत्यर्थः अथ पदादशमादिस्थानाश्रयेशूलादिरोगमाह क्रूराश्र
येसर्वंशूलादिः पदतो दशमेनवमेसप्तमे एकादशादशमे द्वितीयेतृतीयेवा क्रूराश्रयेसर्वशूलादयो हृद्दरकुक्षिशीर्षादि
शूलपूर्वकरोगसामान्यं भवतीत्यर्थः अस्मिन्नेवयोगे रोगाभिभ्रमरणयोगमाह राहुदृष्टे निश्चयेन एतस्मिन्पदादश

र्भवति अथपुनरपि तत्रैव द्विप्रकारयोगभेदेन दर्शयति तत्र कर्मादि यथापदमादितः कृत्वा तदष्टमाष्टमस्थितयोर्भौ
मात्मकारकाभ्यामेकादशाष्टमभिर्द्वित्रिः तयापदयोरुभयोर्द्वितीयतृतीयराश्योरन्यतरमादितः कृत्वा तदष्टमस्थिताभ्यामा
प्यात्मकारकमंगलाभ्यां एकाष्टवृद्धिर्ज्ञेयेत्यर्थः अथ द्वितीयेष्वायेस्थिरदशायां यथाखंडुनिधनं तत्रर्क्षविशेषद्रुतुपक्रमपा
पमध्येतदीशयोरित्यादिनानिधनराशिनिर्णीतिः तत्रैवात्मकारकमंगलस्थितिविशेषेण निर्याणराशिम परं दर्शयति चर
चरयोर्विपरीतकाले लग्नसप्तमपदान्यतरस्माद्द्विदशयोः स्थिताभ्यामात्मकारकमंगलाभ्यां विपरीतस्यपदं कृत्वान्यतरदा
मराशेः कालेप्रथमाद्यन्यतमोभ्यंतरखंडस्यप्रभेदोस्थिरदशारीत्यादशमसमयेनिधनमित्यर्थः अत्रनिधनमितिपदस्य
त्रस्मास्थिरदशायामितिसूत्रशेषत्वेन तत्सूत्रादागतमिति विवेचनीयं अथस्थिरदशायां यथाखंडुनिधनं तत्रर्क्षविशेषः
इतिसमुपान्नराशिविशेषो निधननिमित्तभूतः पापमध्येपापकोणे परपापेवातदीशयोः क्षीणेंदुशुक्रौ दृष्टावितिसूत्रा
भ्यां पापमध्यवर्तिराशेः पापाक्रांतत्रिकोणराशयोः पापाक्रांतयोः क्षीणेंदुशुक्रदृष्टयोर्वा मिनोर्वा द्वादशाष्टमराशयोः दशायां नि
धनमितिकथितं संप्रतितत्रैवविशेषेनिधनायराशिविशेषयतदीशायोरितिसूत्रावलंबेन दर्शयति ततोर्कसपत्नीदृष्टा
पदमध्येपदतृतीये पदे वाद्विविधे दृष्टाकेवलक्षीणेंदुशुक्रयोर्दृष्टेदुष्टवतीयपददशायांयथाखंडुमित्युक्तं निधनं भवतीत्य

३ दीर्घं प्रथमद्वितीययोरंत्ययोर्वा मध्यं मध्ययोराद्यंतयोर्वा हीनं एवं मंदचंद्राभ्यां पितृकालतश्च पित्राम भागे चंद्रे चंद्रमंद
भ्यामिति दीर्घमध्याल्पलक्षणा रायुरानीतं एवमानीतायुर्योग भेदस्यापवादो पि ह्रासवृद्धिलक्षणस्तत्राम्नातः शनैर्योगस्
तो कक्षाह्रासः विपरीतामित्यनेन नस्वर्क्षतुंगकेवपापदृग्योगिनी चेति शन्यबलेन कक्षावृद्धिह्रासौ निरूपितौ एवं त
त्रैव पितृलाभगे गुरौ केवलभद्रापयोगिनि च कक्षावृद्धिरिति वृहस्पत्यधर्मबलेन निरूपणा युर्योगापवादतया कक्षावृद्धिः
पठिता एवं पुनरस्या युर्योगः पठितः पितृलाभरोगेशा प्राणिनि कंटकादिस्थनश्चैव रत्रिधेति त्रिविधमप्यायुस्तंतदपवादो
पिपठितः योगात्समे स्वस्मिन्विपरीतं अयपुनस्तत्रैव मध्यायुर्योगापवादाः साधारणे न पठितः पितृलाभयोः पापमध्य
त्वे कोणापापयोगे वा कक्षाह्रासः स्वस्मिन्नप्येवं तस्मिन्नपि जीवे तुंगे शुभसंयुक्ते चेति एवं तत्रैव कक्षाह्रासापवाद प्र
संगे न कक्षावृद्धिरपि परिगृहीता अमदमध्या गुरोचेति अत्र सर्वत्रापि आत्मकारक मंगलयोर्द्वितीय तृतीये कादश
योर्द्वितीयाध्यायोपात्त दीर्घमध्याल्पायुर्योगानां येपवादा नानाविधाः ह्रासवृद्धिलक्षणाः पठितास्ते न भवंति प्रथमयो
गायैर्निर्दिष्टास्त एव तथाभूता इति भावः अथ द्वितीयाध्याय्योक्ताः कक्षाह्रासादिरस्थलेषु यः सर्वत्र कांश्चिद्वृद्धियोग राम
भेदेन तद्दर्शयति दिनदिनेः पुराणं लग्नसप्तमपदयोर्यो वृषमोराशीनतो वृषराशौ मंदारास्तां पुराणं एकादशाद्वृद्धि ५८

सद्योरिष्टंभवति यदाकेवलयोः ग्रहणस्थयोः लग्नतदष्टमयोः षष्ठेशाभ्यांरिपुरोगादिस्थाने युक्तयोर्हेतुसद्यो
रिष्टंभवति अथारिष्टंतद्दशामाह तत्रापिछिन्ननाथापहारे निरूढक्रूरास्त्रपराशिदशायामपि महस्योश्छिन्ननाथस्यप्र
ष्टेशस्यांतर्दशायामरिष्टंभवतीत्यर्थः इत्युपदेशसूत्रे जैमिनीयेतृतीयाध्यायेद्वितीयपादविवृतिः ॥ ७ ॥ अथद्वितीया
ध्यायोपात्तायुर्योगाद्यधीनम् तु भेदादिनिर्णायपल्लवसप्तमयोः पदमधिकारोयं लेयलाभयोःपदं लग्नसप्तम
योरिदंयत्पदं यावदीशाश्रयंपदमक्षाणामिमेवंलक्षणमिमधिकृतमिहेतिवेदितव्यं अथद्वितीयाध्यायेन्मनाविध
योगभेदेनायुर्निर्णीतंतदपवादाश्चबहवो निरूपिताः संप्रतिद्वितीयाध्यायोपात्तायुर्योगापवादानांप्रतिप्रसवंके
वलदर्शयति पदभावयोश्चेत्केमशिला [illegible] पापैर्मजाभ्यांयथानुबंधः अत्रपदपरमधिकाराः लग्नसप्तमपद
परं द्वयोरपिपक्षयोरिहपदपदेनसंग्रहः एवंचलग्नपदाष्टमराशेः सप्तमपदाष्टमराशेर्वेति निक्षिपतीति एवंचद्वि
विधपदाष्टमराशयोर्द्वितीयेतृतीयेएकादशेवाराशौ आत्मकारकमंगलाभ्यांस्थिताभ्यांद्वितीयाध्यायाम्नातयोग
भेदैरागतदीर्घमध्याल्पलक्षणंआयुः यथाप्रतिज्ञमेवभवतिनान्यथा एवंचद्वितीयाध्यायोक्तायेऽपवादाः कक्ष्या
ह्रासवृद्ध्यादिलक्षणास्तेनभवंतीत्यर्थः अत्रद्वितीयाध्यायेआयुःपितृदिनेशाभ्यामित्युपक्रम्यप्रथमयोरुत्तरयोर्वा

नि महेश्वरलग्नतोरंघ्रेतयोःश्चलनेवांशादशायांनिधनं अत्रनिरूक्तेषुयोगेषुप्रतिमहेश्वरस्त्रादिलग्नोत्थांतम:कार्य:
४२ तत्रमहेश्वरश्चलग्नराशियर्ययंतमर्वराशीनोचरनवांशदशानानालग्नाश्रितराशिसंगतचरनवांशदशायांनिधनंवक्ती
दिशोदितिभाव: अथयलग्नमहेश्वराश्रितराशितःषष्ठस्थानेशद्वयतोदुरिष्टयोगमाह चित्रनाथाभ्यांरिपुरोगाचित्रक
र्मीशौ क्रूरयहेषुसघोरिष्टं महेश्वरलग्नषष्ठाधिपद्वयात् द्वादशाष्टमषष्ठतृतीयेषुक्रूरग्रहसत्वेसघोरिष्टंभवति द्वि
तीयस्वकर्म्मस्थादिनामारकादिनिरूपणंकृतं तत्रानुक्तोयद्दृष्टेत:इतिविवेकम् अथपुनरपिमहेश्वरलग्नस्थग्रहचित्र
नाथावलंबेनाष्टयोगमाह शनिराहुचंद्रयोगेषुसघोरिष्टंमहेश्वरलग्नराशित:षष्ठेयोराशीनदधिपद्वयात् पंचमदश
मद्वितीयसप्तमेषुक्रूरग्रहेषुसत्सुसघोरिष्टमित्यर्थ: अथप्रकारांतरेणाप्यरिष्टयोगंदर्शयति कोणाश्रयेषुसघोरिष्टम्
महेश्वरलग्नचित्रनाथायेनतसंबमेतन्नवमेचक्रूरग्रहसत्वेसघोरिष्टंभवतीत्यर्थ: अथारिष्टयोगांतरमाह सर्वमेवं
पापग्रहेषुच महेश्वरलग्नचित्रनाथाभ्यांरिपुरोगचित्रकर्मसुशनिराहुचंद्रयोगेषुकोणाश्रयेषुवापापराशिषुसत्व राम
पिक्रूरग्रहवदेवसघोरिष्टयोगोभवतीत्यर्थ: अथप्रकारांतरेणारिष्टयोगमाह केवलंरिपुरोगचित्रनाथाभ्यां के ४८
वलग्रहाशोद्वादशाष्टमेतयोःषष्ठेशाभ्यांरिपुरोगचित्रकर्म्मस्थिशनिराहुचंद्रयोगेषुकोणाश्रयेषुच क्रूरेषुसत्सु

अथाष्टमराश्यंतर्दशायां निधनं भवतीत्यर्थः अथलग्नात्द्वितीयराशिदशायांशनियोगे न निरूढमरणस्यापवाद
मिश्रेशुभयोगान्न लग्नेशुभयोगान्निरूढंमरणं न भवतीत्यर्थः अथद्वारबाह्यराशिमाह्निस्यापवादेमरणराश्यंतरंद
र्शयति लग्नेदोर्भाग्येस्वल्पाभयोर्भाग्ययोः क्रूरेरुद्राश्रयेपि लग्नस्यचंद्रस्यवाष्टमेक्रूरग्रहे सति आत्मकारकग्रहात् ल
ग्नसन्नमराशेश्चाष्टमयोरुभयोरपिक्रूरग्रहेसतिरुद्रग्रहाश्रितराशिदशायां निधनं भवतीत्यर्थः अथयथाशनियोगा
दापवादास्तत्रशुभग्रहादिरूना:श्रितास्तथाकराश्रयमरणाप्रदयोगेअपवादानसंतीत्याह नवापवादाः रुद्राश्रयम
रणप्रदेयोगेनैवापवादाइत्यर्थः यद्वाद्वितीयाध्याये केचनापवादाइत्युक्ताः ननःपरमपवादाः अस्मेशिष्टानसंतीत्य
र्थः अथवायद्गजनेशाभ्यांइति गुरुकेंद्रेति नत्रयानेइति चरइति स्वपित्र्यचंद्राइति शुभदानि सौरेति द्वादशाइति मि
श्रइति चेहनापवादाद्वितीयाध्यायेतदध्यायसाधारणेननिबद्धाइत्यर्थः अथप्रकारांतरेणमरणराशिनिर्णयपूर्व
कमाह इहशुक्राभ्यांयोगयोः यामायपान्निधनं रविशुक्राष्टमराशयोर्मध्येयत्रमरणयोगवाहुल्यंतद्दशायांमरण
मित्यर्थः अष्टांत्रषेक्रूरस्वैः शाश्रितलग्नशुभग्रहाश्रितत्वादिकंमरणदायकं तदाहुल्यंयथायोगमिह विवेकं अथद्वि
तीयेब्रह्मणोयावसरेश्वरक्षेदशांतमायुरित्युक्तं संप्रतिनिरूढेषुयोगेषु उपमहेश्वरादिब्रह्मणोतमायुरितिमत्यर्यंदर्शी

५१ गेशांतुंगे नवांशस्य द्विरिसेवं लक्षणा: तस्य सकलस्येन्हापवादो भवतीतियावत् अथ द्वारवा ह्यवाह्यमालिन्या
दिकृत निधनापवाद भूतशुभफलयोगस्यापमपवाद: सोरिति प्रकृतस्त्रावगत: तस्यापवादं दर्शयति द्वारे
चेद्रस्ययोगान्न द्वारराशौ: चंद्रदृष्टौ चंद्रयोगे सति वाद्वारादिशुभफलापवादो नेत्यर्थ: अथवादातृस्माह केव
लशुभसंबंधेवा ह्यैव वाह्यराशौ शुभमात्रस्या: शुभराहितस्य च संबंधे वसति शुभफलापवादस्यापवाद इत्यर्थ: संबं
धे सत्यपवादो नस्त्वय: तथाचापवादे द्वितीयाध्यायोक्तशुभफलसिद्धिरिति भाव: अथ द्वारवाह्यशुभापवादस्यापवादं
तस्माह लेयरोगक्रूरअथेपि लग्नाष्टमे क्रूरग्रहेसत्यपि द्वारवाह्यराशिशुभफलापवाद: सोरदृष्टियोगाभ्यामिति
सत्रप्रापितो नेत्यर्थ: यद्वा द्वारवाह्यराशिशुभफलस्य द्वितीयाध्यायोक्तस्य सौरस्त्रवदपवादमाह लेयलग्नाष्टमे
क्रूरग्रहे सति द्वादशराश्यादिशुभस्यापवादो भवतीत्यर्थ: अथ द्वारवाह्यराशिमालिन्यकृतमरणापवाद तेर्हि किंरा
शिदशायामध्ये मरणमित्याकांक्षायामाह रोगत्रिकोणादशाद्रेगनवांशादशायांनिधनं अथ नादष्टमत पंचमत राम
न्नवमराशिदशायामष्टमराशिनवांशांतर्दशायांनिधनंभवतीत्यर्थ: अथवा ह्यराशिमालिन्यापवादविषयनिर्यो ५१
गोपाठांतरं दर्शयति तत्रापिशनियोगे लग्नाष्टमराशित्रिकोणे शनियोगेसति लग्नात्द्वितीयराशिदशायां अ

वेशयो रैक्ये योगे वा स्वपितृचंद्रेषु आत्मकारकेलग्नयो र्द्वेष्यं चंद्रयोस्तनो द्वादशाष्टमयोश्च यथा योग संयोगघटकीभूताशु
भदृष्टे शुभयोगे च सद्द्इति न कक्ष्याह्रासः सनिहतो भवति एवं च यत्र लग्नाष्टमसप्तमाष्टमेशयो रैक्ययोगे वा न दृष्टि अपि ता
यं कक्ष्याह्रासो भवतीत्यर्थः अन्यथा च कक्ष्याह्रास वाहुल्ये तदपवादस्य शुभदृग्योगादि वाहुल्ये च निरुक्तरीत्या संख्याने सति
ग्राह्याग्राह्योपपक्षौ विशदयति अत्राप संवादात्मामाण्यं अत्र कक्ष्याह्रासेषु तदपवादेषु च यत्र यत्र वाहुल्यं अल्पेना
पि प्रकारेण तत्रैव ह्रासे वा तदपवादे वा प्रामाण्यं भवति यस्मिन्पक्षे वहुनामैक्य ग्राह्यो नाल्पः पक्ष इति भावः एवं च ह्रा
साधिक्ये ह्रास एव स्त्री कार्यः अपवादाधिक्ये ह्रासो न स्त्री कार्य्यः इति सिद्धं अथ मलिने द्वारवाह्ये नवांशे निधनं
द्वादशयोश्च मालिन्ये इति निधनराशिनिर्णयः शुभदृग्योगान्न रोगेशे तुंगे नवांशाह्यद्विरिति द्वितीयाध्याये द्वारवाह्य
नवांशादि निधनापवाद पठितस्यापवादं वक्तुं अधिकारपरं सूत्रं प्रवर्तयति रोगतुंगयोः प्राणी अधिकारपरो लग्ना
त् द्वादशाष्टमयोर्वली अग्रस्तादित्यनिमायेन सता वदिह्राधिहृत इत्यर्थः अथ द्वारवाह्यादिमालिन्य प्रयुक्त नवांश
निधनापवादस्य शुभदृग्योगादिलक्षणस्यापवादं द्वारवाह्य नवांशादि निधनपर्य्यवसन्नं दर्शयति सोऽदृष्टियो
गाभ्यां द्वारवाह्ययोरपवादः लग्नात् द्वादशाष्टमयोः प्राणिनि शनिदृष्टे शनियोगे सति द्वितीये ध्याये निरुक्त
स मलिने नवांशे द्वारवाह्ये निधनं द्वारद्वारेशयोश्च मालिन्ये इति निधनस्यापवादे शुभदृग्योगान्न रो

वीहीनत्वमितिद्वितीयपठितोहीनायुः कल्पोयौतयोर्मध्यमध्ययोरितिकल्पः प्रहृतेऽस्मिन्धायुषिस्थिरेमध्यमितिपठितः
५. आद्यंतयोर्वोर्हीनमितिकल्पस्तुअनेनाप्यल्पायुष्येवंद्वयाभ्यामितिपठितं तथाचप्रथमयोरित्युपात्तमाद्यंतयोरितिकल्पि
तचक्रद्वयेप्याविरुद्धतमेवामापितुकोष्ठेअल्पस्थानिभवंति एवंचद्वितीयाध्यायोक्तचक्रापवादतास्यचक्रस्यसिद्धेतिवेदित
व्यं अथद्वितीयाध्यायप्रथमपादेशनैयोगाहेतोकक्ष्याह्रासः पितृलाभयोःपापमध्यत्वकारणपार्श्वयोगेवाकक्ष्याह्रासः स्व
क्षित्वतथैवं तस्मिन्नापनीचे ३ तुंगे ३ शुभसंयुक्तेचगुरौचेत्यादिनाकक्ष्याह्रासोनिरूपितः एवंचतेषुकक्ष्याह्रासनिमित्तभूतेषु
योगेषुह्रासहेतुभूतयोगांतरंसूत्रयन्नाधिकरोति। स्वपितृचंद्राः आत्मकारकः लग्नचंद्रइत्येते ३ ग्रे ३ षिहृतावेदितव्या इत्य
र्थः अथकक्ष्याह्रासयोगौद्वाभ्यांसूत्राभ्यांदर्शयति तत्रशनिदृष्टौकक्ष्याह्रासः रिपुषष्ठयोश्च द्वितीयाध्यायप्रथमपा
दपठितेआयुर्योगेष्वेतत् पादपठितायुर्योगेषुच आत्मकारकलग्नचंद्रेषुत्रिषुपिशनिदृष्टेषुसत्सुकक्ष्याह्रासोभवतीत्यर्थः
अथात्रस्वपितृचंद्रेषुत्रिष्वपिशनिदृष्टे त्रिभागपिद्वादशाष्टयोः शनिदृष्टौचकक्ष्याह्रासोनिरूपितः संप्रतिद्वयोःशनि
दृष्टौद्वाभ्यांपरयोःद्वादशाष्टयोर्वाशनिदृष्टौकक्ष्याह्रासइतिसूत्रयाहिक्रियादर्शयति अथप्रथमसप्तमयोरंत्य
मध्ययोर्वा आत्मकारकलग्नयोर्लग्नचंद्रयोर्वाशनिदृष्टौतद्विकस्यद्वादशाष्टयोर्वाशनिदृष्टौसत्याः कक्ष्याह्रासइ
त्यर्थः अत्रस्वपितृचंद्राइत्यादिनोक्तेकक्ष्याह्रासपक्षेऽपवादातद्वाभ्यांसूत्राभ्यांदर्शयति शुभदृग्योगान्न पितृलाभया ५.

वा हीनत्वमिति द्वितीयपठितो हीनायुः कक्ष्यो यौतयोर्मध्यमध्ययोरिति कल्पः प्रवृत्ते मध्यायुषि स्थिरे मध्यमिति पठितः
५. आद्यंतयोर्वा हीनमिति कल्पसूत्र अनेनाप्यल्पायुष्येव द्वंद्वद्वराभ्यामिति पठितं तथा च प्रथममयोरित्युपात्तमाद्यंतयोरिति कल्पि
तं च तद्द्वयेनाविरुद्धमेवा मा पितृकोष्ठे अनल्पानि भवंति एवं च द्वितीयाध्याये कक्ष्याक्रमापवादूतास्य च कक्ष्यसिद्धेनिवेदित
ं अथ द्वितीयाध्यायप्रथमपादे शनियोगहेतोः कक्ष्याह्रासः पितृलाभयोः पापमध्यत्वकारणपार्श्वयोगे वा कक्ष्याह्रासः स्व
स्मिन्नप्येवं तस्मिन्पापनीचे ३ तुंगे ३ शुभसंयुक्तेच गुरौ चेत्यादिना कक्ष्याह्रासो निरूपितः एवं च तेषु कक्ष्याह्रासनिमित्तभूतेषु
योगेषु ह्रासहेतुभूतयोगांतरं स्पष्टयन्नाधिकरोति स्वपितृचंद्राः आत्मकारकः लग्नं चंद्रस्तेभ्यो ३ ग्रे ३ धिकृता वेदिता या द्रष्ट
र्थः अथ कक्ष्याह्रासयोगौ द्वाभ्यां सूत्राभ्यां दर्शयति तत्र शनिदृष्टौ कक्ष्याह्रासः रिपुषष्ठयोश्च द्वितीयाध्यायप्रथमपा
दपठिते आयुर्योगेष्वेतत् पादपठितायुर्योगेषु च आत्मकारकलग्नचंद्रेषु त्रिषु पितृशनिदृष्टेषु सत्सु कक्ष्याह्रासो भवतीत्यर्थः
अथात्र स्वपितृचंद्रेषु त्रिष्वपि शनिदृष्टेषु त्रिभोपि द्वादशषष्ठयोः शनिदृष्टौ च कक्ष्याह्रासो निरूपितः संप्रति द्वयोः शनि
दृष्टौ द्वाभ्यां परयोः द्वादशषष्ठयोर्वा शनिदृष्टौ कक्ष्याह्रास इति मतगयाहि क्रियादर्शयति अथ प्रथममध्ययोरंत्य
मध्ययोर्वा आत्मकारकलग्नयोर्लग्नचंद्रयोर्वा शनिदृष्टौ तद्विकल्पद्वयाद्द्वादशषष्ठयोर्वा शनिदृष्टौ समो कक्ष्याह्रास इ
त्यर्थः अत्र स्वपितृचंद्रादृत्यादिनोक्ते कक्ष्याह्रासपक्षे ह्यपवादात द्वाभ्यां सूत्राभ्यां दर्शयति शुभदृग्योगान्न पितृलाभमा ५.

मस्थानावलंबेन यज्ञजनेशयोरन्यतरस्योभयोरपि वात्मकारकतायां सत्यां द्वितीयाध्याये प्रथमचरस्थे आयुःपितृदिनेशा
भ्यामित्युपक्रम्य प्रथमयो रुत्तरयोर्वा दीर्घं प्रथमद्वितीययोरन्त्यतयोर्वा मध्यं मध्ययोराद्यन्तयोर्वा हीनमिति निरूक्तेश्चरस्थिर
द्विःस्वभावराशियुतेष्वायुर्योगेषु तदपवादतया कांश्चिद्विशेषानि दर्शयति सूत्रैः त्रिभिः सूत्रैः चरे प्रथमे स्थिरे मध्ये द्वंद्वे अन्त्याः
एवं चरस्थिराभ्यां स्थिरद्वंद्वाभ्यां द्वंद्वचराभ्यां चरे इति यज्ञजनेशाश्रिते कक्षे यदि चरे भवतः तर्हि प्रथमयोरिति सूत्रेणा
प्रथममुपात्तं दीर्घायुर्भवति स्थिरे इति यज्ञजनेशाश्रिते कक्षे यदि स्थिरे भवतः तर्हि मध्ये मध्यस्थानपठितं मध्यायुर्भवति
द्वंद्वे इति एवं यज्ञजनेशाश्रिते कक्षे यदि द्वंद्वे भवतः तर्हि अन्त्ये तृतीयस्थानपठितमल्पायुर्भवति तथा यज्ञजनेशाभ्यामा
श्रिताभ्यां स्थिरद्वंद्वाभ्यां मध्यमायुर्भवति एवं यज्ञजनेशाभ्यां ताभ्यामाश्रिताभ्यां द्वंद्वचरराशिभ्यां स्वल्पमायुरिति विभज
नीयं प्रथमयोरुत्तरयोर्वा दीर्घं प्रथमद्वितीययोरन्त्यतयोर्वा मध्यमं मध्यमयोराद्यन्तयोर्वा हीनमित्यपवादात् चक्रविरच

म		ना	क्र	के	ध
दी १	म २	म २	दी २	म २	अ ३ २
दी ३	म ३	म ३	दी १	म २	अ ३ ३

नाप्रकारः तत्र प्रथमयोरिति चक्रमप्येकमेव कोष्ठसमानं उत्तरयोर्वा दीर्घमिति दीर्घायुरुक्तः द्विती
याध्यायोक्तमित्यर्थः यथायुषि स्थिरद्वंद्वाभ्यामिति पठितं प्रथमद्वितीययोरन्त्यतयोर्वा मध्यमिति मध्या
युः कथितो यो कल्पो द्वितीयाध्याये पठितो तत्र प्रथमद्वितीययोरिति पक्षः प्रकृते रूपं चरस्थिराभ्या
मिति दीर्घायुः पठितः उत्तरयोर्वेति कल्पस्तु स्वल्पायुषि प्रसक्ते द्वंद्वे अन्तामित्युक्तं मध्ययोराद्यन्तयो

५५

रत्वेन तत्रभानाविस्म आम्नातेपि राहौ द्वितीयमिति राहुकल्पमेकग्रन्ताति नतुस्वपक्षमिति यावत् एवमुक्ते द्वेवस्थाने द्वे केत्व
शनिकेत्वोः संभूयावस्थाने सति नात्रशनिः समुचितः प्रथमः कल्पः किंतुसमुच्चितोत्रएवकल्पोभवति एवंचाल्पायुः पितृका
लतश्चेति कथितेसति सपक्षस्य भवतीतिसिद्धं केवलेति पातयो राहुकेत्वोः संभूयैकत्रावस्थानबाधादन्यतरस्सत्वस्य च राहोर्द्विती
यं केतोस्तृतीयं केनापि तिपक्षाभ्यामाक्रांतत्वात् पातयोरित्येतावन्निर्देशेपि धानिराहोः नधानिवारणाय केवलपदे प्रयोज
नाभावात् ग्रहांतराणां चधानिराहुकेतुषुविपरीतानांनिग्रहत्रयेस्यैव प्रस्तावेन प्रशंकाया भावात् केवलपदंश्रयमाणं केव
लग्रहपरं तथाचराशिमात्रदशालग्नंपश्यन्नेवस्त्र केवलः दशारंभे हेतुभूतलग्नात्मकारकराशिमात्रंपश्यन् दृग्गाणांशाल
ग्नंपश्यन् विद्यमानोग्रहः केवलनामेतिवल लक्षणाविशिष्टकेवलग्रहस्य राहुकेत्वन्यतरस्य च संभूयनिरुक्तेस्थाने षुए
कत्रसत्वेश्वादिः प्रथमंदीर्घायुः श्रायुः पितृदिनेशाभ्यामितिपक्षस्य परिग्राह्यत्वेन सिद्धं भवति अथतत्र मानोप्रथममि
त्यादिभिः षड्भिः प्रकारैः देधानिरूपितैः समागतेषु दीर्घमध्याल्पायुष्षु क्रमेणतृतीयमध्यमप्रथमखंडेषु यथायोगं निध
नराशिं दर्शयति नद्दक्षादशायां निधनं दीर्घायुरादियोगत्रियामकंधामाद्या श्रितराशिदशायां निधनंभवतीत्यर्थः
अथसामान्याकारेणराशिदशायांनिधनाश्रयत्वे सिद्धे यां श्रंतर्दशाराशिंदर्शयति नत्रिकोणेषु शम्भादियोगकर्तृग्र
हाश्रितराशितस्त्पंचमतन्नवमयापीनामय्ह्लक्षणा स्वंतर्देशासु निधनंभवतीत्यर्थः अथलेपलाभयोरितिसमुपात्तपक्ष

राम ५५

२४

वादात्मामारांपविसंवादे पितृकालतः पितृलाभोत्रयचंद्रे चंद्रमंदाभ्यामिति योगेत्रयोपि परस्परानुरूपत्वेनाह्युः कल्पस्तत्रैवैव
वस्थापितः तस्यामेवअवस्थायांप्रहृतेर्वअवस्थांतरमपिप्रदर्शयति तत्रेत्यादिभिः सूत्रैः तेषु प्रागुपपदस्थानेषु शनौ सति प्रथममायुः
पितृदिनेशाभ्यां इति प्रथमोक्तं स्याहुं तेष्वेवस्थानेषु बुधकेतौ सति पितृकालतश्चेति तृतीयस्थानपठितं स्याहुः राहौ सति एवं मं
दचंद्राभ्यामिति द्वितीयस्थानोक्तं स्याहु तथा तेष्वेवस्थानेषु केतौ सति पितृकालतश्चेति तृतीयस्थानपठितं स्याहुरिमित्यर्थः अथ
तेत्रस्थानादित्यादिभिः सूत्रैर्निरुक्तस्थानेषु शन्यादीनामेकतमसत्वे त्रिविधायुषु दीर्घमध्याल्पलक्षणेषु लग्नेशाष्टमेशयुग्म
लग्नकाललग्नद्वंद्वेषु वाम्नातमप्रकारउक्तः संप्रति तेषु स्थानेषु शन्यादीनां त्रयाणामेकत्रावस्थानवाधात् द्वयोर्द्वयोस्त
त्रावस्थानेन प्रथमादिग्रायकल्पात् सर्वतो विपरीतात् सामान्याकारेण दर्शयति शनिराहुकेतुषु विपरीतानि शनिरा
हुकेतुषु यथायथायोगं संभूय स्थितेषु प्रथमद्वितीयतृतीयकल्पलक्षणानि दीर्घायुरादिरूपाणि आयुः पितृदिनेशा
भ्यामित्यादियोगकर्तृस्वरूपाणि च विपरीतानि भवंति शनिराहुकेतुक्रमेण प्रथमद्वितीयतृतीयकल्पा इति अवस्था
नो विपरीतानि व्यस्तानि अन्याहृत्यानि भवंतीत्यर्थः तथा च शनिरित्यादिसूत्रं पक्षांतरपरिग्रहोपरीशिमितिसिद्धः अथाने
वपक्षान्विशिष्यत्रिभिः सूत्रैर्दर्शयति शनिराहुर्मध्यं शनिकेत्वोरंत्ये केवलयोस्तयोरादिः उक्तेषु स्थानेषु एकत्र श
निराहूः संभूय स्थितयोर्मध्यं भवति मध्यमायुः एवं मंदचंद्राभ्यामितुक्रमधममपक्षश्च भवति अत्र शनिः प्रथमकल्पक

रकास्थनिर्यानीतिरिआत्मकारकादन्यग्रहस्य राशिगे सति तथा नो प्रथमसूत्रोक्तयोगस्य प्रथमाष्टमराशीशत्वात्मकारकत्वाभ्यां
घटके सति निरुक्तायुर्दायेकक्ष्याभाः प्रोक्तरीत्या ह्रासो भवतीत्यर्थः अथ राहुकेतूपरिस्थितात्कक्ष्याया अपवादांतरमाह लेयला
भयोरित्युक्तप्रथमस्थानाद्यात नदेकादशराशौ वा गुरुराशौ वात्मकारकाद्भिन्नराशौ वा द्वादशाष्टमयोरन्यतरत्र राहुकेत्वोरन्यतरस्य
सत्वे प्रथमसूत्रोक्तयोगेवानो प्रथमाष्टमराशीशत्वात्मकारकत्वाभ्यां हेतौ सति पूर्ववद्देवागतायुर्दायेकक्ष्या ह्रसतीत्यर्थः अ
थ सूत्र: अथ द्वितीयाध्यायोपरिगृहीतेषु दीर्घमध्याल्पायुःकरयोगेषु नाम्यविषेषु दीर्घायायुष्करयोगं तत्राशा दर्शयति त्रिभिः
सूत्रैः तत्रशनो प्रथमं राहौ द्वितीयं केतौ तृतीयं लेयराद्विरूपाशि आयुः पितृदिनेशाभ्यामित्युक्तः प्रथमराशीति दशरा
शिहृहस्पतिः केंद्रराश्यात्मकाद्भिन्नराशिषु तुराशीनां द्वितीयेषु वा समे सति दीर्घमायुर्भवति तेषु राहौ सति मध्यमायुर्भवति ते
ष्वेव केतौ सति प्रयोल्पमायुर्भवतीत्यर्थः अथ द्वितीयेध्याये प्रथमो नयो वा दीर्घः प्रथमद्वितीययोरंशयोर्वा मध्यं मध्ययो राम
राद्यंतयोर्वा हीनं स्वतश्चैवं त्रिधेति दीर्घमध्याल्पायुषां प्रथमद्वितीयतृतीयसूत्रैः क्रमेणानिर्देशानीत्यत्र प्रथमपदं प्रथमस्था ३८
नपठितं दीर्घायुर्द्वितीयस्थानपठितं मध्यायुस्तृतीयस्थानपठितं तृतीयस्थानपठितमल्पायुर्बोधयतीतिनिवेदितमं य
दा द्वितीयपर्यायौ प्रथमपादएवआयुःपितृदिशा [illegible]भ्यां एवं चंद्राभ्यां पितृकालतश्चेति त्रिधा योगकर्तारः क्रमेणावर्णिताः तत्र सं
य

मस्थानेषात्वेसत्यात्मकारकतया योगस्य प्रथमसूत्रोपात्तस्य हेतुभूते कक्ष्यावृद्धेर्द्वितीयाध्यायोक्ताया अपवादो भवतीति कक्ष्या
वृद्धिः सा न भवतीति यावत् अथ निरुक्तकक्ष्यावृद्धिं द्वितीयायाः रपवादो द्वौ योगाभ्यां दर्शयति रिपुरोगयोश्चंद्रे स्वभावास्यहद्
स्थाने द्वादशाष्टयोरन्यतरत्र चंद्रे सति राशौ च पूर्ववत् प्रथमस्थानाष्टमेशत्वात्मकारकत्वाभ्यां योगस्य प्रथमसूत्रोक्तस्य कर्तरि सति क
क्ष्यावृद्धेर्नापवादो भवति एवमात्मकारका इत्यष्टमराशिगे चंद्रे सति प्रथमसूत्रोपात्तयोगस्य प्रथमाष्टमराशीशत्वात्मकारक
त्वाभ्यां हेतौ सति निरुक्तकक्ष्यावृद्धेर्गुरुलघुतायाः अन्यदन्यथोपाद्युपात्ताया अपवादो भवतीत्यर्थः अथ निरुक्तकक्ष्यावृद्धेः पुनरप्यप
वादं प्रकारभेदेनाह योगतुंगयोः पातयोर्वा आत्मकारकीभूतात्स्थाने हेतहस्यतेर्भवतीत्यर्थः यदा द्वितीयाध्यायपरिपठितयोग
भेदे दीर्घमध्याल्परूपेष्वायुःषु समागतेषु योगभेदेन कक्ष्यापवादं दर्शयति युग्मः केंद्र इति लेयलाभयोरिति द्वितीयसूत्रानिर्दि
ष्टप्रथमस्थानादेकादशराशेः केंद्रे कस्मिंश्चिदपि शनिभौमौ भयेत कदृक्षे सति पानौ च प्रथमसूत्रोपात्तयोगस्य प्रथमाष्टमराशि
नाथमष्टराशिनाथत्वात्मकारकत्वाभ्यां कर्तरि सति त्रिविधकक्ष्या लके आद्यो येदीर्घमध्याल्पलक्षणे कक्ष्याया अपवादः सोस्य
भवति दीर्घमध्यमल्पं न किंच नेत्येवं कृतासो भवतीत्यर्थः अथ चंद्रमादायकक्ष्यापवादं प्रथमैकादशस्थानाच्च दर्शयति स्त्राभां
रिध्वितिस्वेति चंद्रे लेयलाभयोरिति सूत्रोपात्त प्रथमस्थानात्तदीयेकादशस्थानात् द्वादशाष्टमान्यतरग्रहे सति शनिरूपात्मका

३८

भ्यां रजश्चिह्नानि कारकं कुंडल्यां लग्नपंचमाभ्यां नवमयोः शुभग्रहसत्वे राजचिह्नानि भवंति राज्ञा दीयमानचिह्नवान् भवतीत्यर्थः ॥
इत्युपदेशसूत्रे जैमिनीये तृतीयाध्याये प्रथमपादस्य वृत्तिः ॥ प्रथमाध्यायपादस्य राजयोगपदस्य शेषतया तृतीयाध्यायप्रथमपा
दः प्रवर्तितः सूत्रकृता संप्रति द्वितीयाध्यायप्रथमपादस्यायुर्दायादिपदस्य शेषत्वेन तृतीयाध्याये द्वितीयः पादः प्रवर्तते तत्र द्विती
याध्याये स्थिरदशा यथाखंडनिधनं तत्रर्क्षविशेषमलिने द्वारबाह्ये नवांशे निधने द्वारद्वारेशयोः समालिन्ये प्रातिनिशुभदृष्टरूद्रशू
लान्तमायुः रुद्रश्च ये पिप्रायेणाप्रस्तो यावमहेश्वरर्क्षदशांतमायुः स्थिरनाथः प्रायेण तद्दक्षदशायां निधनं इत्यादिना निधनराश
यउपदिष्टाः तेषु योगविशेषाद् आश्रयंतरमपि निधनायि पूरयति यत्र ग्रहनेशाभ्यां स्वकारकाभ्यां निधनं निधने प्रथमस्यानाष्टमस्या
नपतिभ्यां आत्मकारकरूपाभ्यां यत्र षष्ठस्थानां तर्राद्यपि निधनस्थानं भवतीत्यर्थः प्रथमाष्टमस्थानेशौ वा तस्मादष्टमेशे आत्म
कारकश्चेत्तस्मादात्मकारकात् षष्ठस्थानरूपराशेर्दशा निधनाय भवतीति यावत् अथ यत्रायनेशाभ्यामिति सूत्रे पात्रं प्रथमस्या
नं निर्द्धारयति लेयलाभयोः प्राणी लग्नसप्तमयोः प्राणी अयशाल स्यग्रहोत्वपायानिति न्यायेन बलवान् सप्तमस्थानभूतोरा
शिस्तराशिं तदष्टमराशिं च परित्यज्य तद्दोषात् षष्ठे विज्ञेय इत्यर्थः अथ द्वितीयप्रथमपाददशा पितृलोगे गुरौ केवलशुभ
दृग्योगि नीचकक्षावृद्धिः अन्यदन्यथा गुरौ चेत्पादौ कक्षावृद्धिरुक्तातदपवादमिह दर्शयति गुरुकेंद्रमंदाभ्यां दृष्टे शनौ योग
हेतौ कक्षापवादः वृहस्पतावा भ्रितराशिकेंद्रे यस्मिन्कस्मिंश्चिद्ग्रहे मंदसनिभ्यां द्वाभ्यामपि दृष्टे सति शनौ च योगहेतौ प्रथमाष्ट

राम
७३८

कवान्नृराजप्रेष्यो भवतीत्यर्थः अथ राजवंशसंभवत्वकरं च योगमाह शुभवर्गे त्रिकोणे केंद्रे वा स्वांशयोगे राजवंशः त्रिकोण
नवमे पंचमे च चंद्रे कुत्रापि शुभवर्गरूपे चंद्रे स्वनवांशसंबंधे च सति जातकवान्नृराजवंशो भवतीत्यर्थः यद्वा त्रिकोणे केंद्रे
वा अष्टमे नवमे वा पूर्वतरत्नवत् अथ राजवंशराजान्यतरयोगमाह उच्चांशे नोदृशः दृष्टिश्चेद्राजा राजवंशो वा चंद्रे उच्चांशे सति नाट
शस्य उच्चांशगते चंद्रतुल्ये अग्रहस्य उच्चांशगतग्रहस्य दृष्टिश्चेद्भवति तर्हि राजा वा राजवंशो वा भवतीत्यर्थः अथ शुभवर्गेत्
त्यादि सूत्रद्वययोगद्वयेपि चंद्रे शुभदृष्टिः शुभयोगो वा यदि तर्हि राजा राजवंशयोगो भवत इत्याह शुभदृग्योगात् योगयोर्द्वयोरपि पू
र्वोक्ते चंद्रे शुभदृष्टिः शुभयोगो वा यदि तर्हि तौ योगौ भवत इति भावः अथ शुभदृष्टियोगान्यतराभावे निरुक्तयोगद्वयस्यापि भंग
माह न वान्यः पूर्वोक्तयोगद्वये चंद्रशुभदृष्टिशुभयोगान्यतराभावे राजा राजवंशयोगो न भवत इत्यर्थः अथ पुनरपि राजवं
शांतरयोगमाह पंचमांशपदे विषमे तु राजानो वा अत्र समे क्षितिबहुवचननिर्देशात् नवांशकुंडल्येव ग्राह्या अन्या अप्यंश
कुंडल्यो ग्राह्या एव एवं चांशकुंडलीषु पंचमांशस्य पंचमभावस्थानापन्नस्य यत्पदं तत्पदं कुंडलीषु समेषु नवमेषु शुभग्रहेषु स
त्सु राजानो वा राजवंशभवा जातकवंतो भवंतीत्यर्थः यद्वा त्रिंशांशकुंडल्यां राजादियोगमाह पंचमांशेपि त्रिंशांशकुंडलीं कृत्वा
तत्र यत्पदं तत्पदं पंचमांशाख्यं पंचमस्थानस्य यत्पदं तत्र कुंडल्यां यानि नवमस्थानानि पूर्वद्वितीयादिस्थानानां प्रसादात् तृतीयत्र
यमेकादशसप्तमदशमादिभ्यो नवमस्थानेषु शुभेषु सत्सु राजानो भवंतीत्यर्थः अथ राजाधीनचिह्नवतां योगमाह स्वलेयमेवा

६ स्वामी भानां राशीनां
नर्दशोपरि कल्पने प्र
स्तु लग्नादि लक्षणं
व्युत्क्रमतः आवर्तनेन द्वा
नाविभागेन द्वादशा

प्रतिराशि ये दशाश्चरस्थिरपर्यायादिषु प्रसिद्धास्तेषामध्यानां द्वादशराशयस [illegible] दशाद्या [illegible] ममागतान् द्वादशधाविभज्य तांश्च द्वादशांशान् द्वादशधाविभ
[illegible] तु शुभवारियां तु तस्मात् तस्प्रजायेते एवमुपदेशविशिष्टार्थं द्वादशराशिष्वपि प्रथमा प्रमाणांसभागस [illegible] नृताणामंतर्दशानयनार्थं द्वादशधाविभागोऽपि विवेकसंस्थैव भवति अंतर्दशाविदशा [illegible]
मारासिद्धं केवलनावधिवलं अथ प्रथममदशायाद्यं वधिका दशैव डायथाप्रमाणां क्रमेण तु क्रमेण [illegible] केकः स्वस्व इति सिद्धावर्तनीयाः एवं विदशायामपि प्रथमवधिराशिप्रारंभोत्क्रमेण तु [illegible]
श्रुतम् यदा स्थिरदशायामपि (दर्शयति यावदिमादिस्थिरदशांतरं तु राशिनं देशादिनावस्थिति एवं प्रतिराशिकादशा द्वादशादशा इति विवेकसंस्था महादशाभिज्ञायेऽभिप्रसिद्धानि एवं सर्वेषामपि [illegible] शिदशानां तद् ३
[illegible] निरुक्तं ॥ अथवा राशिदे [illegible] द्वादशधा विभज्येव प्रतिराशि एकैको इति क्रमेणागमनमदृष्टा द्वा यस्मिन् राशौ समाप्तास्तद् प्रवर्तित राशिमारभ्य द्वितीयमहादशाप्रवर्तनीया तत्र [illegible]

सूर्योदयमारभ्य यावत्समो होरा द्वकालपर्यंतं जातास्ताः सूर्यलग्नाद्धापरिगणय्यानि महोरालग्नेयमिति प्राचीना
काशिकातोयमर्थोनायातीति भावलग्नं होरालग्नं च जन्मलग्नाद्गणनीयमिति वर्णदराशितः फलस्तुजं भद्रैः पापदृष्टिः
पापयोगो वर्णदस्य त्रिकोणके यदि स्यान्नर्हि तद्राशिपर्यंतं तस्य जीवनं ७ नृ द्रश्रूलेपक्षे वा शुभेरणादि निरूप्यते
तथैव वर्णदस्यापि त्रिकोणे पापसंगमे [illegible]दात्सप्तमाद्राशेः कलत्रादि विचिंतयेत् एकादशाद्यग्रजं तु तृतीयात्तु यवी
यसं पंचमेत न तु जं विंद्यान्मातरं तुर्यपंचम पितुस्तु नवमान्मातृ पंचमाद्वर्णदस्य तु शूलराशिदशायां चे प्रबलायाम
रिष्टकं वर्णदराशेः पंचमात्प्रवलश्रूलदशायां मातुररिष्टं वर्णदराशिनवमात्प्रवलश्रूलदशायां पितुररिष्टं जानीया
दित्यर्थः ४ अपवादमाह नग्रहाः प्रथमपक्षे भावाराशयश्च वर्णाः संख्यावोधकाक्षरगम्याइत्युक्तं ग्रहास्तु न प्रसिद्ध
पदगम्या एवेत्यर्थः द्वितीयपक्षे भावाराशयश्च सवर्णाः वर्णदराशिसहिता इत्युक्तं ग्रहास्तु वर्णदसहिता न तथा च भा
वराशिवर्णदा भवंति न ग्रहास्तथा इत्यर्थः अथांतर्दशाविभागं दर्शयति यावदिवेवमावृत्तिर्भानां भानां राशीनां प्र
तिराशि येदशा चरस्थिरादिदशासु प्रसिद्धास्तेषां द्वादशविभागेन द्वादश[illegible]नामावृत्तिर्भवति तद्युक्तं प्राच्यैः कृत्वार्क
धाराशिदशां राशेर्भुक्तिं क्रमाद्वदेत् एवं दशांतर्दशादि कृत्वा ते न फलं वदेदिति यत्तु उपस्थितनयादशारंभावधिस्वस्व

चतुर्थपंचमयो
मातरं जानीया
दित्यर्थः ५

क्रमेणापरीत्याः एवं
महादशानां कल्प
नदैशप्रकारः तत्
कुलार्कधाराशिदशे
ति प्रथमोक्तं तदे
लनपरं पंथमिदं ३

एवमन्यानि फलानि वर्णदकुंडलीतो ह्यानि ५

लग्नमेवेति पंथेरुक्तं तन्न होरालग्नभयोर्नैयत्युर्व्वलाद्दशादादशेतिकारिकोक्तत्वात् एवं प्रतिराशिद्वादशाद्दाइतिविवे कसंख्याम द्वादशाभिप्रायेणापिसिद्धमिति अयमर्थोपि सूत्रसंमतएव एतदभिप्रायेणांतर्दशाविभागो वृद्धैरुक्तः एकैकभावस्यैकैकंवर्षंलग्नादिकल्पयेत् सापर्यायदशालग्ने युग्मेतु व्युत्क्रमाद्भवेत् लग्नं युग्मं तदातर्हि सव्युत्क्रमस्य वादिभमिति पर्यायदशानुक्रांतर्दशेति यदालग्नं युग्मराशितदातस्यसव्युत्क्रमादिराशिः यथावृषभस्यमेषइति प्रकृतमपास्यवक्ष्यमाणास्त्रेषु क्वचिद्ग्रकारणाद्यः सिद्धाः शास्त्रांतरप्रसिद्धमेषादिकाराननयाप्रसिद्धाः ननुदृक्स्यगेला दिवत्तुभा ननुकंश्ट्रे राशेरर्द्धंभवेद्धोराश्चतुर्विंशतिभिस्मृताः तेषां द्विनासां होराणां परिज्ञानिद्ध यंभवेत् राशित्रिभा गाद्द्रेष्काणा तेचषड्त्रिंशदीरिताः परिज्ञानिर्ज्ञयंतेषामेषादेः क्रमशो भवेत् सप्तांशपापास्त्वोजग्रहेगणनीयानि जे शात्‌-युग्मेराशौतुविज्ञेयाः सप्तमर्क्षाधिनायकात् नवांशमाश्वरे तस्मात्स्थिरेतन्नवमादितः उभयेतत्पंचमादेरिति चिंत्यंविचक्षणैः द्वादशांशास्यगणानांतन्नक्षेत्रादिनिर्दिशेदिति वस्तुतस्तु राशिप्राधान्यादि लक्षणएवेतिबोध्यम् इतिश्रीनीलकंठज्योतिर्विद्विरचितायांजैमिनिसूत्रव्याख्यायांप्रथमाध्यायस्यप्रथमपादः ॥ अथात्मकार

क्वचिद्द्रेष्काणाश्चेत्तत्रैवेतदाकालं निवर्तन्नाह ५

लग्नादभ्यन्तरालत्र्यादिक्रमात्प्रथमवत्सरे कारकः स्यादित्यादिवत्सरेषु यथाक्रम द्वितीयक्षीदभावतदृशायाकारकस्यतु पूर्णायांकारकस्येवकेंद्रस्थानां दशाभवेत् ततः पणफरस्थानाम पोक्लिमयुक्तां ततः कारकस्य दशाव्यतु पूर्णाराशेततः क्रमात् आरभ्यानंतरराशिदशाः सर्वानयेत्तथैति एकैकभावस्यैकैकमित्यादिश्लोकापश्चात्मा दशान्वालनपंरा १५

अथ कारकोपासंबधिनोयोगाः सफलाद्वितीयेनपादेनोक्ते तत्रादौ कारकांशमधिकरोति २

स्वांशः कारकांशः कारकाश्रितोंशः कारकस्वामिकांशो वा अर्थाधिकृतः फलार्थविचार्यत्वेन वेदितव्य इत्यर्थः अत्र कारकस्वामिकानां कारकाश्रितानां वा मेषादिद्वादशानां द्वादशासत्ते फलानि दर्शयति १
तानि च फलान्यत्र कारकाज्ञानकृवतस्तत्तत्कारकांशसत्त्वे ज्ञातव्यानि मातापित्रादीनामपि भवंति अत्रास्यात्र नवांश एव मुख्यः द्वादशांशादयोपि ग्राह्याः परं तन्मुख्यविधया राशिफलयोगादयोप्यंशकुं
डल्यो भवंति अंशफलयोगादयोपि सति संभवे राशिकुंडल्यामपि भवंति परंतु ये योगफलादयो यत्कुंडल्यामुक्ताः शास्त्रोक्तास्तत्र ते मुख्याः अन्यत्र गौणा इति विवेकः १

कारकयनवांशमालंब्य फलानि वक्तुमुपक्रमते तत्र कारकांशमधिकरोति अथ स्वांशो ग्रहाणां अथानंतरं ग्रहाणां
रव्यादीनां मध्ये स्वांशः आत्मकारकाश्रितो योंशो नवांशस्तस्मात् फलं विचार्यमित्यर्थः कारकाश्रितमेषादिनवांशफला
न्याह पंचमूषिकमार्जाराः मेषः कारकांशश्चेन्मूषिकमार्जारा दुःखदा भवंतीति तत्र चतुःपादः वृषः कारकांशश्चेच्चतुःपा
दः सुखदा भवंति मूषिकादयो दुःखदाः चतुःपादः सुखदा इत्यत्रैकरूपतयार्थो वेदितः एतस्तु भिन्नरूपेणात्र बीजं किंतु
मते द्वंद्ववाक्यमेव बीजं द्वंद्ववाक्यं तु यतो लग्नेशकगते तस्मिन्वाणिज्यवान्भवेत् मेषसिंहांशकगते ब्रूयान्मूषिकदंश
नं कारके कार्मुकांते स्ययोंहृनोत्पतनं भवेदिति मतेयोकं दुःश्रीलं च मिथुने कारकांशे जलभयं कुष्टरोगो भवति शे
षाश्चापदानि सिंहश्चेत्श्वापदा निःशुनकादयो दुःखदा भवंति मत्तु कन्यायामग्निकणाश्च कन्या कारकांशश्चेन्मनु
वन्निषुनाशव भवति अग्निकणाश्च अग्निकणो न दुःखदश्च भवति लाभे वाणिज्यं तुला कारकांशे वाणिज्यवान्स्या अग्निकणादेवेति वा योजनीयम् २
त् अत्र जलसरीसृपास्तन्यहानिश्च अत्र वृश्चिकांशे जलसर्पादयो दुःखदा भवंति मातुस्तन्यं दुग्धं चक्षुष्यानि स
मेवाहनानुच्चाच्चक्रमात्पतनं धनुषि कारकांशे वाहनाद् दूरप्रदेशाच्चक्रमात्किंचिदस्तु संलग्नतयापतनं भवति नक्र
४ अत्र कारकांशे बहुवचनं मेषाद्यंशानां नानाराशिषु नानात्र कारेणासत्ताद्योजनीयम् अचित्तस्ते एकवचनं ज्ञामभिप्रायेण जेयं द्वादिर्भवति ॥ दूरे जलकुक्ष्यादिः कर्कों
शे जलादि दुःखदः नलेलाम : ५

रा

पक्षयोः प्राप्नोति देवता पश्यति कण्डूष्टिरोगम् [illegible]र्थः २

गुरोः

इदं मनन

टितीत्यर्थः जलचरखेचरखेटकंडूडुष्टग्रंथयश्चरिष्फे मकरेकारकांशेजलचरामत्स्यादयः खेचराःपक्षिणः खेटाग्रहाः
एतेफलदाभवंति कंडूकुष्ठग्रंथिरोगाश्चभवंतिदुष्टग्रंथिर्गंडादिकं तडागादयोधर्मे कुंभेकारकांशेतडागादयः तडाग
वापीकूपादिकर्त्तारोभवंति उच्चेधर्मनित्यतावैकल्पंच मीनेकारकांशेधर्मनित्यत्वं केवल्यंमुक्तिश्चभवति कारकां
शात्रिकोणादिफलंवृद्धैः संगृहीतं शुभयोगेऽशुभांशेवाकारकेधर्मवान्भवेत् तदंशाकेंद्रेशुभेराजाजन्मंप्रजायते कारकेशुभा
ंशेलग्नात्रिकोणेशुभग्रहः उपग्रहस्सपा[illegible]श्चात्सेस्वोच्चस्वर्क्षेशुभक्षेत्रेपापदृग्योगरहितेकेवल्यंतस्यानिर्दिशेत् मिश्रेमि
श्रंविजानीयाद्विपरीतेविपर्ययः तदंशाकेंद्रेषुकारकात्त्रिताणाकुंडस्थांकेंद्रेष्वित्यर्थः पापग्रात्सेग्रत्यग्रहे इत्यर्थः मिश्रेपा
पशुभदृग्योगेमिश्रंस्वर्गवासः विपरीतेपापमात्रदृग्योगसाहित्येविपर्ययः नमुक्तिर्नस्वर्गवासइति चंद्रभृग्वारवर्गस्थे
कारकेपारदारिकः दृष्टतौल्यंशकगतेतस्मिन्वाणिज्यवान्भवेत् मेषसिंहांशकेतस्मिन्नृपाणांधिकदंशनं कारकेकामु
कांशस्थेवाहनात्पतनंभवेत् अथकारकांशेग्रहस्थित्यादिनाफलान्युपदिशति तत्ररवौराजकार्यपरः कारकांशेसू
र्येसतितैराजकार्यतत्परोभवति पूर्णेंदुशुक्रयोर्भोगीविद्याजीवीच कारकेशेपूर्णेंदुशुक्रयोः सतोर्भोगीविद्याजीवीच

जातकफलाद्यः १

दयोभवंति तत्रज लचरामत्स्यादयख ग्रहादयः

मिश्रकारका द्वितीयं =

राम ८

शुक्रतेचंद्रदत्तनमःगो = कारकांशराशिस्थितग्रहफलानि =२

कुंतः बरछी ।

स्यात् धातुवादी कौंतायुधो वह्निजीवी च भौमे कारकांशे भौमे सति धातुवादी रसायनविद्यावान् कौंतवर्त्तीति भाषया त्र
सिद्धायुधः वह्निरुतजीवनवांश्च स्यात् वणिजस्तंतुवायाः शिल्पिनो व्यवहारविदश्च सौम्ये कारकांशे बुधे सति वणिज्य
प्रभृतयो भवंति कर्म्मज्ञाननिष्ठा वेदविदश्च जीवे कारकांशे गुरौ सति कर्म्मनिष्ठादयो भवंति राजकीयाः कामिनः
शतेंद्रियाश्च शुक्रे कारकांशे शुक्रे सति राजाधिकारवंतः बहुस्त्रीस्पृहालवः शतवर्षजीविनश्च भवंति शतं शतव
र्षं इंद्रियाणि येषामिति स्वामिनः पंथास्तु शतानि इंद्रियाणि येषामिति वदंति तन्न इंद्रियाणां शतत्वादर्शनात् प्रसिद्ध
कर्म्मा जीवः शनौ कारकांशे शनौ सति लोकप्रसिद्धकर्म्मणा जीवतीत्यर्थः धानुष्काश्चौराश्च जांगलिका लौहयंत्रि
णश्च राहौ कारकांशे राहौ सति धानुष्काश्चौराश्च स्युः वैकल्पिकमिदं फलद्वयं कथमवगतमितिचेत् मध्ये च
कारोपादानादेव अन्यस्त्वेषेत्यएव चकारउपात्तः अत्र मध्ये किमर्थमिति गजव्यवहारिणश्चौराश्च केतौ
कारकांशे केतौ फलमिदं रविराहुभ्यां सर्पनिधनं कारकांशे रविराहुस्थित्या सर्पान्मृतिर्भवति शुभदृष्टे तन्निवृत्तिः शुभ सर्पनिधननि
ग्रहावलोकिते रविराहुयोगे कारके सर्पान्मृति[illegible]र्न स्यात् शुभमात्रसंबंधाज्जांगलिकः कारकांशगयो रविराह्वोः शुभ
मात्रयोगे सति जांगलिको विषवैद्यो भवेत् मा... निवृत्तिः कुजमात्रदृष्टे गृहदाहकः अग्निदो वा का

कुंतः बरछी।

स्यात् धातुवादी कौंतायुधो वह्निजीवी च भौमे कारकांशे भौमे सति धातुवादी रसायनविद्यावान् कौंतवर्त्तीति माधवयात्र
सिद्धायुध: वह्निहुतजीवनवांश्च स्यात् वणिजस्तंतुवायाः शिल्पिनो व्यवहारविदश्च सौम्ये कारकांशे बुधे सति वाणिज्य
प्रभृतयो भवंति कर्म्मज्ञाननिष्ठा वेदविदश्च जीवे कारकांशे गुरौ सति कर्म्मनिष्ठादयो भवंति राजकीयाः कामिनः
शतेंद्रियाश्च शुक्रे कारकांशे शुक्रे सति राजाधिकारवंतः वहुस्त्रीसक्ताः लवः शतवर्षजीविनश्च भवंति शतं शतव
र्षं इंद्रियाणि येषामिति स्वामिनः पंथास्तु शतानि इंद्रियाणि येषामिति वदंति तन्न इंद्रियाणां शतत्वादर्शनात् प्रसिद्ध
कर्म्मा जीवः शनौ कारकांशे शनौ सति लोकप्रसिद्धकर्म्मणा जीवतीत्यर्थः धानुष्काश्चौराश्च जांगलिकालोहयंत्रि
णश्चराहौ कारकांशे राहौ सति धानुष्काश्चौराश्च स्युः वैकल्पिकमिदं फलद्वयं कथमवगतमितिचेत् मध्ये च
कारोपादानादेव अन्यथा स्त्रेष्वेतएव चकार उपात्तः अत्र मध्ये किमर्थमिति गजव्यवहारिणश्चौराश्च केतौ
कारकांशे केतौ फलमिदं रविराहुभ्यां सर्पनिधनं कारकांशे रविराहुस्थित्या सर्पान्मृतिर्भवति शुभदृष्टेर्नान्निवृत्तिः शुभ सर्पनिधननिवृ
ग्रहावलोकिते रविराहुयोगे कारके सर्पान्मृति [illegible]नं स्यात् शुभमात्रसंबंधाज्जांगलिकः कारकांशगयोरविराह्वोः शुभ
मात्रयोगे सति जांगलिको विषवैद्यो भवेत् मात्रशब्देन पापयुक्तनिवृत्तिः कुजमात्रदृष्टे गृहदाहकः अग्निदो वा का

परगृहेग्निदो वा १

[illegible] भावसीना [illegible] दाहकः पर [illegible] धी

रकांशगयोः रविराह्वोः कुजमात्रदृष्टयोः सतोर्गृहदाहकोग्निदो भवति शुक्रदृष्टेन दाहः कारकांशगतरविरा
ह्वोः शुक्रदृष्टयोः सतोर्गृहदाहो न स्यात् किंतु अग्निदानमात्रं करोति गुरुदृष्टे स्वासमीपगृहात् कारकांशगयोः स्वपरगृहयोरग्नेः क्षेपन दाहः २
रविराह्वोः गुरुदृष्टयोः सतोः शुक्रदृष्ट्यावसतोः अ समीपगृहात् समीपगृहपर्यंते दाहः स्यात् न स्वगृहमात्रस्य सगु
लिके विमदो विषहतो वा कारकांशे गुलिके हि ते सति परस्मै विषदाता वा स्वयं विषेण हतो वा स्यात् गुलिकानय
नप्रकारस्तु वृद्धैरुक्तः रविवारादि शान्यंतं गुलिकादीन् उत्पाद्यते दिवसान् अष्टधा कृत्वा वारेशाद्गणयेत् क्रमात् अष्टमेंऽशो नि
रीशः स्यात् खंडोन्यांशो गुलिकः स्मृतः रात्रीरप्यष्टधा भक्त्वा वारेशात्पंचमादितः गणयेदष्टमः खंडो निःपतिः परिकीर्तितः श
न्यंशो गुलिकः प्रोक्तो गुर्वंशो यमघंटकः भौमांशो मृत्युरादिष्टो रव्यंशो कालसंज्ञकः सोम्यांशे अर्धप्रहरकः स्पष्टकर्मप्रदे
शतः रव्यादि सप्तवारेषु दिनमष्टधा विभज्य ततस्तदा रेषां प्रथमखंडाभिधं कृत्वा अग्रिमखंडेषु तत्तद्वारेशादग्रिम [illegible] राम
ग्रहक्रमेणेशत्वेन जानीयादष्टमः खंडो राहुर्निरीशः एवं च सप्तसु वारेषु शन्यंशो गुलिकनामा तथा च रविवारे सप्तमः १०
सोमे षष्ठः भौमे पंचमः बुधे चतुर्थः गुरो तृतीयः शुक्रे द्वितीयः शनौ प्रथमः खंडो गुलिको भवति सप्तस्वपि वारेषु रा
अयं
तद्दारायमाने दिनमानहृतं प्रमाणपरिच्छिन्नं अष्टभिः हरेद्भागो लब्धखंडकालिको गुलिकः अस्यार्थः इष्टवारान्दिनि

पर्यंतं गतानां खंडानां संख्या दिनमानं गुलिकतरो वारादि अष्टगा सरूपा हीनेऽष्टभक्ते लब्धा गुलिक घटिकादि

मह २५ खर २२ जय १३ मय १८ न्द्र १० तनु १ खनि २ नाग्रोभास्करादिवारेषु दिनमानघटिशितानागहृता गुलिक नाडिकाः
सप्ताः स्फुटगुलिक नाडिकाभिस्तत्कालेर्केराशायनेनापि लग्नवदानेतव्यो राश्यंशकलादिरूपको गुलिकइति स्फुटगुलिकनाडिकासम

त्रिमानमष्टधाविभज्य तत्रद्वादशांशतमं च माधाः खंडाभिधाज्ञेया राज्याविष्पष्टमः खंडो निरीशः एवं चरविरात्रौतत्तीयः
खंडः सोमे द्वितीयः भौमे प्रथम ः बुधे सप्तमः गुरौ षष्ठः शुक्रे पंचमः शनौ चतुर्थः खंडो गुलिको भवति एवं सर्वेषु वारेषु दि
नेरात्रौ च गुरुखंडो यमघंटनामा बुधखंडोऽर्द्धप्रहरारव्यः रव्यंशः कालसंज्ञः भौमांशः मृत्युनामेतिज्ञेयं स्पष्टकर्मइति
गुलिकादीनां स्पष्टीकरणं तु स्वस्वदेशलग्नप्रमाणानुसारेन तत्खंडकालांतलग्नानिस्पष्टानि कृत्वा गुलिकादिस्पष्टलग्नेक
स्यांशोस्ति स एव कारकांशस्तत्र गुलिको जातइति विवेचनीयं तथा च संग्रहः यथा चरविवारादौ दिने गुलिकसंस्थितिः स
प्तेशावेद त्रिद्विकुखंडे शुद्धिक्रमात् रात्रौ त्रिद्विकुसप्त तुपंचतुर्येषु नस्थितिरिति चंद्रदृष्टे चौरो पहतधनश्चौरो वा
सगुलिके कारकांशेऽमग्रहाः दृष्टत्वे सति बुधदृष्टे स्थूलहृदयरोगो भवति तत्र केतौ पापदृ छेकर्णच्छेदः कर्णरोगो वा
सगुलिके इति पदं निवृत्तं तत्र कारकांशे कंरत्वांके केतौ सतिपापदृष्टे सति कर्णच्छेदः कर्णरोगो वा भवेदिति शुक्र
दृष्टे दीक्षितः सकेतौ कारकांशे शुक्रदृष्टे सति कर्माविद्यज्ञक्रियया दीक्षितः स्यात् बुधशनिदृष्टे निर्वीर्यः सकेतौ कार
कांशे बुधशनिदृष्टे नपुंसकः स्यात् बुधशुक्रदृष्टे पौनःपुनिको दासीपुत्रो वा सकेतौ कारकांशे बुधशुक्रदृष्टे पुन
येतत्कालिकसूर्यमानीय तत्सायनं कृत्वा लग्नरीत्या कल्पनीय तत्र इष्टघटीस्थाने गुलिकनाडिकाश्च योज्या इति गुलिकस्पष्टीकरणं

केवले ४

पुनरुक्तवचनवक्ता दासीपुत्रो वा स्यात् शनिदृष्टे तपस्वी प्रेष्यो वा सकेतौ कारकांशे खेटांतरेण दृष्टेपि शनिदृष्टे तपस्वी ना
म्नो वा स्यात् शनिमात्रदृष्टे सन्यासाभासः सकेतौ कारकांशे खेटांतरेणादृष्टे शनिनैव दृष्टे सन्यासाभासः नपरः सन्या
९ सयुतिभावः केतावित्युक्तिः तत्र रविशुक्रदृष्टे राजप्रेष्यः कारकांशे रविशुक्राभ्यां दृष्टे राजप्रेष्यो भवति अथ कारकांशात् रके
दृशांशामवलंव्य विचारयति रिष्ट्या १० बुधे बुधदृष्टे वा मंदवत् कारकांशाद्दशमे बुधे सति बुधदृष्टे सति मंदवत् शनिवत्
प्रसिद्धकर्म्माजीवः शनावित्यनिस्त्रोपात्तं फलं भवति शुभदृष्टे स्थेयः कारकांशाद्दशमे बुधेन शुभग्रहदृष्टे स्थिरो भवति
न चंचलः बुधेन शुभदृष्टत्वं कथं ज्ञातमिति चेत् बुधदृष्टफलस्योक्तत्वादेव रवौ गुरुमात्रदृष्टे गोपालः कारकांशाद्दशमे
र वेक्षति खेटांतरादृष्टे गुरुमात्रदृष्टे गोरक्षको भवति कारकांशाच्चतुर्थांशफलमाह दारे चंद्रशुक्रदृग्योगात् प्रासादः कारकांशा
च्चतुर्थे चंद्रशुक्रदृष्टियोगाभ्यां प्रासादवान् भवति उच्चग्रहेपि कारकांशाच्चतुर्थस्थिते उच्चराशिगतग्रहेपि प्रासादवान् भवति
राहुशनिभ्यां शिलागृहं कारकांशाच्चतुर्थस्थितराहुशनिभ्यां शिलानिर्मितगृहं भवति कुजकेतुभ्यामैष्टकं गुरुणा दारु राम
वं तार्णं रविणा इदं सूत्रत्रयं राहुशनिभ्यामिति सूत्रे शेषव्याख्यातं अथ कारकांशान्नवमांशफलमाह समे शुभ ११
दृग्योगाद्धर्म्मनित्यः सत्यवादी गुरुभक्तश्च कारकांशान्नवमे शुभदृष्टियोगाभ्यां धर्मनिरतादिवान् भवति अन्यथा पापैः नवमे

यस्मिन् कस्मिंश्चित्ययस्ये कारकांशाच्चतुर्थे स्थिते सति ४

गुरु

पापदृष्टियोगाभ्यां धर्म्मनित्यत्वादिरहितोभवति शनिराहुभ्यां गुरुद्रोहः [illegible]रविभ्यां गुरावविश्वासः नवमेगुरूरविदृग्यो
गाभ्यां गुरावविश्वासोभवति तत्रभृगुंवगारकवर्गे पारदारिकः कारकांशान्नवमेशुक्रभौमान्यतरस्य दृग्वर्गे सतिपरस्त्रीगामी स्या
त् दृग्योगाभ्यामामधिकाभ्यामामरणं नवमेशुक्रभौमान्यतरस्यदृग्वर्गेसति यदृग्वर्गापेक्षयाधिकाभ्यां शुक्रभौमदृष्टियोगाभ्यां मः
रणापर्य्यंतंपारदारिकोभवति केतुनाप्रतिवंधः कारकांशान्नवमेकेतोर्दृष्टियोगाभ्यां प्रतिवंधः आमरणंपारदारिकत्वनिवृ
त्तिर्भवति गुरुणास्त्रैणः नवमस्थितेनवमदृष्टावागुरुणास्त्रीलोलः राहुणार्थनिवृत्तिः नवमस्थेननवमदृष्ट्यावाराहु
णापरस्त्रीसंगनिमित्तंद्रव्यनाशःस्यात् अथकारकांशात्सप्तमफलमाह लाभेचंद्रगुरुभ्यांसुंदरी अत्रदृग्योगं निवृत्तं नवम
प्रकरणास्यसमाप्तत्वात् कारकांशात्सप्तमेचंद्रगुर्वोर्योगेसति स्त्रीसुंदरीभवति राहुणाविधवा सप्तमेराहुयोगेविधवास्त्रीगृ
हेभवति शनिनावयोधिकारोगिणीतपस्विनीवा कुजेविकलांगी अलक्षणांगीत्यर्थः रविणास्वकुलेगुप्ता च सप्तमे
रवियोगेस्वकुलेभर्तृकुलेगुप्तारक्षितास्यादामरणं ननुस्वातंत्र्येणायतस्ततोऽटनशीला बुधेचंद्रेणावृत्तेदेशो कारकांशा
च्चतुर्थेचंद्रे सतिपूर्वोक्तयोगेषु सत्सु अन्नाच्छादितेदेशोप्राक्तस्त्रीप्रथमसंगइत्यर्थः कारकांशात्सप्तमेध नुषि चंद्रे इतिवार्थः का
रकांशात्तृतीयेफलमाह कर्म्मराशिपापेशूरः कारकांशात्तृतीयेपापेसतिशूरःस्यात् शुभेकातरः तृतीयेशुभेकातरः तृ
तीयषष्ठयोःफलमाह मृत्युचिंत्ययोःपापेकर्षकः कारकांशात्तृतीयषष्ठयोःद्वयोरपिपापसत्वेकृषीवलःस्यात् सप्तमेगु

न५ पुरुषाशकावेनाप्रक रा चकर्णाद्विकलांगी त्वथी ४

४ वचारादिकलांगीव बुधेनकलावती गीतवाद्यादिषु

शेविशेषेण नवमे गुरो विशेषेण हरी वलः स्यात् अथ कारकांशात् द्वादशे फलमाह उच्चे शुभे शुभलोकः द्वादशे शुभे
शुभलोकः केतौ केवल्यं कारकांशे शुभे सति मुक्तिरित्यर्थः अथवा कारकांशाद् द्वादशे केतौ सति मुक्तिरिति वार्थः क्रियचापयो
र्विशेषेण कारकांशे मेषे धनुषि वा तत्र शुभे सति विशेषेण मुक्तिः सायुज्य मुक्तिरित्यर्थः अथवा मेषे धनुषि वा द्वादशे के
तौ सति सायुज्य मुक्तिरिति वस्तुतस्तु शुभापेक्षया केतोः सायुज्य मुक्तिदातृत्वायोग्यत्वात् तथ्य मेवेत्यथ समुचितेनेति बोध्यं
न च सूत्र कारेण केतोः शुभत्व मुक्तं केतोश्चेत् शुभत्वं स्यात् तर्हि चरदशायामत्र शुभः केतुरिति वक्ष्यमाण सूत्रम्बर दशायामेव
शुभः केतुरन्यत्र नेत्यर्थो व गम्यत इति पापे ऽन्यथा कारकांशात् द्वादशे कारकांशे च पापयोगे न शुभलोके न च मुक्तिरित्यर्थः
रविकेतुभ्यां शिवे भक्तिः अत्रामात्य दासे चैव मिति पर्यन्तं केनापीति पद मनुवर्तते कारकांशे रविकेतुभ्यां मिलिताभ्यां स्थि
ताभ्यां शिवे भक्तिर्भवति अग्रे प्येवमेव योजना चंद्रेण गौर्यां शुक्रेण लक्ष्मीं कुजेन स्कंदे बुध शनिभ्यां विष्णौ गु
रुणा सांबशिवे राहुणा तामस्यां दुर्गायां च तामस्यां भूतादि देवतायां दुर्गायां चेति केतुना गणेशे स्कंदे च पापर्क्षे राम
दे क्षुद्र देवतासु कारकांशे पापराशौ शनौ सति कर्णपिशाच्यादिषु भक्तिः शुक्रेण च कारकांशे पापराशौ शुक्रे तथैव च अ १२
मात्य दासे चैवं अत्र मकारक ग्रहान्नवमो ग्रहः अमात्य स्तस्मात् षष्ठो दासो ऽस्माद् दिगणनया षष्ठो ग्रहः तस्मिन् पापर्क्षे कारकां
शे सति क्षुद्र देवता भक्तिरित्यर्थः पंचाशत् अयमर्थः सूत्र से मतश्चेत् पापर्क्षे ऽमात्य शुक्रामात्यदासेषु क्षुद्र देवतास्विति सूत्रं प्र

रवीनं स्यादिति वदंति तन्न एवं चेत्स्मेद शुक्रामामपदासेषु मिलितेषु पापपक्षेसत्सु क्षुद्र देवताभक्तिरित्यर्थः स्यात् भवति तु
एतेषाम न्यतरस्यापि पापपक्षे स्थितेसा क्षुद्र देवताभक्तिः तस्माद्योग विभाग एवोचित इति त्रिकोणे पापद्वये मांत्रिकः कार
कांशात्पंचमनवमयोः पापद्वये सति मांत्रिकः मंत्रवेत्ता भवति पापदृष्टे निग्राहकः शुभदृष्टेरनुग्राहकः त्रिकोणे सपापेषु
भदृष्टेऽनुग्राहकः लोके ऽनुग्रहकर्ता स्यात् शुक्रेंदौ शुक्रदृष्टे रसवादी कारकांशे चंद्रे शुक्रदृष्टे सति रसवादी भवति बु
धदृष्टेभिषक् शुक्रेंदौ बुधदृष्टे सति वैद्यो भवति चापे चंद्रे शुक्रदृष्टे पांडुश्वित्री कारकांशाच्चतुर्थे चंद्रे शुक्रदृष्टे सति श्वेतकु
ष्ठी भवति कुजदृष्टे महारोगः चापगे चंद्रे कुजदृष्टे महारोगः कुष्ठी भवति केतुदृष्टे नीलकुष्ठं अर्थः प्राग्वत् तत्रस्थे तो
वा कुजराहुभ्यां क्षयः कारकांशाच्चतुर्थे पंचमे वा यथा योगे कुजराहू चेत्तस्य [illegible]हि क्षयरोगो भवति चंद्रदृष्टे निश्चयेन
उक्तस्थानगयोः कुजराह्वोश्चंद्रदृष्टौ सत्यां निश्चयेन क्षयरोगः चंद्रदृष्ट्यभावे क्षयः स्वल्पः चंद्रदृष्टौ प्रबल इति भावः
कुजेन पिटकादिः तत्रस्थितो वा स्थितेन कुजेन पिटकादिर्भवति केतुना ग्रहणीजलरोगो वा तत्रस्थितो वा केतुश्चेत्तस्य ग्र
हणी जलोदराद्या रोगा भवंति राहुगुलिकाभ्यां क्षुद्रविषा[illegible]णि तत्रस्थितो वा राहुगुलिको यदि तर्हि मूषिकादिविषा
णि भवंति तत्रशनौ धानुष्कः स्वनाविति निहंता कारकांशाच्चतुर्थे शनौ धनुष्कः निपुणः केतुना [illegible]घटिकायंत्रीत

अपकारकांशात्पंच मपंचमयोः फल[illegible]

चापगे चंद्रे कुजदृष्टे

स्वामिनः चतुर्थे पंचमे वा कारकांशे पंचमे वा चतुर्थे अष्टमे वा कारकांशे [illegible] कुजराहू भवतश्चेत्क्षयरोगः ५

निपुणः १

त्रवान १ यकेतुश्चेन्नघटिकायंत्रीभवति बुधेनपरमहंसोलगुडीवा तत्रबुधेसतिपरमहंसोलगुडीवा अत्रसर्वत्रापितत्रेतिपदम अधिकार १
न्वेति राहुसाहित्येहयंत्री रविसारथवद्रौ कुजेनकुंभी तत्रस्थितैराहुराद्यैर्दिभि तत्फलानिभवंति मातापित्रोःश्रेष्ठगुरुभ्यांग्रं
थकृत्कारकांशेतत्पंचमेवायथायोगंचंद्रगुरुभ्यांग्रंथकर्ताभवति शुक्रेणाकिंचिद्रून: कारकांशेतत्पंचमेवाचंद्रगु
रुभ्यांकिंचिद्रूनंग्रंथकर्तृत्वंस्यात् ननुअयमर्थस्त्वयाकथंलब्धमितिचेत् केवलशुक्रेणाग्रफलस्यवक्तुमलत्वात् नच
ग्रंथकर्तृत्वंकिंचिद्रूनंकर्मादित्वंचभवतीतिवाच्यं एवंचेत्शुक्रेणाकिंचिद्रूनंग्रंथस्तावकविर्वाग्मीकाव्यज्ञश्चेतिसूत्रंप्र
णीतंस्यात् तस्मादयमेवार्थः सूत्रसंमतः नचसमासांतः पठितपदानामेकांशानुवृत्तेरनौचित्यमितिवाच्यं अस्मिन्ग्रंथे
यं.३ त्वियंरीतिरस्त्येवेति बुधेनततोपि कारकांशेतत्पंचमेवाबुधाभ्यांशुक्रयोगापेक्षयापिन्यूनग्रंथकर्तृत्वंस्यात् तं.५
शुक्रेणाकविर्वाग्मीकाव्यज्ञश्च मातापित्रोरेकत्वशुक्रयोगेकाव्यादिःस्यात् गुरुणासर्वविद्ग्रंथिकश्च अर्थःपूर्ववत् न
वाग्मीवक्तृत्वेनेत्यर्थः पुनरपिगुरोरेवफलमाह विशिष्यवैयाकरणोवेदवेदांगविच्च स्पष्टं सभाजडःशनिना राम
उक्तस्थानगेनमंदेनसभाजाड्यं बुधेनमीमांसकः स्पष्टः कुजेननैयायिकः स्पष्टः चंद्रेणसांख्ययोगज्ञः साहि ९३
त्यज्ञोगायकश्च स्पष्टं रविणावेदांतज्ञोगीतज्ञश्च केतुनागणितज्ञः सूत्रेस्पष्टे गुरुसंबंधेनसंप्रदायसिद्धिः

पूर्वोक्तेयोगेगुरुदृष्टिग्रस्तवर्गसंबंधेसतितत्काम्यसंप्रदायज्ञोभवति भाग्येशैवं कारकांशात् द्वितीयेपिचंद्रगुर्वादिपूर्वो
क्तयोगेनग्रंथकर्तृत्वादिपूर्वोक्तफलंस्यादित्यर्थः सदाचैवमिमेके कारकांशात्तृतीयेपिपूर्वोक्तग्रहयोगेनग्रंथकर्तृत्वादिफल
मूह्यमित्येके भाग्येकेतौपापदृष्टेस्तब्धवाक् द्वितीयेकेतौपापदृष्टेसतिस्तब्धवाक् किंचित्सेलग्नवचनः किंचप्रस्तुतत्वदांतुप्र
त्यसमर्थवाणीकः स्यात् स्व[illegible]पित्पदाद्वा व्ययरोगयोः पापसाम्येकेमद्रुमः स्वीयजन्मलग्नात्जन्मलग्नारूढाद्वा द्वितीयाष्ट
मयोराश्योः केवलोपापोस्तु सग्रहत्वेपिशुभपापान्यतरैकग्रहत्वेनद्विग्रहत्वादिनासमसंख्यो चेत्तदाकेमद्रुमयोगोभव
ति ननुस्वशब्देनकारकांशबोधः कथंनतु अतो स्वशब्दात्कारकांशावबोधस्तथापित्पदा[illegible]दिवाक्यांशेषुनरूपादानंव्यर्थं
देवत
स्यात् स्वशब्दाभावेपित्पदात्कारकांशारूढादयमर्थः स्यात् अपेक्षितस्तु जन्मलग्नाद्वाग्नारूढाद्वेति स्वशब्दः ननुस्वीयलग्ना
रूढाद्वेत्यर्थोभवतीतिप्रथमेवार्थः परंपराश्रुतत्वात्प्राचीनैरुक्तः आरूढाज्जन्मलग्नाद्वापापौस्त्रीहानिगौयदि केवलोसग्रह
स्त्रीहानिगौद्वि
त्वेपिसमसंख्योशुभाशुभौ चंद्रदृष्टौविशेषेणयोगः केमद्रुमोमतइति यत्तुकारकलग्नारूढेभ्यइतिस्वामिभिरुक्तं तद्दृष्टसम
यायमगाविल
तंनेति चंद्रदृष्टौविशेषेण प्रोक्तयोगेसतिद्वितीयाष्टमयोश्चंद्रदृष्टौसत्यां विशेषेणकेमद्रुमोदारिद्र्ययोगोभवति ननुपूर्वोक्त
फलानिकिंसर्वदाभवंति अहोस्वित्कालविशेषेऽत्रआह सर्वेषांचैवंपाके सर्वेषांराशीनांपाकेदशायां एवंपूर्वोक्तानिफ

स्वामिनः स्वांशोक्तप्रकारेणोक्तानांसर्वेषांफलानांपाकेदशापाकेपाकराशिदशायांतस्यांतस्यांप्रादुर्भावः यदा सर्वेषांचराद्दशारूपीनाभपिपाकेदशारंभसमयेएवंलग्नकारकपदवकेम
द्रुमः चंद्रदृष्ट्यासमुत्कर्षश्चदृष्टव्यः अयमाशयः दशाप्रवेशसमयेद्वितीयाष्टमयोः साम्येकेमद्रुमः अथवादशारंभसमयेजन्मकालवदग्रहसंस्थायतत्समयग्रहांश्चस्पष्टीकृत्यतात्
कालिकादीनांपिनिर्णीयतात्कालिकलग्नारूढेभ्योपिद्वितीयाष्टमयोः [illegible] दशासमयेतात्कालिकलग्नादिसाधनंग्रंथा
[illegible] ऽपिवेति ।

अथात्र प्रथमद्वितीयेन पादेन कारकांशकुंडलीमाश्रित्य फलं विचारितं तृतीयेन पादेन तु आरूढभवलग्नारूढकुंडलीरीत्या फलं विवेचयितुमारभते २

पापग्रह ५५

लानि भवंति अथ सर्वेषां राशीनां पाकेन दशारंभकालेपि एवं पूर्वोक्तकेमद्रुमविचारः कार्यः केमद्रुमेसति तद्दशायां दा
रिद्र्यं स्यादिति इति जैमिनिसूत्रव्याख्यायां प्रथमाध्यायस्य द्वितीयः पादः ॥ अथारूढकुंडलीग्रहाणां बलेन फलानि वक्तुं
पदमधिकरोति अथ पदं अथैतदनंतरं यावदीशाध्यायं पदमित्यारात्मिति सूत्रलक्षितमारूढापरपर्यायं पदमधिक्रियते अ
थैकादशस्थानफलमाह व्ययेसग्रहेग्रहदृष्टे श्रीमंतः लग्नपदादेकादशेसग्रहेग्रहांतरदृष्टेसति लक्ष्मीवंतो भवंति शुभैर्न्या
पाप ५।५ य्ये लाभः पापैरमार्गेण एकादशस्थाने ग्रहाश्चेदेकादशस्थानं द्रष्टारश्चेन्न्यायमार्गेणाशास्त्रविरुद्धमार्गेण लाभः मिश्रेर्मिश्रो
लाभ इति ज्ञेयं उच्चादिभिर्विशेषात् उच्चस्वगृहादिस्थग्रहयोगादिना विशेषप्राप्तिः उच्चादिगुणवशात् शुभपापाभ्यां न्याया
न्यायविशेषतो लाभ इत्यर्थः इति केचित् आरूढाल्लाभभवने ग्रहः पापो यदि वा शुभग्रहः यस्य जन्मनि सोपि स्याच्छ्रीवत्तो धनवानपि द्व प्रहा=
शायां शशिनेदपावकाद्युक्तं वक्ष्यमाणदशायां दीर्घमध्याल्पायुर्भेदे पूर्णायुषः त्रेधा खंडकरणाद्यः खंडस्तस्मागतस्त
स्मिन्नेव खंडे निधनं भवतीत्यर्थः एवं वक्ष्यमाणप्रकारेण निधनाद्यथ खंडात्पूर्वखंडे निधनलक्षणाक्रांतराशेर्दशायामागा
तायामपि न निधनं स्यात् किंतु क्लेशः स्यात् अथ दीर्घमध्याल्पायुर्भेदेन मरणखंडे निर्णीते च विशेषतो मरणकालज्ञानमि
तः संभवतीत्याह तत्रर्क्षविशेषः तत्र निधने ऋक्षविशेषः राशिविशेषोस्तीत्यर्थः स राशिविशेषः कइत्यपेक्षायामाह पापम
ध्ये पापकोणे रिपुरोगयोः पापे वा पापद्वयमध्यगतराशिदशायां प्रथमदशाप्रदराशेस्त्रिकोणे षष्ठाष्टमयोर्वा पापयोगे सति
तद्राशिदशायां निधनं भवति एतदुक्तं वृद्धैः शुभमध्येम्रतिर्नैव पापमध्ये मृतिर्भवेदिति लग्नात्कारकाद्वा पापाक्रांतद्वाद
शात्मराशिदशायां निधनं भवतीत्यर्थः बहुवर्षव्यापिन्यां दशायां कदा मरणमित्याकांक्षायामाह तत्राप्यापद्यक्षीदिनाथ

तृतीये तद्दीनाथे वा ... पुनरपि निधनज्ञानाय राशिविशेष ... कक्षीणां ... शुक्र ...
शोसत्वांशुक्र ... निधनं भवति ... २

लग्नात्कारकाद्वा २

दृश्यनवमभागाद्वा तत्रापि निधनस्थानत्वेनाद्दशायां पापमध्यराश्यादिदशायामुक्ता यक्षोदिनाथो ऽष्टमदशाप्रदराशिनत्वष्टरा
शिनाथो तान्भांदृश्यो यो नवमभागो नवांशाकुंडलीपूर्णदशायां वा निधने भवतीत्यर्थः ननु आद्यपादे नदशामराशिः अशिमाद्दे
नाष्टमराशिः कुतो नगृह्यत इति एवं चेन्मुनेस्तात्पर्यं तर्हि दिशि मतं तु नाथ दृश्यनवमभागाद्वेति कुतो नोक्तमिति सत्यं अथ निध्या
शाविशे[illegible] यप्रकारांतरेणादर्शयन् रुद्रग्रहं लक्षयति पिनत्लाभभावेशप्राणीरुद्रः लग्नसप्तमयोर्यो वष्टमेशो नतयोर्यः प्राणी
वलवान्स रुद्रसंज्ञोग्रहो भवतीत्यर्थः द्वितीयरुद्रमाह अप्राणापपिपापदृष्टः लग्नात्सप्तमाद्वायो ऽष्टमाधीशो दुर्वलः सोपि पापग्र
हदृष्टश्चेद्रुद्रः स्यात् तथा च द्वौ रुद्रौ भवतः प्राणी अप्राणीति प्राणिरुद्रस्य फलमाह प्राणिनि शुभदृष्टे सति रुद्रशूलांतमायुः
वलवति रुद्रे शुभदृष्टे सति सरुद्रशूलांतं रुद्रात्प्रथमपंचमनवमदशांतमायुर्भवति अल्पमध्यदीर्घायुर्योगभेदात् प्रथम
त्रिकोणांते द्वितीयत्रिकोणांते तृतीयत्रिकोणांते वा आयुःसमाप्तं भवतीत्यर्थः अप्राणिरुद्रे विशेषमाह तत्रापि शुभयोगे
तत्र द्वितीयरुद्रे शुभयोगे सति रुद्रशूलांतमायुर्भवति न तु शुभदृष्टेति भावः उक्तयोगेऽपवादमाह अर्कपापयोगेन रविं २३
[illegible] विहायतरपापयोगे सति इदं फलं भवति रवियोगे तु नास्य फलस्य भंग इति अथ रुद्रद्वयस्य गुणविशेषेण फलं दर्शयति
मंदारे दुर्दृष्टे शुभयोगाभावे पापयोगे पि वा शुभदृष्टे वा परतः प्राणिन्यप्राणिनि वा रुद्रे मंदारे दुर्दृष्टे शुभयोगाभावे एको
अत्र रुद्रग्रहस्य शुभदृष्ट्यभावे प्राणित्वाभावेन नेदं फलं भवितुमर्हति ॥

योगः मंदारेंदुदृष्टेरुद्रद्वयेपापयोगेपिवाद्वितीयोयोगः मंदारेंदुदृष्टेरुद्रद्वयेशुभदृष्टौवासत्सांततीयोयोगः प्रथमयोगेशुभयोगः
प्रथमयोगेशुभयोगाभावेद्वस्मनेनपापयोगेद्वितीययोगेवक्रःयेशुभपापरहितरुद्रेऽयमर्थः संपन्नः योगत्रयेसंपूर्णेसतिरुद्रशूलां
तात्परतोऽग्रेप्यायुःसमाप्तिर्भवतीत्यर्थः वकारद्वयमनास्थायामित्युक्तायोगद्वयपरमितिपंथेरुक्तेनन्न वाकारद्वयस्यानास्थाकल्प
नायांप्रमाणाभावात् योगत्रयपरमेववाकारबाहुयेनअभ्यतइति अस्मिन्प्रकरणेशुभपापावुक्तौरुक्तौः अर्कीस्मंदाःफणिनःक्रमात्
क्रूरायथाश्रयं चंद्रोपिक्रूरएवात्रकचिदंगारकाश्रये गुरुध्वजकविज्ञास्तुयथापूर्वंशुभाग्रहाइति अयमर्थः अर्कीद्याउत्तरोत्तरंयथा
श्रयंक्रूरराशिगताःक्रूराभवंति शुभराशिगतास्तुनपापाः किंतुशुभाएव गुर्वादयस्तुशुभाः यथापूर्वंशुभाःकविःकवेःकेतुःकेतोर्गुरु
इतिक्रमेणोत्तरंशुभाः क्रूरग्रहाणांयथाक्रूराश्रयेक्रूरत्वंशुभाश्रयेशुभत्वं तथागुर्वादीनामपिशुभाश्रयेशुभतानक्रूराश्रयेशुभ
ता एवमेवदृष्टेरुक्तं यत्वेकंशुभराशिस्थःउच्चस्थोवाबुधःशुभः शुक्रश्चकोच [illegible] सौम्यस्थोततोनत्रशुभाःस्मृताइति यदिशूले
म्रतिस्तर्हिकस्मिन्शूलेस्यादितत्रविशेषोदृष्टेरुक्तः पापमात्रस्यशूलत्वेप्रथमर्क्षेम्रतिर्भवेत् मिश्रेमध्यमशूलर्क्षेशुभमात्रेत्वभे
म्रतिरिति अस्यार्थः द्वौरुद्रौयदिपापौतर्हिप्रथमशूलेम्रतिःस्यात् यदेकोरुद्रःशुभोपरःपापस्तर्हिमध्यमशूलेम्रतिः द्वावपिरुद्रौय
दिशुभौतद्वांत्यशूलेम्रतिःस्यादिति रुद्राश्रितराशावपिकदाचिन्मरणयोगमाह रुद्राश्रयेपिप्राग्येशा रुद्राश्रयराशावप्यायुःस

पापमात्रस्यशूलत्वेप्रथमर्क्षेम्रतिर्भवेत् मिश्रेमध्यमशूलर्क्षे

माप्तिर्भवतीत्यर्थः प्रायःशब्दादुद्धान्तुर्वंपरतोवाआयुःसमाप्तिर्भवतीतिध्वनितं अथविशेषमाह क्रियेपितरिविशेषेण मेषेल
ग्नेसति विशेषविशेषेणाह ढाश्चयेआयुःसमाप्तिर्भवतीति रुद्रद्वयसाधारणेनफलविशेषमाह ढंढेरुद्रेतदेतंप्राय ढंढेद्विस्व
भावराशौरुद्रेप्राणिनांप्राणिनिवासतितदंतेरुद्राश्रयद्विस्वभावांतेप्रायःप्रायेणायुर्भवति प्रायःपदाद्योगभेदेनरुद्राश्रयद्विस्वभा
वराशेःपूर्वंपरतोवाभवतीतिगम्यते लग्नादष्टमराशौरुद्रेसतिरुद्राश्रयांतेप्रायेणायुःसमाप्तिर्भवतीति योगभेदेननिधनस्थानं
दर्शयति प्रथममध्यमोत्तमेषुवातत्तदायुषां तत्तदायुषामल्पमध्यदीर्घायुर्योगवतांप्रथममध्यमोत्तमेषु प्रथमद्वितीयतृतीय
रुद्रशूलेषुवाक्रमेणायुःसमाप्तिर्भवति रुद्रशूलराशिमारभ्यदशायांनिधनेसिद्धेकस्यामंतर्दशायांनिधनमितमाकांक्षयाह शू
लेचेत्तदंतःशूले रुद्रशूलेयद्यायुःसमाप्तिस्तर्हिरुद्रशूलमहादशायांरुद्रशूलांतर्दशायांनिधनमित्यर्थः अथशूलेचेदित्युक्त्या
शूलेचेदित्युक्त्या रुद्रशूलनिर्याणयोगेसत्यपिवलवत्तरयोगांतरवशात्रुद्रशूलनिर्याणावाधोपिभवतीतिध्वनितं अथ
फलंत्वग्रे फलविशेषकथनायमहेश्वरग्रहंलक्षयति स्वभावेशोमहेश्वरः स्वादात्मकारकाद्भावेशोऽष्टमेशः स्वोच्चेस्वगृहेवास्थान २४
दात्मकारकात्तदादशाष्टमेशयोर्मध्येयोवलीसएवमहेश्वरःस्यात्तन्नतुस्वभावेशादित्यर्थः द्वावपितुल्यवलौचेद्द्वौमहेश्वरौभ
पा वतएव स्वोच्चेस्वगृहेइतिहेतुकारकोच्चराशौग्रहयुक्तेसतिकारकादष्टमद्वादशयोर्मध्येयोवलीसमहेश्वरः अस्मिन्न
महेश्वरइत्यर्थः अथप्रकारांतरेणमहेश्वरग्रहंदर्शयति स्वोच्चेसग्रहेरिपुभावेशात्प्राणी स्वादात्मकारकात् ३
कारकग्रहराशौ

यथाह द्वयस्थानयने अष्टमेशयोर्द्वयोरपि समबलत्वे द्वावपि ग्रहौ तथेति यावत् टीका १ अथ महेश्वरयोगमाह स्वगृहस्थितेन फलजनककारकात् षष्ठमाह २

षष्ठाष्टमलग्नाद्वादशे बुधो वलवान् मेषादिविषमादिगतः लग्नसप्तमयोर्यो बलवान् तदनुचरस्थानं षष्ठभाग गोलग्नसप्तमस्थ सप्तमादिषष्ठकं समराशि लग्नादि षष्ठं तत्राशिविषमानः तत्र बुधस्तत्र यथा ब्रह्मा ब्रह्मस्थो भवतीत्यर्थः ब्रह्माणमाह ३

क्षेत्रकारांतरेणायमपि महेश्वर इत्यर्थः प्रकारांतरेण महेश्वरमाह पाताभ्यां योगे स्वस्पतयोर्वा योगे ततः स्वस्पकारस्थापा
ताभ्यां राहुकेत्वोरन्यतरेण योगे तथा कारकायोगे दृष्टे मेन यो राहुकेत्वोर्द्वयोर्योगे वा सति कारकात् रव्यादिप्रसिद्धग्रहात् स्थानयपाता
भ्यां ततः षष्ठोयग्रहो महेश्वरो भवति द्वितीयप्रकारान्तरेण महेश्वराणां संभवे यो बली स एव महेश्वरः स्यादिति अथ बुद्ध भाव दवेरी दैभा घ्रा
योपि तल्लाभस्थानपनुवरो विषमस्थो ब्रह्मा पितृलाभस्थानीतिस्त्र मध्ये स्थितस्तत्र देहलीपकन्यायेन लग्नसप्तमयोर्वलव
द्राशिस्थस्मात् षष्ठाष्टमद्वादशराशिस्थानिनां मध्ये यो बलवान् भवन्नेव लग्नतः सप्तमराश्योर्मध्ये यो बलवद्राशिस्थस्तत्षष्ठग
श्च सन् मेषमिथुनादिविषमराशिगतः स्यात् स एव ग्रहो ब्रह्मा भवतीति लग्नषष्ठराशाप सप्तमादिद्वादशांतं सप्तमस्पष्ट
राशयो लग्नादि षष्ठांतं बोध्यं प्रकारांतरेण ब्रह्माणमाह ब्रह्मस्थिते शनौ पातयोर्वा ततः शनौ ब्रह्मस्थितौ ब्रह्मलक्षणाक्रांते
सति पातयो राहुकेत्वोर्वा ब्रह्मस्थयोः सतोः तस्मात् शनेः राहोः केत्वोर्वा ततः षष्ठो ग्रहो ब्रह्मा भवतीत्यर्थः ननु ब्रह्मलक्षणाक्रांतत्व
या प्रशस्तः शन्यादि ब्रह्मा स्यात् बहूनां ब्रह्मलक्षणाक्रांतत्वे कतमो ब्रह्मा स्यादिति शंकायामाह बहूनां योगे स्वजातीयः व
हू बहूनां ग्रहाणां ब्रह्मयोगे सति स्वजातीयः कारकजातीयः अधिकांशको ब्रह्मा स्यादित्यर्थः अत्रैव विशेषमाह राहुयो
ब्रह्मत्वमध्ये ऽधिकभागयुक्तो ग्राह्य इत्यर्थः १

ततः रव्यादिकेतु तस्थानाद्यंकार कयस्तत्र षष्ठ यः स महेश्वरः २

तदनुचरस्थान षष्ठभागस्थः ३

शन्यादिस्था नात् ८

अथवा

राहोर्ब्रह्मत्वयोगे सति १

गे विपरीतं राहोर्ब्रह्मणा सह संयोगे सति विपरीतं बहूनां ब्रह्मणां मध्ये यो न्यूनांशकः स ब्रह्मा स्यात् । शनिराहु के
तूनां न तु इत्युक्त्या ब्रह्मत्वाभावात् ब्रह्मत्वे सति तु राहोर्ब्रह्मत्वयोगे राहुर्न्यूनांशकश्च ब्रह्मा स्यात् इत्यर्थः पुनः प्रकारां
तरेण ब्रह्माणमाह ब्रह्मास्वभावे शोभावस्थः कारकादष्टमेशः कारकादष्टमस्थश्च ग्रहो ब्रह्मा स्यात् अत्राष्ट
मेशत्वे सति अष्टमराशिगतत्वमेव ब्रह्मत्वे प्रयोजकमिति मतं तन्न तथा सति विवादप्रशक्त्यभावेनैतत्सूत्रं सम ॥
न्वितं स्यात् न ह्येतत्सूत्रं वीन्वितं अवहितत्वात् ग्रंथस्यास्य प्रशक्तेः बहूनामिति सूत्रे शोव शंकाया उपक्षीणत्वाच्चेति
अष्टमेशाष्टमस्थयोरेकत्वे निर्विवादं ब्रह्मत्वं तयोर्भेदे तु कतमो भवेदित्यत आह विवादे बली विवादे इत्ययोर्ब्र
ह्मत्वे सति यो बली स एव ब्रह्मा स्यात् अथवा सर्वेषु ब्रह्मसु समानोपावस्तु यो ग्रहात्स एव ब्रह्म इत्यादिना बोध ॥

अंतर्दशाधिपानां मध्ये ३

शायां निधनाश्रयीभूतायामंतर्दशायामीह तत्रापि कालादिपुरोगवित्तनाथापहारे तत्रापि मार मारकग्रहाश्रयी
कग्रहदशायामपि कालात्कारकसंज्ञमाद्यादशाष्टमषष्ठेशानामंतर्दशायां निधनं स्यादित्यर्थः ए भूतमहादशाया
षां मध्ये वलवतोंतर्दशायां निधनमितिविवेचनीयं अत्र विशेषो हेंद्रेरुक्तः चरेचरस्थिरद्वं मपि १
द्वाइति योराशिरागतः स एव मारको राशिर्भवतीति विनिर्णयः वहुराशिसमावेशे वलवा इतरांतर्दशायां रोग
न्मारकस्मृतः इति अयं भावः पितृदिनेशादिद्विकानां माश्रयीभूतो यो राशिः स मारकः ते
राशयो यदि वहवस्तर्हि अग्रहात्सग्रह इति वलेनयो राशिर्वलवान्स मारकस्तद्राशिदशा चरइत्यादिनायुर्य
यां तदीशाश्रयराशिदशायां वा मृतिरिति अपरे तु चरे इत्यादिना पूर्वश्लोकेन समाप्नुवि नतसमाप्नुचितो भ ३
तो भवेत् यो राशिः स तु विज्ञेयो मारकः स्मृत्रसंमत इति चर इत्यादिश्लोकेन यद्दीर्घायुः समागतं राम
पूर्णमित्यादिना स्पष्टीकृतं तदायुर्यद्राशौ समाप्तिं स तद्राशिरेव मारक इत्यर्थः ॥ इति जैमिनीये प्रथमः पादः २८

स्वामी।
ब्रह्मग्रहाश्रितराशिनः महेश्वरो राशिर्यावन्तं यावतो महादशा चरस्थिरपर्यायादिरीतितो भवंति तावदायुरितिवर्द्धत्यर्थः ब्रह्मराशिदशामारभ्य महेश्वरराशिदशांतमायुरित्युक्तं तत्र महेश्वरदशा तावन्निधनस्थानमितिसिद्धं १

[illegible]

ब्रह्ममहेश्वरयोः लीयः स ब्रह्मा भवतीत्यर्थः ॥ अथ ब्रह्ममहेश्वरयोः फलमाह ब्रह्मणो यावन्महेश्वरर्क्षदशांतमायुः स्थि
रदशायां ब्रह्मग्रहाश्रितराशिदशापर्यंतमायुर्भवतीत्यर्थः महादशायां निधनाश्रयीभूतामंतर्दशामा
ह तत्रापि महेश्वरभावेशत्रिकोणगे तत्रापि महेश्वराश्रितराशिमहादशायामपि महेश्वराश्रि
तराशितोऽष्टमराशिनाथस्य यः त्रिकोणराशिः प्रथमपंचमनवमात्मको राशिस्तेषु मध्ये [redacted]त्म
कोयां तद्दशाकालस्तत्र मृत्युः स्यात् रसौ वद इति द्वादशवर्षैस्तत्तद्राशिदशेत्यभिप्रायेण न्यूनसं
ख्याया दशायास्तत्वे वृद्धितो न्यूनमंतर्दशास्वप्यानेयमेव अथ सूत्रद्वयेन मारकग्रहं सूचयति स्वक
र्मी रुद्रो वित्तरिपु रोगे नाथ प्राणी मारकः वित्तनाथः प्रायेण स्वस्मादात्मकारकात् तृतीयषष्ठ
द्वादशाष्टमेशानां मध्ये यो बलवान्स मारकग्रह इत्यर्थः सर्वेषां समबलत्वे सर्वेपि मारकाः स्युः बहू
नां मारकत्वे कस्य दशायां निधनमित्याशंकायां मल्लमध्ये दीर्घायुषां यत्र यत्र यस्य संभवस्तद्राशिदशा
यां निधनमित्य[redacted]र्थः षष्ठेशात्पापचरस्थिरादिरूपायां निधनं स्यादित्यर्थः मारकमहाद
१ मारकस्य फलमाह तद्दृक्षदशायां निधनं मारकग्रहाश्रितो मारकस्वामिको वा यो राशिस्तन्महादशायां चरस्थिरादिरूपायां

[illegible]

पित्रादीनां निधनकालं वोधयितुं पित्रादिकारकमुपदिशति रविशुक्रयोः प्राणी जनकः सूर्य्यभार्गवयोर्मध्ये यो वलवां
न्स पितृकारकः स्यात् चंद्रारयोर्जननी चंद्रभौमयोर्मध्ये यो वली स मातृकारकः अप्राणपापपापदृष्टः रविशुक्रयोश्चंद्रा
रयोश्च मध्ये यो निर्वलः सोपि पापग्रहदृष्टश्चेद्यथाक्रमं पितृमातृकारकतां लभते अथ प्राणिपित्रादिकारकस्य फलमाह
प्राणिनि शुभदृष्टे नखच्छ्ले निधनं मातापित्रोः पितृकारके मातृकारके वा प्राणिनि शुभदृष्टे सति पितृमातृकारकाश्रित
राशित्रिकोणदशायां पितुर्मातुश्च वा मरणं ज्ञेयं द्विविधकारकस्य फलमाह तत्रावधोसमबले तेन खच्छ्लं स्यात्तस्मै ताभ्यां
प्राणपप्राणिकारकाभ्यां भावेशश्च मध्ये पितृमातृकारका त्वयबलेधिकवलेसमये मेशाश्रित राशितस्त्रिकोणराशिदशा
यां निधनं भवतीत्यन्ये प्राहुः अधिकवलत्वं निवक्षमेत्स्यबलत्वं तुक्तो शाधिक्यवलत्वं इतियाहुः आयुषि चान्यत् पित्रादी
नामायुषि विचारणीये सद्गुतकारकं प्रकारांतरोक्तनिर्याणशूलदशादिकं च विचार्य्यमित्यर्थः पितृनिधने विशेषमा
ह अर्केज्ययोगे तदाश्रये त्रिके १२ लग्नमेषदशायां पितुरित्येके त्रिये लग्नाद्द्वादशराशौ तदाश्रये अर्कगुधाश्रये सिंहमि
थुनकन्यान्यतरराशिसत्वे अर्केज्ययोगे सति लग्नमेषदशायां लग्नात्पंचमराशिदशायां पितुर्निधनं स्यादित्येके यदंति लग्ने
इति पाठे त्रिये मेषराशौ रविज्ययोगाश्रये लग्ने सति मेषस्य दशायां पितुर्निधनमित्यर्थः अथ बाल्ये एव मातापित्रो
र्मरणयोगमाह अर्कपापमात्रदृष्टयोः पित्रोः प्राग्दशायां पित्रोः मात्रादिपितृकारकयोः प्राणिनोरप्राणिनो
५ अस्त्यायायुर्योगभेदात्तद्धानयनेतद्वशसंचारे तदायुर्दायांश्च राश्यादिनिर्णयादौ चान्यद्विशेषजातं जातकवत् इव द्वादशसु भावेषु क्तसमुचितं भावं तत्कारकं तत्कारकाश्रयराशिमारूढा
दिकं द्वारवाह्यादि सर्वं संपाद्य समुन्नेयं इत्यन्यटीका ५

अग्रग्रहाभ्यग्रहदृष्टा दिना १

पित्रादिकारकौ द्विविधः प्राणपप्राणिभेदात् ३

जातकवत्तो वालकस्य २

गुरोः पतिकलत्रादिकारकत्वात्तदाश्रित[illegible]त्रिकोणाद्दशायां निधनं स्यात् २

शुभदृष्टेन
विवेचनीयं

वा रविरहितपापमात्रे शनिदृष्टयोः सतोर्द्वादशाब्दात् पूर्वमेव मातापित्रोर्येयात्क्रमं निधनं भवति रविशुभदृष्टे नायं योग
इति स्त्रीनिधनमाह गुरुस्थले कलत्रस्य गुर्वाश्रितत्रिकोणाद्दशायां पत्नीनिधनं स्यात् एवमन्येषामपि निधनमाह
तत्तत्स्थले तेषां निधनं पुत्रमातुलादिकारकराशेस्त्रिकोणाद्दशायां पुत्रमातुलादिनिधनमित्यर्थः मरणे शुभाशुभभे
दं दर्शयति सूत्रैः कर्मणि पापयुतदृष्टे दुःखं मरणं लग्नात्कारकाद्वा तृतीये पापेन युते दृष्टे वा दुःखं मरणं भवति शुभं शुभदृ
ष्टियुते लग्नात्कारकाद्वा तृतीये शुभेन युते दृष्टे वा शुभं मरणं स्यात् अग्निजलपतनं धनादिप्रयोज्यं दुःखं मरणं ज्वरादि
रोगप्रयोज्यं शुभमुच्यते मिश्रे मिश्रं शुभपापयोर्द्वयोरपि दृष्टे योगे वा शुभाशुभात्मकं मरणमित्यर्थः मरणनिमित्तानि
दर्शयति आदित्येन राजमूलात् तृतीये रवियोगे दृष्टे वा सत्यां राजहेतो मरणं चंद्रे यक्ष्मणा तृतीये चंद्रेण युते दृष्टे
वा यक्ष्मादितो निधनं शनिना वातरोगात् तृतीये शनिना युते दृष्टे वा वातरोगतो निधनं मंदमांदिभ्यां विषसर्पजलोद्वं
धनादिभिः तृतीये शनिगुलिकाभ्यां युते दृष्टे वा विषादिभिर्मरणं गुलिकस्पष्टीकरणमित्यत्रानुसंधेयं केतुना वि
सूचीजठररोगाद्यैः तृतीये केतुना [illegible] युते दृष्टे विसूच्यादितो मरणं चंद्रमांदिभ्यां गुल्मदाहकवल्लादि[illegible]भिः क्षणि
कं तृतीये चंद्रगुलिकाभ्यां युते दृष्टे वा कुमुकमदादिना सत्वरं मरणं गुरुणा शोफरुचिरवमनाद्यैः तृतीये गुरुणा दृष्टे
४ कुजेन व्रणशस्त्राग्निदाहाद्यैः तृतीये कुजेन दृष्टे युते वा व्रणादितो निधनं ४

एवं तत्तत्कारकात्तृतीया वा तद्दशायां तृतीये पा पयोगादर्शने दुःखं मरणं तेषां तेषां भवतीति टिका

एवं कलत्रादिभावतदीशतदारूढादिपरिकल्प्य जातकवत् द्वायुर्दायप्रयोगादिसर्वमपि सफलं समानेयं इत्यन्यटीका २

राम
३१

सत्वे इति कुतो नोक्तमिति चेत् राहुकेत्वोरेकस्थाने स्थितेर्बाध्यत्वादित्येति नोक्तमिति अपवादमाह शुभग्रहयोगान्तं तत्र
लग्नादिद्वादशादिमध्ये शुभग्रहयोगसत्वे पूर्वोक्तयोगो न स्यात् किंतु पित्रोः संरक्षतास्यादेव ॥ ९॥ इति जैमिनीये द्वितीयेध्याये द्वि
तीयः पादः अथ दशाभेदबलभेदादीनाह तत्रादौ नवांशदशामाह विषमेतदादिर्नवांशाः अन्यथा दर्शादिः विषमे लग्नेस
ति तदादिर्लग्नादिर्नवांशदशा स्यात् अन्यथा समराशौ लग्ने सत्यादर्शादिः सप्तमराश्यादिर्नवांशदशा स्यात् आदर्शः सन्मु
खो भवति सन्मुखराशिः सप्तमराशिः सप्तमराशिः सप्तम एव भवति एतद्दशायां प्रतिराशि नव नवाब्दा भवंतीति नवांशदश
ति नामधेयं ज्ञेयं यत्तु स्थिरराशेः षष्ठराशिश्चरस्याष्टमे ॥ उभयस्य द्विःस्वभावस्य राशिस्तु सप्तमः सन्मुखो मत इति श्लोके सत्वा
सन्मुखत्वं कृत्वा पंथेयहत्वेतन्न तद्विषयमेव न त्वन्यपरं अथ स्थिरदशामाह शशि१नंद९पावकाः३ क्रमादब्दाः स्थिरदशा
यां चरस्थिरद्विस्वभावराशीनां क्रमेण सप्ताष्टनवाब्दा नियमाः स्थिरदशायां भवंतीत्यर्थः तथा मेषे सप्त वृषेष्टौ मिथुने न
व पुनः कर्के सप्त सिंहेष्टौ इति क्रमेण द्वादशराशिपर्यंतं मध्यादिज्ञातव्याः एतद्दशायां भस्थानमाह ब्रह्मादिरेषा एषा दशा
ब्रह्मग्रहाश्रितराशिमारभ्य वर्तनीयेत्यर्थः अथ बलमधिकरोति अथ प्राणाः अथानंतरं प्राणो बलं तदुच्यते कारकयो
गः प्रथमो भानोः भानो राशीनामाद्यं बलं कारकयोगो भवति साम्ये भूयसा ग्रहयोगसाम्ये उभयत्र ग्रहयोगसत्वे सति

भानोराशीनां प्रथमः आद्यः प्राणो बलं कारकयोगः स्वस्वकारकसंबंधः तथा [illegible] प्रथमं बलमित्यर्थः इति १ भा॥

न संरक्षतेति न किंतु सं रक्षतैव स्यादेव १

शशिनंदेत्यादि स्थिरदशा ३

भूयसा ग्रहयोगेन बलं भवति ग्रहयोगभूयस्त्वादिभिरपि साम्ये निर्णायकमाह ततस्तुंगादिः ततो भूयस्त्वानंतरं तुंगादिब
लं स्यात् राशेस्तुंगस्थग्रहैर्भिस्त्रग्रहस्थग्रहयोगः प्राग्वदित्यर्थः आश्रयराशीनां निसर्गबलमाह निसर्गस्ततः ततस्तुंगादि
बलानंतरं निसर्गबलं ग्राह्यं चरात्स्थिरं स्थिरात् द्विःस्वभावं बलीइत्यर्थः तत्तुल्यत्वे आश्रयहात्मगृहे तुल्यायां स्वग्रहे प्रभिक
ग्रहः साम्ये चरस्थिरद्वंद्वाः क्रमात्स्युर्बलशालिन इति तदभावे स्वामिन इत्यभावः राशौ कारकयोगाभावे [तदभावे] अभावे स्वामि
नो राश्यधिपतेरित्यभावः कारकयोगादिर्बलं यद्राशिनाथो बलवान्स राशिर्बलीति भावः यत्तु अविशेषात् एकराशौ बहुग्र अत्रा
ग्रहाणां ६ हेषु सत्सु तेषां राशिद्वारकबलसाम्येपि अत्रास्मिन्ग्रंथे आद्याय सोग्रहो विशेषाद्बली भवति अत्रैमायतनगतः आद्यायत एव ग्र
आद्यतः अधिकांशादितियावत् तथा च बहुग्रहेष्वेकराशिस्थेष्वधिकांशकोबलवानिति प्रातिवैशिकः पुरुषे ओजराशौ प्रा
पुरतः ९९ तोवा ४ तिवेशिकः पार्श्वराशिवर्ती द्विद्वादशगतोपि ग्रहः स्वस्वबलेकतीस्यात् इति प्रथमः इति प्रोक्तप्रकारे प्रथमः प्राग्वदित्य
र्थः स्वामिगुरुज्ञदृग्योगैर्द्वितीयः स्वामिगुरुयोगो बुधयोगश्चैकैकशो राशीनां बलं भवति स्वामिदृष्टिर्गुरुदृष्टिर्गुरुदृ
ष्टिर्बुधदृष्टिश्चैकैकशो द्वादशराशीनां बलं स्यात् एवं षड्बलानि द्वितीयः प्राग्वदनुमभिधीयते द्वितीयंभावबलं इत्यग्रिम
सूत्रे द्वितीयं बलं ग्राह्यमिति स्पष्टीकृतं स्वामिनस्तृतीयः स्वामिनो राश्यधिपतेर्वक्ष्यमाणाः प्राग्वत्तृतीयः प्राग्वदित्यर्थः

एकादशादिमूलदशाज्येष्ठभ्रातुर्निर्याणाय ४ पापदृग्योगः पापैरेकादशो दृष्टः दृष्टिःयोगः ग्रहयोगश्चबलमित्यर्थः यदा पापदृग्योगः स्युस्तदा मूलदशारम्भो कश्चित्क्वचित्ताराणाे भवतीति तुंगादिः तुंगमूलत्रिकोणस्वर्क्षातिमित्रमित्रनीचोपित्रा तो भवति यस्तयोग :ग्रहयोगोपिप्राणाय इति चत्वारः इतिस्थानबलितकरादिमेदेनचत्वारस्तासामुत्कर्षः टीकास्वामिमता ११

नभ्रातुर्यराशेःमूलदशायां शरदीपमातुर्निर्याणांस्यात् कर्म्माद्रिभ्रातुः लग्नात्सप्तमाद्वाबलिनस्तृतीयराशेःमूलदशायां भ्रातुर्निर्याणं मात्रादिर्भगिनीपुत्रयोः मातृभ्रात्रादिरितिपरिच्छेदः लग्नात्सप्तमाद्वा बलिनः पंचमराशेः प्रवृत्तमूलदशायां भगिनीपुत्रयोर्निर्याणं अथादिज्येष्ठस्य लग्नात्सप्तमाद्वाबलिनः एकादशराशेः प्रवृत्तायां दशायां ततःमूलदशायां ज्येष्ठभ्रातुर्निर्याणं पितृवर्गितृवर्गे लग्नात्सप्तमाद्वा बलिनो नवमराशेः प्रवृत्तायां दशायां पितृवर्गस्यपितृभ्रात्रादेर्निर्याणं अथब्रह्मदशामाह ब्रह्मादिसमादासंज्ञा पुरुषे पुरुषेविषमलग्नेसति ब्रह्मादिब्रह्माश्रितराशितोदशाप्रवर्तनीयासमादासंज्ञा कोर्थः स्वराशेःषष्ठराशिस्वामिनं समादशाद्यग्राह्याः ननुदासोतशब्देनषष्ठराशिस्वामिनंतमिति र्थः कथमितिचेच्छृणु षष्ठेश्वरंतवर्षानयनेसर्वेषांसंमतत्वात्तस्यसमुन्नतवर्षाभावाच्चापोग्यत्वात्स्वामिनंतद्युत्पर्थः संपत्त्युत्पतिचेद्वर्षानयनब्रह्मादिगणनात्तदापुरुषेब्रह्मादिसमादासंज्ञानादुत्तिस्तत्रप्रणीतंस्यादिम[illegible]ले स्थानमधिकरः तत्रस्थानमधिकरःसप्तमसंबंधोस्ति अयंभावः विषमेश्रादौब्रह्माश्रितराशिदशाततःक्रमेणान्येषां समेलग्नेतुश्रादौब्रह्माश्रितसप्तमराशिदशा ततोव्युत्क्रमेणान्येषांराशीनांदशाविषमेब्रह्मादि समेतुब्रह्मसप्तमादिक्रमव्युत्क्रमभेदेनदशाश्रानेयाइतिफलितार्थः अथचतुर्थबलमाह पापदृग्योगःतुंगादिग्रहयोगः पापग्रहाणांदृष्टियोगंवराशेर्बलंभवति तुंगमूलत्रिकोणस्वर्क्षादिनिमित्तराशिस्थितशुभग्रहयोगश्चबलंस्यादित्यर्थः यत्नुतुंगमित्यादिइतियोग

शेयाद्याः ओजेक्रमव्युत्क्रमदशादिपूर्ववत् लग्नेसमेसतिब्रह्मग्रहाश्रितराशिसप्तमतःपूर्ववषष्ठांतसमाद्याः यदाब्रह्मग्रहेओजेसतिब्रह्मणैतः षष्ठांतगणना ब्रह्मग्रहेसमेसति सप्तमतःषष्ठांतगणनेति ५ इत्यर्थःकृतोमरटीकातः ५ अथबलविशेषदर्शयति स्थानबलितकरःस्थानयोबलितकरःबलधः लग्नेशः एकादशोएकादशोपोलग्नेदृष्टादिस्थानबलयोपित्राणः यदा स्थानबलितकरःसद्वर्गादिस्थानसंबंधःयदासवमिदंदृष्टसवेलानितं ३

एवंतत्रश्रावभूलदशा
तत्रज्ञायनाशायेत्सूत्रं ५

५ नासिलग्नेवाविषमे
तत्रवदशाप्रवृत्ति
सप्तमेतत्स्थानबलित
रः एवमपंचांतः उत्तर
इत्यर्थः ५

तृतीयमारभ्यप्रवृत्तदशा
यांभ्रातुर्निर्याणं १
पंचमादिप्रवृत्तमूलदशा २

५पूर्वोक्तलक्षणाक्रांतोयो
ब्रह्मग्रहस्तदाश्रयमारभ्यप्र
वृत्तदशाव्युत्गणनीयाः
पुरुषेश्रोजेलग्नेसत्यर्थः अथ
मासायः ओजेलग्नेसतिरवि
चंद्रमंगलादिपाठक्रमेणब्र
ह्मयोग्यःग्रहः रवेःशुक्रके
तोर्गुरुरितिक्रमेणाविदुः स
ब्रह्मग्रहाश्रितराशितोयाव
समेराशौतिष्ठतिब्रह्मा शि
तस्तद्राशिपर्यंतंसमाद्याः
यदाब्रह्माश्रितराशिमार
भ्यषष्ठराशिपर्यंतंसमाद्या
इति एते ३ त्याज्याः पूर्वोक्ता

अस्य टीकातो यल्लिख्यते नवमे ओजपदं चेत् क्रमात् युग्मपदं चेत् उत्क्रमात् दशा नेया मेषादित्रिकं त्रिकं क्रमतः ओजपदं युग्मपदमिति व्यक्तिः यते नवमे ओजपदांतर्गतराशिश्चेत् क्रमः अन्यथा उत्क्रमः यद्वा पदमारूढं नवमे आरूढराशिर्यदि विषमस्तर्हि क्रमः यदि समस्तर्हि उत्क्रमः इति यद्वा पंचमे पंचमभावे पि इत्यर्थो ग्राह्यः इदं पदक्रमाख्यं दशांतरमेवेति वेदितव्यं चरदशावत् अत्र नाथांतादृत्यनयनं ५

इति योगविभागं कृत्वा तुंगादि बलं ग्रहयोगबलं चेत्यादि द्वितीयः यत्तु तुंगादीति योग इति योगविभागं कृत्वा तुंगादि बलं ग्रहयोगबलं चेत्युक्तं पंचमे तत्र पापदृग्योग इति सूत्रेण पापदृग्योगबलमुक्तमेव ग्रहयोग इति सूत्रे शेष तदर्थं लाभांतात्

३. पापदृग्योगस्यैव बलत्वेयोगपदं व्यर्थं स्यात् तस्मात्पापग्रहाणां यत्र कुत्रस्थितानामपि योगे बलं शुभग्रहाणां तुंगादिस्था-
नामेव योगे बलं न तत्रस्थानामिति भावः इति चत्वारः कारकयोगमित्यादिना त्रयः पूर्वोक्ताः एकोयमिति चत्वारः आयाना-
दृत्यर्थः पूर्वोक्तं उत्क्रमस्य भेदमाह पंचमे पदक्रमात् प्रागुक्तं त्रिभिस्त्रिभिर्भैरसमं समं च पदानि चत्वारि भवंति च
केंद्र लग्नान्नवमे ओजपदांतर्गतराशिश्चेत् क्रमात् युग्मपदांतर्गतराशिश्चेत् उत्क्रमात् दशा नेया पूर्वं चरदशावर्द्धान
यनमात्रमुक्तं क्रमव्युत्क्रमभेदानुनोक्तः तस्मादत्रोक्तं मानमेवात्र ग्राह्यमिति चरदशायामत्र शुभः केतुः पंचम इति सूत्रे
दशारंभावधेरनुक्तत्वात् अत्र चरदशायां केतुः शुभः शुभग्रहफलद इति इति जैमिनिसूत्रव्याख्यायां सुबोधिन्यां द्विती-
याध्यायस्य तृतीयः पादः समाप्तः द्वितीयं भावबलं लक्षयो चरनवांशे चरराशेर्नवांशदशायां द्वितीयभावबले स्वामिगु-
रुदृग्योग इति फलादेशाय ग्राह्यमित्यर्थः अथ द्वारबाह्यराशीन्दर्शयति दशाश्रयो द्वारं ततस्तावतिथं बाह्यं यस्मिन्का-
ले यस्य राशेर्या दशा चरस्थिरपर्याय तस्य दशाश्रयो राशिर्द्वारमित्युच्यते एवमेव पाकराशिरिति व्यवहरंति लग्नाद्या-
द्वारराशी: १ वत्संख्याको द्वारराशिस्तस्मात्तावत्संख्याको राशिर्बाह्यमिति निगद्यते एनमेव भोगराशिं वदंति अत्र लग्नशब्देन ज- बाह्यराशिमेव १
स्थिरनवांशाद्यासु प्रतिराशि नव नव वर्षा राशीनिति वेदितव्यं २

राम ४ ५ ६ १० ११ १२ राम ३१

न्मकालेयद्राशिस्तैत: प्राप्य मिकीदशासमारभ्यते सराशिर्ग्राह्य: लग्नंसप्तमोवात्रत्लग्नत्याद्याश्रितराशिर्वायथायोग्यमाद्य
दशाश्रयराशिरेवपाकराशेरैवधिर्नप्रसिद्धं लग्नं एवं चेन्नो च्यतेतर्हिसएवभोगराशिश्चपर्य्यायेप्रथमेस्यतद्दनि[illegible]नलग
नि यत्रसप्तमात्तत्रत्याश्रितराशितोवादशाप्रवृत्तिस्तत्रय: पाकराशि: सभोगराशिरिति नसंभवति तदुक्तं वृद्धै: चरेनुक्रमतमा
ग:स्यात्पृष्ठपृष्ठादिका: स्थिरे॥ उभयेकंटकाज्ञेया लग्नपंचमभाग्यत: चरस्थिरद्विस्वभावेष्वेतेषुप्राक्क्रमोमत: तेष्वेवत्रि
षुयुग्मेषुप्राहुंस्तुक्रमतोखिले एवमुद्दिशीवतोराशि:पाकराशिरितिस्मृत: सएवभोगराशिश्चपर्य्यायेप्रथमेस्मृत: लग्ना
द्य यावतिथ:पाक:पर्य्यायेयत्रगृह्यते तस्मात्तावतिथोभोग:पर्य्यायेतत्रगृह्यतां तदिदंचरपर्य्यायस्थिरपर्य्यायपयोर्द्वयो: त्रि
कोणारम्भदशायांचपाकभोगप्रकल्पनामिति पर्य्यायेदर्शितमित्यर्थ: अत्रद्वारबाह्ययो: फलमाह त्रिभि:सूत्रै: तयो:पापेबंध
योगादि: तयोर्द्वारबाह्ययो:पापग्रहेसतितद्दशायांबंधादि:स्यात् तदुक्तं वृद्धै: पाकेभोगेचपापाढ्येदेहपीडामनोव्यथेति स्व
क्षेत्रस्थतस्मिन्नोपजीवस्य तस्मिन्द्वारेबाह्येवाराशौपापाश्रयीभूते स्पापस्यपरंतूपजीवस्य उपसमीपेजीवोयस्येतिगुरु
समीपवर्तिन: स्वक्षेत्रस्थितोमतां[illegible]नवंधादिरित्यर्थ: पाकभोगाश्रित:पापोयदिस्वक्षेत्रगुरुयुक्तस्तर्हिकदोषोनेतियावत्
तथा भयतूयोगान्नसर्वमस्मिन् अस्मिन्द्वारेबाह्येविराश्यांजातायेयोगास्तेषूक्तंसर्वंशुभाशुभफलंवोदितव्यमित्यर्थ: अथकें
द्रदशारंभस्थानभेदंदर्शयति पितृलाभप्राणिनोयं लग्नसप्तमयोर्बलवान्राशिस्तस्मादयंवक्ष्यमाणादशाक्रमोज्ञेय:

तेराशिमारभ्यदशाप्रवर्तनीयेतियावत् तदुक्तं वृद्धैः बलिनःस्वक्रशशिनोकेंद्रारभ्यातुदशांनयेत् पुरुषश्चेत्ततोन्ये
१२ यास्त्रीचेदपसरणतोनयेत् अयमर्थः पुरुषोजातकवान् चेल्लग्नसप्तमयोर्बलवतोदशानेया स्त्रीजातकवतीचेद्बलव
त्सप्तमाद्दशानेयेति केंद्रदशाक्रमभेदानाहसूत्रैः प्रथमेप्राक्प्रत्युक्तं प्रथमेचरराशौलग्नेसप्तमेवासतिबलवद्ल
क्र ग्नसप्तमान्यतरराशेरनुज्झितमार्गेणदशाक्रमःस्यात् तत्राप्योजयुग्मपदभेदात्प्राक्प्रत्युक्तंक्रमोत्क्रमत्वं प्रथमद्विती
यादिद्वादशादिरीत्याज्ञेयमित्यर्थः यत्तुसामान्यपरिभाषातःप्राक्प्रत्युक्तं प्राप्तेवात्रतंप्राक्प्रत्युक्तपदमनुज्झितपद
क्रममितिपर्यवसन्नंतन्न सामान्यपरिभाषायादशाद्यापनयनपरत्वात् नचैवंसत्यनुज्झितक्रमरूपोर्थोनस्यादिति
वाच्यं स्थिरदंदयोः षष्ठकेंद्रादिक्रमयोर्वक्ष्यमाणत्वादत्राक्षेपादेवतल्लाभात् अन्यथालाघवात्प्रथमेक्रमतद्वदेव
ब्रूयात् अत्रतत्पंचमेपदक्रमादितिसूत्रोक्तंचप्राक्प्रत्युक्तपददशाक्रमेसामान्यपरिभाषाप्राप्तौलिंगं द्वितीयेस्थिरः
द्वितीयेस्थिरराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्तमान्यतमराशेरोजयुग्मपदभेदात्क्रमोत्क्रमाभ्यांस्थिरतःषष्ठ राम ३९
क्रमेणदशाप्रवृत्तिर्ज्ञेयेत्यर्थः तदुक्तंवृद्धैः क्रमात्षष्ठेवृषेवृश्चिकेचोत्क्रमात्कुंभसिंहयोः षष्ठषष्ठादिकाग्राह्यादृत्येता
वद्विशिष्यतइति पृथक्क्रमेणतृतीयेचतुर्थ्यादिः १८ तृतीयेद्विस्वभावराशौलग्नेसप्तमेवासतिबलवल्लग्नसप्त
मान्यतमराशेश्चतुर्थ्यादिकेंद्रादितः पृथक्क्रमेणलग्नपंचमनवमादितःओजयुग्मपदभेदात्क्रमाभ्यांदशा

६ अत्रेयं प्रक्रिया प्रतिराशि नव नवाब्दाः स्थिरदशा नाम अतो जन्मसंपदित्यादिसंज्ञया व्यवह्रियमाणा कारकेंद्रादिक्रमेण प्रवृत्ताः तथा च कारकाश्रयमार
भ्य प्रतिराशि जन्मसंपदित्यादिक्रमेण नव नव वर्षाणि गणनीयानि पर्यवस्यति इयं जन्मादिदशेति व्यवह्रियमाणा स्यात् ६

प

प्रवृत्तिः स्यात् लग्नसप्तमान्यतरकेंद्रात्प्रथमं ततः पंचमपणफरतः ततो नवमापोक्लिमतो दशाप्रवृत्तिर्ज्ञेयेति यावत् अत्र
नवनवाब्दा ग्राह्याः एतत्सूत्रत्रयस्य फलितोर्थो वृद्धैः स्पष्टीकृतः चरेत्यादिना मार्गः स्यात्षष्ठेत्यादिकाः स्थिरे उभयेकंटकाद्ये
या लग्नपंचमभाग्यतः चरस्थिरद्विस्वभावे षोजे षुप्राक्क्रमो मतः तेष्वेव त्रिषु युग्मेषु व्याहुः युत्क्रमतो विलं ओजेषु ओज
पदेष्विमर्थः अथ कारककेंद्रादिदशामाह स्वकेंद्रस्थाद्यां ग्रहस्वामिनो नवांशानां नवांशदशाद्यानां स्वकेंद्रस्थाद्याः
 कारककेंद्रस्थाद्याः राशयः स्वामिनो भवंति आदौ केंद्रस्थाः ततः पणफरस्थाः ततआपोक्लिमस्थास्तत्रापि बलाधिकस्य प्रथम
मभिमितिक्रमेण सर्वेषु र्वलांतं नेयमिति यावत् तदुक्तमाद्यैः प्रतिभं नव वर्षाणि कारकाश्रयराशितः जन्मसंपद्विपत्क्षेमप्र
त्यरिःसाधकोवधः मैत्रंपरममैत्रं चेत्येवमंतर्दशा नयेदिति किंच स्वकेंद्रस्थाद्याग्रहा नवांशानां नवग्रहदशानामंकानां स्वा
मिनो भवंतीति अयमप्यर्थः सूत्रकारसंमत एव अमथात द्वाभयोरितिसूत्रस्य वैयर्थ्यप्रसंगात् अथ द्वानयनं त्वग्रे वदिष्य
ति केंद्रदशामपरामाह पितृचतुष्टयवैषम्यबलाश्रयः स्थित पितृचतुष्टये षु लग्नादिकेंद्रेषु वैषम्यबलाश्रयोऽधिक
बलयुक्तो राशिः प्रथमदशाप्रदः स्थितः पितृचतुष्टयपर्यवसितः नवांशानामित्यनुवृत्ता प्रतिराशि नवनवाब्दा ग्राह्याः
तथा च केंद्रपणफरापोक्लिमानां बलाधिकस्य प्रथममभिमितिक्रमेण सर्वेषु र्वलांतदशा नेयेति कारकादिग्रहदशाद्यानय
नमाह सतद्वाभयोरावर्तते सः कारकः तद्वाभयोर्द्वेग्नसप्तमयोरावर्ततेपरिवर्तते अयमाशयः लग्नात्सप्तमाद्वक्र

मोक्रमगणनयाकारकपर्य्यंतंराशिसंख्यायत्राधिकासा दशा कारकग्रहदशा अन्येषांतुग्रहात्कारकपर्य्यंतंविषमसमपदानु

१२ रोधेनक्रमव्युत्क्रमगणनयासंख्यासातत्तद्ग्रहाणां कारकयुक्तग्रहाणांतुकारकाद्यतुल्याएवाब्दाभवंतीति इयंदशाद्येरुक्ता:

सा लग्नात्कारकपर्य्यंतंसमोंब्दादशांनयेत् उभयोरधिकासंख्याकारकस्यदशासमा: तद्युक्तानांतुतत्तुल्यंप्रत्येकंस्युर्दशाक्रमात् ग्रहा

त्कारकपर्य्यंतंसंख्यातस्यदशाभवेत् कारकस्ययुतस्यादौततःकेंद्रादिस्थितास्ततः दशाक्रमेणविज्ञेयाशुभाशुभफलप्रदाइति फल

माह स्वामिवत्फलानिचप्राग्वत् दशास्वामिनांराशीनांग्रहाणांचफलानिप्राग्वत्पूर्वोक्तशास्त्रवत्ज्ञेयमित्यर्थ: अथमंडूक

दशामाह स्थूलादर्शवैषम्याश्रयोमंडूकस्त्रिकूट: मंडूक:मंडूकदशा त्रिकूट: चरस्थिरद्विस्वभावात्मक: त्रिकूटघटितत्वात्कें

द्रादित्रिसमुदायघटितत्वाद्वात्रिकूट: स्थूलादर्शवैषम्याश्रय: लग्नसप्तमयोर्मध्येयोबलवान्तदाश्रयोभवति विषमस्यभा

वोवैषम्यंअधिकबलत्वमितियावत् अयमाशय: लग्नसप्तमयोर्मध्येबलिनंराशिमारभ्यदशाप्रवृत्ति: तत्रापिपुरुषजातकवा

न् तदालग्नसप्तमयोर्बलवतोदशाज्ञेया स्त्रीजातकवतिचेद्बलवत्सप्तमाद्दशानेया तदुक्तमाद्यै: बलिन:शुक्रशशिनोर्वाऽयाम

डूकेदादशा पुरुषश्चेत्ततोनेयास्त्रीचेद्व्यस्ताततोनयेदिति केंद्रादिक्रमेणमंडूकवत्प्लुत्यपतनान्मंडूकसंज्ञत्यर्थ: तस्मादत्रकेंद्र

पणफरआपोक्लिमक्रमेणतत्रापिबलिन: प्राथम्यमितिरीत्यादशानेयेतियावत् प्रतिराशिनवाब्दायाह्या अथफलशूलदशा

माह निर्याणादेलाभादिशूलदशाफले फलेवक्तव्येशूलदशानिर्याणराशौ: सप्तमराशित:प्रवृत्ताभवंतीति शूलदशेतिना

ममात्रनिर्देश: रुद्रशूलरुद्राश्रयमहेश्वरस्येमारकत्वादि निर्याणराश्यानवाब्दतुल्येनशूलदशानेकविधा अत्रनवनवा

राम
३५

व्याख्याता विशेषविधानानि अथ सकलदशासाधारणेन दशारंभवशाद्दानयनेन विशेषमाह पुरुषे सौम्ये त्यतः सर्वासु मा. सा १
दशास्वारंभः राशौ पुरुषे विषमे सति सामात्यतः आरंभलग्नाद्दशाप्रवृत्तिः समात्यतः समा अथवा: नवनववर्षरूपाः व्याख्याः
समे सति तु तत्सप्तमात् नवनवाद्याः व्याख्याः तस्मादेव दशाप्रवृत्तिर्भवतीत्यर्थः सिद्धमेव न तु कंटकैः ओजे लग्ने तदेवस्याद्युग-
ग्मे तत्सप्तमं भवेत् दशौजे क्रमतो ज्ञेया युग्मे व्युत्क्रमतो मतेति किंच पुरुषे जातकवति आरंभराशित एव दशाप्रवृत्तिः
स्त्रियां जातकवत्यां तु तत्सप्तमाद्दशाप्रवृत्तिः स्यात् नवनवाद्यग्रहराशी पूर्ववदेव तदुक्तं पुरुषश्चेत्ततो नेया स्त्री चेद्दर्पणा-
तो नयेदिति नक्षत्रदशामाह सिद्धा उडुदाये नक्षत्रायुर्दाये विंशोत्तर्यष्टोत्तर्यादिरूपे समा: अथवा: सिद्धा जातकांतर
प्रसिद्धा व्याख्याता इत्यर्थः अथ योगार्द्धदशामाह जगात स्युर्योगार्द्धयोगार्द्ध योगार्द्धदशायां प्रतिराशिसमागतचरदशा स्थि-
स्थिरदशा स्युः योगार्द्धं कर्तव्यं तदेव योगार्द्धदशाब्दाः योगार्द्धदशारंभराशिमाह स्थूलादर्शवैषम्याश्रयमेनम् एनं योगा-
र्द्धं स्थूलादर्शवैषम्याश्रयं लग्नसप्तमयोर्बलवदाश्रयं भवति अयमर्थः लग्ने बलिविषमे क्रमेण समे व्युत्क्रमेण दशा आ-
वर्तयति लग्नाद्दशाप्रवृत्तिः सप्तमे बलिनि तस्माद्दशाप्रवृत्तिरानेया इति स्त्रीजातकवती चे बलवत्सप्तमाद्दशानेया पु-
रुषो जातकश्चेद्बलवतो दशानेयेति उक्तं वृद्धैः बलिनस्तु दशा नेया राशेर्हि शशिविघुत्क्रयोः स्त्री चेद्दर्पणतो नेया पु

पुरुषस्थे ततो नयेदिति ॥ अथ हृद्दशामाह कुजादिस्थिरकूटपदक्रमेण हृद्दशा कुजादिलग्ननवमादित्रिकूटपदक्रमेण हृद्द
११ शा भवति ॥ आदौ नवमस्य ततो दृष्टिचक्रे सन्मुखराशेः ततः कुत्रचित्क्रमरीत्या कुत्रचित् उत्क्रमरीत्या पंचमस्य ततः कुत्रचित्क्रमेण
कुत्रचिदुत्क्रमेणैकादशस्य सन्मुखराशेरित्युक्तं तत्र प्रमाणाभावात्पंचमस्यादौ कुतो न उच्यते दृष्टिविषये ॥ आदौ अक्षिपरं
त्वक्षाणि ततएकादशस्य हृद्दशा भवति नवमहृद्दशा दशा एकादशा हृद्दशेति फलितार्थः ॥ अथौजयुग्मपदभेदेन गणनाक्रम
मुपदिशति मातृधर्म्मयोः सामान्यं विपरीतमोजकूटयोः यथासामान्यं युग्मे मातृधर्म्मयोः पंचमैकादशयोर्गणनायां
सामान्यं क विदित्वात्मकं सामान्यं सामान्यमनति क्रमविशेषं तथा च क्रमात् वृषे वृश्चिके चैतत्र वृषवृश्चिकयोरोजकूटस्थत्वात्
उत्क्रमेण पंचमैकादशौ वृषे मेषे सिंहकुंभयोर्युग्मकूटस्थत्वाद्यथासामान्यं उत्क्रमेणैव पंचमैकादशयोरभावात् वृषे वृश्चिकेपि
त्र यत्र दृष्टिस्तत्रादौ नवमदशानंतरं सप्तमस्य ततो नवमादित्रिके द्विस्वभावराशिहृद्दशा यो पार्श्वराशिद्वयदशा क्रमस्तु पुंराशि
ष्वेद्विस्वभावस्तर्हि क्रमेण स्त्रीराशिष्वेवोत्क्रमेण चतुर्थदशामो ग्राह्यो अयं भावः चरराशिषु क्रमेण पंचमैकादशौ स्थिरराशिषु राम ३२८
आदौ नवमस्य ततः सप्तमस्य ततो द्वितीयमस्थे द्विस्वभावः तर्हि क्रमेण चतुर्थस्य सप्तमस्थे यदा उत्क्रमेणैव चतुर्थस्य ततः तत्स्थेव दशाम
स्येति अत्र नवनवांशदशाख्याः ॥ अथ त्रिकोणदशामुपदिशति पितृमातृधर्म्मस्थानामाद्येषु त्रिकोणे लग्नपंचमनवमेषु योरा

शिवृलवान् ततस्त्रिकोणादशारंभः आरंभराशिमारभ्य क्रमेणाष्टादशराशीनां दशा ज्ञेया एतदुक्तं भवति लग्नत्रिकोणयोरा
शिर्बलवानुक्तहेतुभिः तदारभ्योन्तयेत्स्त्रीमंश्चरपर्यायवद्दशामिति युग्मराशिभुवां पुंसामोजं गत्क्लीनसन्मुखं ओजराशि
भुवां स्त्रीणां युग्मं गत्क्लीनसन्मुखं ओजराशिभुवां पुंसां गत्क्लीयादोजएवतु युग्मराशिभुवां स्त्रीणां युग्ममेवसमाश्रयेत् क्रमो
क्रमाभ्यां गशायेदोजयुग्मेषु राशिषु इतिकथनात्पुरुषे जातकवति कथनात् स्त्रियां जातकवत्यां तु युक्रमादिलग्नर्थः संपन्नः च
रपर्यायवद्दशामिति कथनान्नाथांतासमाइतिरीत्या वर्षाणि पत्र्यया ह्याराशीनर्थः पाकभोगराशीन्दर्शयन्फलमतिदिशति त
त्रद्वारबाह्याभ्यां तद्वत् तत्रत्रिकोणादशायां द्वास्वाद्यराशिभ्यां तद्वत् पूर्वोक्तवत्फलं ज्ञेयमित्यर्थः तद्रक्रमाद्येः तदिदं चरपर्या
यस्थिरपर्याययोर्द्वयोः त्रिकोणारम्भदशायां च पाकभोगप्रकल्पनं पाके भोगे च पापाद्ये देहपीडा मनोव्यथेति तत्तत्कारकेभ
स्तत्तत्स्थानफलमाह धा७सगेरि३काम१लीक तत्कारकैः फलादेशः तत्तत्कारकेभ्यो धासगेरिकामलीकरात् सप्तमत
तीयप्रथमनवमेभ्यो यथायोगं तत्कारकैः फलादेशः कर्तव्यः अयंभावः सप्तमाद्भार्याविचारः तृतीयात्कनिष्ठभ्रातुः कार
कात्तस्य नवमात्पितुः धर्मस्य वा विचारः कार्य्य इत्यर्थः नक्षत्रदशामाह ताराकांशेमंदाद्योहोरोक्ताः जन्मदिने यद्वे
ड्वस्यनक्षत्रं तदाद्या सर्वर्क्षरीत्या याघटिकास्ताद्भादपायाविभज्यप्रथमरवेंदुमारभ्य दादशास्तु खेचरेषु लग्नादिकादशाराया:
जननी जनकादिकारका पूर्वमुक्तास्तेषां कारककारकाणां यत्स्थानं तद्बलवत् स्थानं तत्रयो स्थानं पर्यायदशादिमादिरीत्याबलवत्स्थानानां कारकाश्रयस्थानाद्वा जा
तकयतोलग्नत्रिकोणादित तदारभ्यास्या ननद्वस वर्षाअपि दशाः पूर्वोक्तानीनानाविधा ... दिलक्षणाः प्रवर्तकफलमपितथैव समानेयमुक्तरीत्येति स्वामी ४

मात्रादीनां तत्तद्दशाभे
दज्ञापनपूर्वकं जातक
वतो लग्नकारकाराका
दिभिरिवफलमुन्नेय
मित्युपदिशति टी ४

लग्नद्वारवाह्यस्थले
यथाफलं तथात्रापि
समुन्नेयमित्यर्थः ६

क्रमेणागणनीयाः यास्मिन् घटिकामयेखंडे जन्म खंडः आदिजआरम्भगणनायांजन्मलग्नाद्वितीयद्राशिर्विशिष्टस्तं राशि
३५ मारभ्यक्रमव्युत्क्रमभेदेनद्वादशराशीनां दशाज्ञानेयाइत्यर्थः प्रतिराशिनवनवाब्दायाब्दाः शुभविशेषतः फलंदर्शयतिसूत्रे
तस्मिन्तुङ्गे नीचेवाश्रीमंतः स्वमित्रे किंचित् दुर्गतोपरथा तस्मिन्नाशलग्ने शोत्तुङ्गे नीचेवाराशौ सति जाता नराः श्रीमंतोभवं
ति नाशलग्नेमित्रराशौसति किंचिद्लक्ष्मीवंतोभवंति अपरथा शत्रुराशौसति दुर्गतोदरिद्रोभवतीत्यर्थः तदुक्तंमाघे: जन्मता
रे द्वादशधाविभक्तेयत्रचंद्रमा लग्नस्तावतिथेराशौन्यसेदाद्यदशाधिपं सयदुच्चेथवानीचेतदासाद्राजसेवकः स्वमित्रर्क्षे
सुखीशत्रुराशौनिस्वःसमेसमइति अथांतर्दशोपपदयोः सेचारे विशेषमाह सूत्रे: स्वेवैषम्येयथास्वं क्रमव्युत्क्रमौ साम्येवि
परीतं शनौवेत्येके अंतर्भुक्तं गाथामोरेतत् स्वस्मात्मकारकस्य वैषम्ये ओजपदत्वे यथास्वं यथाराशिस्वभावं क्रमव्युत्क्रमौ
ज्ञेयौ ओजपदे ओजराशिस्थे क्रमः युग्मराशिस्थे व्युत्क्रमइति साम्ये युग्मपदे विपरीतं युग्मराशौ क्रमः ओजराशौ व्युत्क्रमः
इतिज्ञेयं कारके यथा ओजयुग्मपदभेदेन क्रमव्युत्क्रमतद्विपरीतत्वेयथाशनावपिवेदितव्ये इत्येके आचार्या वदंति राम
स्वपदोपादानात्कारकांतर्दशायामुपदशायां चैवेदं बोध्यं अथ दशाफलविशेषमाह शुभदशाशुभयुते धाम्नुच्चेवा शु १४५
भयुतेधाम्नि राशौसति तद्राशिदशा शुभास्यात् उच्चग्रहयुते राशौ तदधिपतावुच्चे वा तद्राशिदशा शुभेत्यर्थः अन्यथान्य

या उच्चभित्रशुभयोगलक्षणगुणाभावेसमानीचादियोगसत्वेऽशुभेतमर्थः सिद्धमन्यत् अन्यत्सहृतंयथानुक्तंसिद्धं
शास्त्रांतरप्रसिद्धंग्राह्यमित्यर्थः ॐ इतिश्रीनीलकंठसोतिर्विद्दिरचितायांजैमिनिसूत्रव्याख्यायांसुबोधिन्यांद्वितीया
ध्यायस्यचतुर्थःपादःपूर्तिमगात् अथराजयोगोदितलक्ष्मीयोगास्तृतीयाध्यायेप्रथमोदितानिरूप्यंते तत्रादौमहाराज
योगमारभते अथराजजनिताभ्यांयोगेयोगे अथारभ्यतेराजयोगेरितिशेषाद्राजयोगंदर्शयति राजेति आत्मकारका
भ्यांलग्नात्सप्तमेवक्ष्यमाणाग्रहस्यपंचमेशादेर्योगेसंबंधेसतिवक्ष्यमाणरीत्यावक्ष्यमाणा[redacted]योगाभवंतीत्यभिप्रायः
योगद्वयंतत्पुत्रस्थलेषुयथायोगमन्वितंवेदितव्यं अथपश्रुतयोगेकर्तृभूतंग्रहंकंचनदर्शयति लेयात्पंचमाधि
पः लग्नात्पंचमाधिपःनिरुक्तेयोगेकर्त्तेतिभावः अथफलोन्मुखंमहाराजयोगंदर्शयति उच्चनीचेस्वांशवती
ताहृग्राहदृष्टश्च शुभमात्रदृष्टोयदिमहाराजः सूत्रत्रयमाद्यमिहानुवर्तते तथाचलग्नात्पंचमाधिपःआत्मकारक
पुत्रकारकयोर्लग्नसप्तमसंबंधेसतिलग्नसप्तमे लग्नपंचमाधिपात्मकारकपुत्रकारकाणामन्यतरयोःसंबंधोपेक्षितद्
तियावत् एवंचेदृशात्पंचमेशः [redacted]उच्चनीचराशिस्थनवांशान्यतमेषुविद्यमानःसन्ताहृग्राहदृ
दृष्टश्च उच्चनीचस्थनवांशग्रहेणादृष्टश्च शुभग्रहमात्रेणावादृष्टोयदिभवतिमहाराजोजातकवान्जनइतिभावः अ

सत्वशास्त्रानुक्तार्थः
शास्त्रांतरसिद्धान
दिसंग्रहणीति १

धनाद्यप्राप्तिसमयं दर्शयति लेयलाभयोः परेकाले लग्नसप्तमयोर्नवमराशिदशाकाले राज्ञा भवतीत्यर्थः अथ
३५ एवं लग्नपंचमाधिपस्य लग्नसप्तमावस्थानेन उच्चनीचस्वत्रोपगतगुणविशेषैर्महाराजयोग उक्तः संप्रतिस्थानांतर
पंचमाधिपस्य योगं नरसंपत्तिकं दर्शयति लाभमेषाभ्यां स्थानगः अथ अत्रराजजनितद्युतिनाद्विपरीतफलनिर्देशा
त् एवं च लग्नात्मये सप्तमपंचमस्थानेनाभ्यां सप्तमस्थाने लग्नात्पंचमाधिपः आत्मपुत्रकारकाभ्यां योगे संबंधे सति उ
च्चनीचस्वनवांशाम्भवतीसन् उच्चनीचस्वनवांशवर्तिग्रहदृष्टो वा शुभग्रहमात्रदृष्टो वा यदि भवति तर्हि जातकवानु
रूपः स्थानगतमहाराजाभिधानस्थाने अमात्यलक्षणानानाभिधस्थाने बलादिनारतम्यानुरोधेन गतः नरसदाधिरू
ढो भवति यदा राजजनिताभ्यामिसितन्नानुवर्तते अन्यत्पूर्ववत् एवं च लग्नात्पंचमेशः लग्नात्सप्तमपंचमस्थानतो
योगे संबंधे सति उच्चनीचस्वनवांशगतः उच्चनीचस्वनवांशगतग्रहदृष्टः शुभग्रहमात्रदृष्टो यदि भवति तर्हि अमात्या
दिसमुचितस्थानाधिरूढो सतीत्यर्थः अथामात्यादिस्थानाधिरूढस्येव योगमाह तत्र शुक्रचंद्रयोर्यानवंतः तत्र राम
प्रागुक्तामात्यादियोगघटके च लग्नपंचमसप्तमे लग्ने लग्नेकादशो वा पंचमाधिपेन सह स्वंद्रशुक्रयोः सतोर्यानवंतः या ३५
हनवेनोजना भवंतीत्यर्थः अथ राजतुरंगयोगं दर्शयति तत्रप्रानिकेतुभ्यां राजतुरगाधीशः लग्नसप्तमपंचमतः सप्त

मस्थाने पंचमेशेन सह विद्यमानाभ्यां जातका नृजनः गजतुरगाधीशो भवतीत्यर्थः अथ राजयोगमाह शुक्रकुजकेतुषु स्वभा
ग्यदारेषु स्थितेषु राजानः लग्नात्सप्तमद्वितीयचतुर्थेषु शुक्रकुजकेतुषु सत्सु राजानो भवंतीत्यर्थः अथ राजयोगांतरमाह पि
तृलाभधनप्रागयोश्च तत्र पूर्वसूत्रात्स भाग्यदारेष्वित्यपहाय अन्यत्सर्वमनुवर्तते लग्नसप्तमयोर्नवमचतुर्थस्थाने शु
क्रकुजकेतुषु स्थितेषु सत्सु राजानो भवंतीत्यर्थः अथ निरुक्तयोगद्वयावलंबेन राजप्राप्तिकालं दर्शयति पत्नीलाभयोः सप्ता
नकालः लग्नसप्तमयोर्येन नवमस्थानं तद्दशा राज्यदेत्यर्थः अथ लक्ष्मीयोगमाह भाग्यदारयोगेह शुक्रसमानेषु श्रीमं
तः द्वितीयचतुर्थयोर्यामेकादशप्रथमनवमस्थानानि तेषु कुजशुक्रकेतुषु स्थितेषु जातकवंतः श्रीमंतो भवंतीत्यर्थः अ
थ लक्ष्मीयोगांतरमाह तत्र उच्चैः करसंस्था राजा च आत्मकारके तातुच्चे विद्यमाने नो भयाधिकारके तो ति यावत् जातकवं
तः श्रीमंतद्दृत्यर्थः अथ लक्ष्मीयोगं क्षुद्रराजयोगात्मकं दर्शयति पितृधर्मयोर्लेयपलाभयोर्गुरौ चंद्र शुभदा योगे मंडला
तः तत्र बुधगुरुयोगेषु राजा वा लग्ने एकादशयोर्येप्रथमसप्तमे तयोर्योगे श्रीमान्मंडलराजा वा भवतीत्यर्थः अथ लक्ष्मी
योगांतरमाह तस्मिन्नुच्चे नीचे पितृलाभयोः श्रीमंतः तस्मिन्गुरौ लग्नसप्तमयोरुच्चे नीचे वा सति जातकवंतः श्रीमंत इ
त्यर्थः अथ पुनरपि लक्ष्मीयोगांतरमाह स्वभावनाथाभ्यां शुक्रचंद्र दृग्योगयोः आत्मकारक लग्नाष्टमस्थानतः प्रथम

सप्तमस्थानयोश्चंद्रशुक्रयोगेचंद्रशुक्रदृष्टेर्वासत्यां तत्रशुभवर्गेषुश्रीमंतश्च तत्रप्रथमसप्तमस्थानयोःशुभवर्गेषुतत्रसप्तेत्रा
३६ दिषुसत्सुश्रीमंतश्चराजानश्चभवंतीत्यर्थः अथराजयोगांतरमाह दारेश्वलग्नयोश्चंद्रगुरौ मूले चंद्रोरिपौगुरौधनेषुशुभेषुराजा
नः आत्मकारकलग्नाधिनाथान्यतरस्याच्चतुर्थैकादशस्थानतश्चंद्रे द्वितीयेपंचमेद्वादशेकादशेगुरौसतितत्रएकादशेचंद्रेवासति
दशमेगुरौवासतिधनेषुपंचमद्वादशैकादशस्थानतोनवमपंचमेषुशुभग्रहेषुएषदृष्टेषुसंभूययास्थितेषुराजानोभवंतीत्य
र्थः अथराजयोगांतरमाह लाभेलाभयोश्च लग्नसप्तमयोर्द्वितीयेगुरौसतिएकादशेचंद्रेसतिदशमेगुरौवालग्नसप्तमेकादश
दशमेभौनवमेषुस्थितेषुराजानोभवंतीत्यर्थः अथराशिकुंडल्यामुक्तान्योगान्नवांशकुंडल्यांदशांशकुंडल्यांचातिदिशति एवमं
शतोद्रेष्काणतश्च प्रथमतस्तमारभ्यपेयोगाराशिकुंडल्यामुक्तास्तेसर्वेपिनवांशकुंडल्यांद्रेष्काणकुंडल्यांचद्रष्टव्याइत्यर्थः अ
थमहत्वावहंयोगंदर्शयति लेपलाभयोश्चंद्रगुरौशुभग्रहयोगेमहांतः लग्नसप्तमयोर्द्वितीयेगुरौशुभग्रहदृष्टेशुभयोगेवामहां राम
तोभवंतीत्यर्थः अथमहत्वयोगांतरमाह लाभचंद्रेपि लग्नात्सप्तमेचंद्रेशुभग्रहदृष्टेशुभयोगेवामहांतोभवंतीत्यर्थः अथमहत्व [illegible]२१
योगांतरमाह पापयोगाभावेशुभग्रहयोगिनीच यत्रक्वापिराशौचंद्रेपापयोगाभावेसतिशुभग्रहदृष्टेशुभग्रहयोगेवासतिम
हांतोभवंतीत्यर्थः अथराजप्रेष्ययोगमाह अत्रशुभग्रहयोगेराजप्रेष्यः अष्टमेचंद्रेशुभग्रहदृष्टेशुभग्रहयोगेवासतिजात

म

वमंप्रतिबंधकस्थानं किंवसतिमुनेस्तात्पर्य्यकेतोर्लग्नं वेति अस्मिन्ग्रंथे विशेषतः कारकात्मलादेशो कर्तव्ये कारकान्विव

कुराशावात्मकारकं दर्शयति आत्माधिकः कलादिभिर्नभोगः सप्तानामष्टानांवा रव्यादिशनैतानां सप्तानां राहुंतानामष्टा

नांवामध्येन भोगः ग्रहः कलादिभिः कलाया आद्यैः अंशैः अंशादिभिरितियावत् अधिकः सआत्मा आत्मकारक इत्यर्थः

अंशपदंविहायकलादिपदेन निर्देशात्त्वंशसाम्येपि कलादिकाधिक्येन निर्णेतव्यमितिज्ञापनार्थं कलादिभिरपिसाम्येव

क्ष्यमाणवत्तेनैकतरनिर्णयः यत्रद्वित्र्यादिग्रहाणामंशादिसाम्येनैलोपेवलवत्स्थिरकारकादेवतत्कारकविचारःकर्तव्य कारक ५

इति ननु आत्माधिकः कलादिभिर्नभोगोष्टानामित्येवपाठोस्तुलाघवात् उच्यते तत्राधिकपदस्यानिविष्टत्वाद्राहोस्तुसर्वग्र

हांशाद्यूनांशतयात्मकारकेतेतिसूचनायाष्टानां वेतिपृथग्ग्रहः ननुकथं [illegible]ज्ञानमितिचेत् राहोर्विपरीतसंचारात् न्यू

नत्वेनैवाधिकत्वात् नभोगोष्टानामितिपाठेत्व[illegible]न्यग्रहरीत्याराहोरप्याधिक्यंप्रतीयेत राहुयोगेविपरीतमितिस्त्वप्रा

मार्ण्याच्च अत्रवृद्धसंमतिः भागाधिकः कारकः स्यादल्पभागोंत्यकारकइति नचवृद्धवाक्याद्राहोर्न्यूनांशत्वेनआत्मका ·

रकत्वंनायातिइतिवाच्यं शास्त्रप्रसिद्धतयाबालानामपितथैवबोधाद्धिविज्ञनोक्तं अत्रवृद्धवाक्यांतरंच मेषाद्यसव्यमा राम

र्गेण राहुकेतूनकारकौ अस्यार्थः राहुकेतूमेषाद्यसव्यमार्गेण सव्यंवामं असव्यंदक्षिणं असव्यमार्गेणदक्षिणमा २

३ म[illegible]सोमध्यखेटः सायरखेटः सएवहीति भागाधिकः कारकात्मे

नस्थिताः ग्रहाः विरोधिनः अर्गलायाः प्रतिबंधकाइत्यर्थः तथाच दशमादिस्थाने शुभग्रहाभावे सप्तमे वंचतुर्थादिस्थान
स्थैर्थे हि ग्रंगला भवति नान्यथेतिभावः बाधकबाधकानप्याह नन्वनाविवलाश्च अर्गलाकर्तृग्रहेभ्यः प्रतिबंधकाः
ग्रहाः न्यूनाश्चल्पसंख्याकाः द्वौ चेदर्गलाकर्तारावेकश्चेत्प्रतिबंधकइत्यादिविवलाः निर्वलाश्च यदि तदा प्रतिबंधका नस्युः
बलमत्र निरूपयिष्यति च अर्गलास्तप्रतिबंधकाश्चद्वेद्रेरुक्ताः भयपुरोपिविनाभावाद्ग्रहाः शुभार्गलं स्युः तांज्ञेयमा
वाजुविपरीतार्गलंविदुः इष्टः इष्टिवतः राशेर्द्वितीयादितः शुभार्गलं हादशादितोऽशुभार्गलंप्राहुः अर्गलविरोधार्गल
मेव विपरीतार्गलमुच्यते तृतीयार्गलामुपदिशति प्राग्वत्त्रिकोणे त्रिकोणे पंचमनवमयोः अर्गलातत्प्रतिबंधक
श्च प्राग्वत् पंचमे ग्रहसत्वे अर्गला नवमेन ऊनसंख्यात्वानिर्वलत्वदोषरहितग्रहसत्वेऽर्गलाप्रतिबंधकत्वमिति ननुवदा
रेत्यादिसूत्रेपांतपदस्यारिष्फेत्यादिसूत्रेभ्रातृपदस्योपादानादेवार्गलाभेस्सूत्रांतरनिर्माणस्यवैयर्थ्यापत्तिरितिवाच्यं
विपरीतंकेतोरितिसूत्रेकेतुग्रहव्यत्ययस्यत्रिकोणेस्वचक्रमत्वात्सापत्यप्रसंगात् अन्याहि दारभाग्यशूलेश्वपिकेतुग्रहत
व्यत्ययापत्तिरितिभावः यत्तुकेचित्तुक्तं प्राग्वदितिसूत्रस्पष्टयकरणसामर्थ्यादप्रतिबंधेऽप्यर्गलेतितन्न तथासतिका
मस्थेतिसूत्रोक्तमेव प्रसंगातोन्निर्भीतिः स्यादिति केतोविशेषमाह विपरीतंकेतोः केतोर्ग्रहस्य नवममर्गलास्थानंप
चदाररिष्फेत्यादिवत्

अंशाधिकं सूनता ४

द्वितीयेकादशचतुर्थभा वेष्वेष्रहः शुभः फल दः [illegible] शुभार्गलमा हुः [illegible] भावेषु [illegible] शुभेषु विपरीतार्ग लंविदुः ६

अंशाधिकमवह २

गं

तथा पंचमे र्गल वतिपापे न शुभे व मेन हि रोधीति